CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृत संस्थायाः पञ्चमपुष्पम् -५

जयतु संस्कृतम्

संस्कृतकवितासंग्रह

(प्रथमपुष्पम्)

प्रकाशकम्

जयतु संस्कृतम्

काष्ठमण्डपो नेपालः ।

दूरभाषा-२३०३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

← 4cm →

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतं संस्थायाः पञ्चमपुष्पम् -५

जयतु संस्कृतम्

संस्कृतकवितासंग्रहः

(प्रथमपुष्पम्)

सम्पादकाः

प्रा.डा. ऋषिरामपोखेलः
प्रा.डा. दुर्गादत्तशर्मा
सहप्रा. दैवज्ञराजन्यौपाने
सहप्रा. रामहरिदाहालः
उपप्रा. नवराजकट्टेलः

सहयोगिनः

प्रा. शिवहरिमरहट्टा
प्रा.डा.विष्णुप्रसाददेवकोटा
उपप्रा. जगत् उपाध्यायः
उपप्रा.भीमकण्डेलः
उपप्रा.जीवनोऽधिकारी
उपप्रा. मुकुन्दलामिछाने
सुमनकट्टेलः

प्रकाशकम्

जयतु संस्कृतम्

काष्ठमण्डपो नेपालः।

दूरभाषा-२३०३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकनाम	संस्कृतकवितासंग्रहः
Name of Book	SamskritKavitasamgraha
प्रकाशकम्	जयतु संस्कृतम्
Publisher	Jayatu Samskritam
संस्करणम्	प्रथमम्
Edition	First
पुस्तकसंख्या	५०० प्रतयः
Printed Copies	500 Only
प्रकाशनवर्षम्	२०५९–ज्येष्ठः ।
Publication Year	2059- Jeshtha
पुनःप्रकाशनाधिकारो ©	जयतु संस्कृतम्
मूल्यम्	रु.९५।-
Price	Rs. 95/-
टङ्कणम्	कान्तिपुरटङ्कणसेवा पुतलीसडक, काष्ठमण्डपम्
Type Setting	Kantipur Computer Services Putalisadak, Kathmandu, Nepal
मुद्रकः	परिचितमुद्रणालयः, बालाजु,
Press	Parichit press,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादकीयम्

पुरा २००४ तमे वैक्रमाब्दे काष्ठमण्डपे रानीपोखरी-संस्कृतप्रधानपाठशालायामधीयानैश्छात्रैः संस्कृतशिक्षायाः समुन्नतये, पारम्परिक-शिक्षापद्धतिपरिष्काराय, नेपाले विद्यालयमहाविद्यालयस्थापनाय, संस्कृतस्थजनशक्तीनां सम्मानाय, राणाशासनादसन्तुष्टिवशाच्च जयतु संस्कृतमित्यान्दोलनं विहितमासीत् । तदालोन्दनमेव पश्चाद्विस्तृतं व्यापकञ्चाभवत् । नेपालस्येतिहासे तदान्दोलनं प्रसिद्धमेव । तदान्दोलनसंलग्नाः कतिपये छात्रा इदानीं दिवङ्गता स्युः । कतिपये चेदानीमपि विविधेषु विशिष्टप्रशासकपदेषु वर्तमानाः सन्ति । तस्यैवान्दोलनस्य ५०तमे वर्षे स्वर्णमहोत्सवसमारोहः समायोजितः आसीत् । तस्य कार्यक्रमस्य समापनावसरे २०५५ तमे वैक्रमाब्दे जयतु संस्कृतमिति संस्था स्थापिता । तत्र "जयतु संस्कृतम्" आन्दोलने ख्याता वदाना वयोवृद्धा अभिभावकाः सन्ति ।

कालक्रमेण विस्मृतमाहात्म्याया संस्कृतभाषाया महिमोद्घाटनम्, तस्या विकासे प्रयत्नः, संस्कृतभाषोपजीव्याया वैदिकसंस्कृतिमूलाया नेपालीयायाः संस्कृतेर्विकासः, संस्कृतभाषायाः सर्वजनीनत्वप्रत्यायनपूर्वकं तदध्ययनार्थं सर्वेषां प्रवृत्तिवर्द्धनं चास्याः संस्थाया उद्देश्यानि सन्ति ।

नियमितकार्यक्रमानुसारमनया संस्थया २०५७ तमे वैक्रमाब्दे २०५८ वैक्रमाब्दे च संस्कृतकविसम्मेलनं विहितमासीत् । उभयत्र सम्मेलने कविभिः पठिताः संस्कृतकविताः, प्रेषिताः रचनाश्च समावेश्य अयं 'संस्कृतकवितासंग्रहः' प्रकाश्यमानोऽस्ति ।

बहवचो रचना अत्राधुनातनीं राज्यशासनव्यवस्थामधिकृत्य रचिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृश्यन्ते । ताश्च साम्प्रतमुच्चपदस्थानां भ्रष्टचरित्राणां प्रशासकानां सांसदानां च वाचालताम्, असत्यभाषिताम् राष्ट्रियहितविरुद्धमाचरणम्, अर्थलोलुपताम् जनेषु कृतघ्नताञ्च उद्घाटयन्ति । पुनस्तेषां कदाचारकदर्थनावशादेव महासङ्कटपतितानां जनतानां करुणक्रन्दनं लुण्ठितसर्वस्वाया नेपालभूमेर्विवशतां च द्योतयन्ति । दोषज्ञैर्विपश्चिद्भिर्व्याहृता सतर्जनीतर्जना मूल्यवत्यः काव्यवाचस्तेषामुन्मार्गगामिनां प्रशासकानां राजनीतिपथिकानां च कृते मार्गनिर्देशका भवेयुरित्यस्माकमाशंसा । अवशिष्टा अन्या रचनाश्चाध्यात्मिक्यः, राष्ट्रियभावनोन्नता, प्रकृतिचित्रणमनोहराः शृङ्गारसंवलिता नैतिकोपदेशोज्ज्वला भक्तिभावमधुराः संस्कृतभाषाया महिमवर्द्धकाश्च सन्ति । ताः स्वसंस्कृतिविस्मरणोन्मुखेऽस्मिन्समाजे देवगुरुमातृपितृभक्तिमहिमयुतायाः नैतिकतासुशृङ्खलायाः सदाचारविचारपूर्णाया नेपालीयायाः संस्कृतेः स्मारणे प्रदर्शने च संस्कृतभाषामाहात्म्योद्घाटने चेदानीन्तनेऽनेहसि उपयोगिनः स्युरिति मन्यमाहे, सर्वाश्चेमा संस्कृतरचनास्तद्विदां संस्कृतभाषागतां सौष्ठवं सुलभां साहित्यसुधासौहितीमाधातुं च सक्षमा भवेयुरित्याशास्महे ।

अन्ते चास्या संस्थायाः सहयोगार्थं रचनाकर्तॄन् कवीन् आयोजकसदस्यान् उपसमितिसदस्यान्, प्रारूपसंशोधनेन सहयोगिनो विद्वाद्वरान् अन्यान् सर्वानपि सहयोगिनश्च हार्दिकधन्यवादप्रदानपुरःसरं सभाजयन्तो विरमामः ।

जयतु संस्कृतम्

२०५९।२।२५।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविताक्रमः

१. शृङ्गारशृङ्गाटकम्	प्रा. मनुदेवभट्टाचार्यः	१
२. मम द्राघीयसी चिन्ता	नयराजपन्तः	१८
३. पृच्छ स्वं, सिद्धान्तिन्	यदुनाथखनालः	१८
४. चित्तचेतना	भीमकान्तपन्थी	२१
५. ताम्रकौशिकीं विलोक्य	भरतराज शर्मा	२३
६. जयतु संस्कृतम्	भरतराज शर्मा	२५
७. भगवन् मानवता भुवि जयतु	खेमराजकेशवशरणः	२५
८. ते शेमुषी कुत्र गता ?	हरिभक्तनेउपाने	२६
९. नववर्षस्य शुभाशंसा	हेमचन्द्रनेपालः	२७
१०. मम खलु देशः	प्रा. टीकाराम अधिकारी	२८
११. भगवन् ! भुवि शान्तिरस्तु सा	टीकाराम अधिकारी	३०
१२. स्वागतम् नववसन्त स्वागतम्	हेमराजपौडेलः	३२
१३. नेपालदेशः	प्रा.जगन्नाथशर्मा त्रिपाठी	३३
१४. पशुपतिदर्शने हिमालपवर्णनम्	प्रा. रामेश्वरशर्मा	३४
१५. जयतु संस्कृतम्	आचार्यः पूर्णचन्द्रढुङ्गेलः	३५
१६. मातृभूमिवन्दना	देवराजपौडेलः	३६
१७. विनम्रं नमामि	राजेश्वरदेवकोटा	३८
१८. अराजकता	टीकारामपन्थी	३९
१९. हे रामचन्द्र !	ऋस्यशृङ्गः	४१
२०. मुखं मलीनं ननु तेऽस्तिवाग्वती	ऋषिरामपोखेलः	४४
२१. पदमहिमा	शिवहरिमरहट्टा	४७
२२. लाउडापर्व	शिवहरिमरहट्टा	४९
२३. शिवगंगा (सेउती) प्रसङ्गः	टीकाप्रसाद शर्मा	५०
२४. एकं चित्रं वन्यसमाजस्य	माधवभट्टराई	५२
२५. दुष्कृतिदशकम्	माधवभट्टराई	५४
२६. संस्कृतम्	प्रा.डा.विष्णुप्रसाद शर्मा	५५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२७. चित्करोत्येष देशः	प्रा.डा.विष्णुप्रसाद शर्मा	५८
२८. कवितायाः कविता	भरतराजपन्तः	६०
२९. कीदृशीपरिस्थितिः	डा.विष्णुराजआत्रेयः	६२
३०. सहचरी	डा.दुर्गादत्तशर्मा	६४
३१. अवसरमहिमा	डा.दुर्गाप्रसाद शर्मा	६५
३२. गायत्रीमाता	रामचन्द्रशर्मा पौडेलः	६५
३३. मानसराज्यम्	रंघाली	७०
३४. धर्मो रक्षति रक्षितः	प्रा.डा.राधाकृष्णअधिकारी	७१
३५. वेणुवाणिः	हेमराजज्ञवाली	७२
३६. अनुतापः	डा.लक्ष्मीकान्तपन्थी	७३
३७. जानकी वन्दना	माधवप्रसादचालिसे	७४
३८. भिक्षुकः	कृष्णप्रसादकोइराला	७६
३९. कथं जयतु संस्कृतम्	तेजःकेशरी उपाध्यायः	७७
४०. यक्षप्रश्नः	प्रा.डा. वेणीमाधवढकालः	७८
४१. रे रे गर्जति गर्जति	प्रा.डा.वेणीमाधवढकालः	८१
४२. कवितानुतिः	रामहरिदाहालः	८२
४३. कालिदासार्चनम्	रामहरिदाहालः	८४
४४. नगदतु कोऽपि ।	हरिशरण उपाध्यायः	८७
४५. राज्ञीपुष्करिणी	ठाकुरप्रसादआचार्यः	८८
४६. तत् संस्कृतं दिव्यतु	प्रा.सिध्दिनाथगौतमः	९१
४७. सस्कृतं जनसर्वस्वम्	प्रा.डा.रामचन्द्रगौतमः	९२
४८. श्रीकृष्णाष्टकम्	प्रा.डा.दुर्गाप्रसाददाहालः	९३
४९. कर्तव्यम्	भानुभक्तभट्टराई	९४
५०. आपातनिपातनिरोधः	तीर्थराज आचार्यः	९५
५१. राजनीतिर्विजयते	ध्रुवभट्टराई	९६
५२. नशोभते चन्द्रकलाविलासः	मुकुन्दलामिछाने	९७
५३. कथं विरच्येत मनः	मुकुन्दलामिछाने	९८
५४.जलमहिमा	डा.बद्रीपोखरेलः	९९
५५. दिव्ययीपूषधारा	प्रा.दैवज्ञराजन्यौपाने	१००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५६. श्रीमङ्गलमूर्तये नमः	गोपालवैद्यः	१०१
५७. नेपालदेशः	श्रीरामसापकोटा	१०२
५८. जागृयात् कोऽपिशूरः	जीवनोऽधिकारी	१०३
५९. स्वकीयं राष्ट्रम्	श्रीरामोऽधिकारी	१०४
६०. कथं पोष्यते संस्कृतम्	सूर्यनाथसुवेदी	१०५
६१. कालजयी	प्रल्हादपोखेलः	१०६
६२. क्व गतो मम देशः	जगत्प्रेक्षितः	१०७
६३. युध्देन सहयोध्यव्यम्	जगत्प्रेक्षितः	१०८
६४.संस्कृतस्य महत्त्वम्	शिवरामचालिसे	१०९
६५. नेतृदशकम्	चन्द्रमणिनेपालः	११०
६६. त्रितुङ्गयाचना	पं.रुद्रमणि अधिकारी	११२
६७. सार्थं शुभं संस्कृतम्	लोकनाथआचार्यः	११३
६८. वाग्वती	नवराजकट्टेलः	११४
६९. प्रेयसीस्मरणम्	नवराजकट्टेलः	११६
७०. जयतु संस्कृतम्	डा.मान्क्रेट त्रोई	११८
७१. शास्त्रज्ञानम्	ज्ञानमणिनेपालः	११९
७२. हा हन्त ! तं.....	रमेशघिमिरे	१२०
७३. नेपालः केन रक्ष्यते	अच्युतरमणअधिकारी	१२२
७४. संस्कृतस्य अद्यतन्यवस्था	तीर्थराजशर्मा	१२२
७५. सदा जयतु संस्कृतम्	दामोदरशर्मा चालिसे	१२४
७६. नित्यं जयतु संस्कृतम्	माधवप्रसादपाण्डेय	१२६
७७. काङ्ग्रेसगाथा	जनार्दनघिमिरे	१२७
७८. अहमेव प्रजातन्त्रम्	माधवप्रसादलामिछाने	१२८
७९. संस्कृतम् पठचताम्	प्रीति आत्रेयः	१२९
८०. दर्पणः अस्माकम् परिचयः	अलङ्कार आत्रेयः	१२९
८१. देशपीडा	महानन्दतिमल्सिना	१३०
८२. संस्कृतं सर्ववेद्यम्	श्रीकृष्ण उपाध्यायः	१३२
८३. राष्ट्रं रक्ष सदा शिव !	विन्देशदाहालः	१३४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

८४. संस्कृतेऽस्तु	विश्वनाथरुपाखेती	१३५
८५. आधुनिकस्य नेतुः	विदुरनरहरिः	१३५
८६. धवलागिरी वैभवम्	भानुभक्तआचार्यः	१३६
८७. हिन्दुराष्ट्रं मे प्रियम्	वासुदेवकोइराला	१३७
८८. शान्तनेपालदेशः	खगेन्द्र घोडासैनी	१३८
८९. धन्याऽस्माकं हि संस्कृतिः	नन्दर्षिजोशी	१४०
९०. बुभुक्षिता	बलदेवअधिकारी	१४१
९१. शान्तनेपालदेशः	हरिलालभण्डारी	१४१
९२. कौशिकी शोभा	हरिनारायणतिम्सिना	१४२
९३. शान्तनेपालदेशः	हरिलालपौडेलः	१४३
९५. संस्कृतं सर्ववेद्यम्	भरतभट्टराई	१४५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शृङ्गारशृङ्गाटकम्

(शतकम्)

आचार्यः -मनुदेवभट्टाचार्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी,

वृद्धश्रवःप्रमुखनिर्जरराजराजि-
मौलिस्फुरद्घृणिमहामणिचुम्बिताग्रम् ।
कन्दर्पदर्पपृथुतुङ्गपयोधराया
मञ्जीरमञ्जुचरणञ्च रतेर्नमामः ॥१॥

गाढालक्तकरागरञ्जितमहो यद्वामपादाम्बुजं
मञ्जीरोऽपि स तत्र शिञ्जितपटुर्यो राजहंसायते ।
वक्षोजैकघटोऽपि कञ्चुकपटः प्रेमाब्धिपूर्णां वपुः-
कौशेयार्धवृतो रतिं वितनुतां देवोऽर्धनारीश्वरः ॥२॥

यो भोगीश्वरमौलिरत्नविसरप्रोद्भासिदेहद्युति-
र्यो रत्नाकरकन्यकाभुजलतापाशैकदीक्षापटुः ।
शश्वद् यः श्वशुरालयोचितमहानन्दैकसम्भोगवा-
नानन्दं वितरीतरीतु भगवान् वस्सर्वदोमाधवः ।।३।।

एकीभूतमहो विलीनमथवाऽन्योन्यं प्रविष्टं मुहुः
किं वा केलिकलाललामललनालीलाऽवलीलालितम् ।
मग्नं प्रेममहातरङ्गनिचये किं सामरस्याम्बुधौ
राधामाधवयामलं रतिरसाऽऽनन्दैकसिन्धुं नुमः ॥४॥

आम्री यस्य शरस्स, किंशुकधनुर्यज्ज्याद्विरेफावली-
च्छत्रं यस्य निशाकरो निरुपमं, सैन्यं च यस्यानिलः ।
मित्रं यस्य सदा वसन्तसमयो यद्वन्दिनः कोकिलाः
पूर्णः पञ्चशरः सदैव हृदये जागर्त्तु रत्या स वः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाग्देवताचरणकञ्जयुगैकभृङ्गः-
सम्प्राप्ततन्नयनकोणकृपाकटाक्षः ।
तत्पाणिपल्लवविमृष्टकपोलबिन्दुः
काव्यं करोति मनुदेवचटुः सहेलम् ॥६॥

यद्यप्यहं चपलधीरपि बाल एव
श्रृङ्गारवर्णनमयञ्च करोमि काव्यम् ।
क्षम्यं ततः कविकुलैर्ननु मामकीनं
धाष्टर्यं विधत्त इह किं नहि लोलबालः ॥७॥

श्रीरूप-रामपद-लक्ष्मण-रामसत्य-
श्रीजीव-शङ्कर-महाकवयो जयन्ति ।
आशावधूश्रवणयोर्विमला यशश्री-
रद्यापि कुन्दकलिकेव विभाति येषाम् ॥८॥

कान्ताधरामृतरसाम्बुधिमन्थनोत्थं
नाभीसरोजरशनामणिशिञ्जिताढ्यम् ।
आरक्तनेत्रवनितासुरतायमानं
देवाङ्गनाचरणहंसकनादरम्यम् ॥९॥

अत्यन्तपक्वसहकारगलद्रसाब्धिं,
पोस्फुट्यमाननलिनालिमधूपमेयम् ।
खर्जूरपूररससारगुणौकतुल्यम्
मिश्रीरसद्रवमहामधुकल्पनालम् ॥१०॥

कूजद्वसन्तऋतुकोकिलकाकलीकं,
गुञ्जद्द्विरेफरव-मञ्जुलमाधुरीकम् ।
वीणागुणक्वणितरागरसैकगेह-
मालोलबाल-वचनाधिकहृद्यवर्णम् ॥११

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्णेन्दुविम्बकिरणोद्भवसौधसौधं
क्षीराब्धिमन्थनभवामृतसोदरञ्च ।
उन्मत्तवारवनितामणितातिलीलं
सर्वर्त्तुसौख्यदतिरस्कृतकेकिकेकम् ॥१२

दर्भाग्रसूक्ष्ममतिमन्दरमन्थनोत्थ-
साहित्यशास्त्रसरिदीशसुधारसज्ञाः ।
आस्वादयन्तु कविवाङ्मयसारसिन्धोः
पीयूषयूषमपहाय जगत्समग्रम् ॥१३॥(कुलकम्)

श्रृङ्गारपद्मरसलोलुपषट्पदा ये,
कान्तावियोगविषमूर्च्छितमानसा ये ॥
श्रृण्वन्तु तूर्णमथ ते मनुदेवभट्टा-
चार्यस्य चार्वमलकोमलवर्णकाव्यम् ॥१४॥

दानेन किं, सुरधुनीसवनेन किंवा
योगेन किं, श्रुतचयव्यसनेन किं वा ।
धीरा !! विहाय सकलामपि कार्यचेष्टां
कान्तात्मकं जगदिदं परिचिन्तयन्तु ॥१५॥

रामापदाब्जयुगनूपुरधर्षिता ये,
वक्त्राब्जसम्भवसुधाऽशनहर्षिता ये ।
वक्षोजपङ्कजपरागसमर्चिता ये ।
तेषां सुखं कथयितुं द्रुहिणोऽप्यशक्तः ॥१६॥

वक्षोजशैलयुगभारनतां कृशाङ्गीं
कश्चिद् युवा मदनमार्गणभिन्नमर्मा ।
आश्लेषलोलुपमनाः स्तनयोर्महत्त्वाद्
नाऽऽर्हत् सुतुङ्गमुखचूचुकमृष्टमाल्यः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कान्तामुखाब्जमधुमत्तमधुव्रतानां
वक्षोजकुम्भपरिरम्भणपीडितानाम् ।
रात्रिन्दिवं विषमबाणशरातुराणां
वासो भवेन्ननु महेन्द्रगृहे परत्र ॥१८॥

दोदुल्यमानकुचशैलमरालसाङ्गी
मोमुह्यमान मनसा परिरभ्य भूयः ।
निर्गम्यमानमुखपङ्कजशीधुसिन्धुं
पेपीयमानकृतिनोऽनुदिनं जयन्ति ॥१९॥

चञ्चत्सुचारुकरपल्लवतल्लजाग्र-
माम्रद्यमानकुचपर्वतगर्वरम्याः ।
यूनाञ्च पञ्चशरचञ्चलमानसानां
सेव्याः सदा कनकभास्वरकम्रकान्ताः ॥२०॥

कन्दर्पदर्पनिलयौ युवती दधाना
वक्षोजकान्तकलशौ कुलशैलशोभौ ।
आरम्यहारगुलिकामिषचालनेन
पाशेन सा युवपशून् विकलीकरोति ॥२१॥

रोमावलीतरुततीषु समुन्नतासु
क्षीवेन्द्रसिंहनखराग्रविदारितासु ।
वक्षोजपर्वतदरीषु च कर्कशासु
ते पान्थनेत्रविशिखाः सततं पतन्ति ॥२२॥

मत्तेभचञ्चलगतेर्युवतेः सलीलं
भूयस्तु कामिमृगराड् नखरैः खराग्रैः ।
दिग्दन्तिगण्डघटसारकुचद्वयीतो
मुक्ताफलानि च लुठत्यतिनिर्दयं सः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दोलायमानकुचपीनघटौ कृशाङ्ग्याः
कन्दर्पभूपतिशरेषुधितुल्यमूल्यौ ।
धाता समीक्ष्य पतनादिव चिन्तितोऽसौ
पोप्रोथ्यते स्म किल चूचुककीलकाभ्याम् ॥२४॥

आदौ च दिग्गजकटावनु पद्मकोषौ
भूयो महीधरकुलानि विधाय धाता ।
व्यर्थोऽभवन्निजपरिश्रम इत्यवेक्ष्य
वक्षोजचारुकलशावपि निर्ममे सः ॥२५॥

हर्षस्तु मुग्धधिषणो यदुवाच भैम्याः
कष्टं भवत्यवनिभृद्भरधारणेन ।
वक्षोभवावनिभृतौ सततं वहन्त्या
एकस्य भारवहने ननु को ऽस्ति यत्नः ? ॥२६॥

वक्षोजभूधरदरीषु मुहुश्चरन्ती
हारावली मकरकेतनपाशरज्जुः ।
दोलायमानकुचसङ्गतिदोलिता सा
दोलायमानमकरोद् हृदयं तु यूनाम् ॥२७॥

प्रोत्तुङ्गतीक्ष्णाकुचपर्वतगर्वनम्रां
निष्पिष्य निर्दयमहो परिरभ्य गाढम् ।
कश्चिद् युवा तु परिवृत्य ददर्श रामां
किन्निर्गते कुचशिखे मदुरस्तु भित्त्वा ॥२८॥

कस्यास्तु यौवनमदालसचेष्टितायाः
सीत्कारभिन्नमधुराधरबन्धुरायाः ।
भीतैकहायनकुरङ्गविलोलदृष्टे-
र्भित्त्वाऽऽगतौ कुचघटौ किमु कञ्चुलीं तौ ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काचिन्महाजघनपर्वतभारनम्रा
मञ्जीरशिञ्जितरवाऽऽदृतपादकम्रा ।
रत्याहवे ह्यसफलं निजबाहुपाशै-
र्बद्ध्वा प्रियं कुचघटैर्बहुधा तताड ॥३०॥

एता नितम्बयुगसेवनमन्थरा या
भूयस्खलद्वसनदृष्टपयोधरा या ।
धम्मिल्लतल्लजतिरस्कृतकेकिबर्हाः -
सेव्यं सुयौवनवनं ननु तादृशीनाम् ॥३१॥

कश्चिद् युवा भुजबलैः परिरभ्य काञ्चित्
त्रैलोक्यसुन्दरकुचौ बहुशः प्रमर्द्य ।
तूर्णं विडम्बति महाकरिराट्कराग्र-
कुम्भाग्रपल्लवदलग्रहणीयलीलाम् ॥३२॥

सद्दर्पबाहुमृगराजनखाङ्कितानां
मुक्तालतारचितसुन्दरमेखलानाम् ।
आनीलचूचुकविडम्बिपयोधराणां
शोभास्ति काचन पयोधरभूधराणाम् ।३३॥

कश्चित्तु दत्तसमयां समयं च हित्वा
गत्त्वा तदा वनितया प्रियया‌ऽति मात्रम् ।
वक्षोज-बाहुलतिका-नख-दन्त-पादैः ।
सम्पीड्यते मुहुरहो ननु धन्य एषः ॥३४॥

मन्ये प्रभुमर्दनचञ्चलमानसानां
केलीकलाललितलोलविलासिनीनाम्
शृङ्गारवारिनिधिमज्जनतो विमुक्त्यै
वक्षोजहेमकलशान् विदधे समासाम् ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धन्याः सदा मकरकेतनबाणशाणाः
रामाऽभिरामसुरताऽध्वरदीक्षितास्ते ।
ये कामिनीस्तनघटैः पृथुकामसिन्धुं
सन्तीर्य तज्जघनतीरमथाश्रयन्ते ।।३६।।

काचित्तु सूक्ष्मवसनान्तरितस्तनोद्धा ।
स्वप्ने महाभयमयं किमु तत्र दृष्ट्वा ।
तद्भीतिभीतहृदया धुरिसन्दधौ सा ।
पार्श्वे महास्तनघटैः शयितं स्वकान्तम् ॥३७॥

रे कञ्चुक ! त्वमसि भाग्यवतामिहाग्र्यो
यस्स्वीकृतो दयितया कुचकुड्मलेषु ।
भूयश्च पादतलघृष्टशिरास्तु नाहं-
प्राणैः शपेऽत्र वितथं यदि ते ब्रवीमि ॥३८॥

वक्षोजकुम्भपरिमर्दननिर्दयानां
कस्तूरिकाऽगुरुलताच्छविभासुराणाम् ।
नेत्रद्वयाब्जपरिचुम्बनकालितानां
यूनां सुनिश्चितमिदं मदनः प्रसन्नः ॥३९॥

रत्नातिसूक्ष्मविमलाम्वरभूषितानां-
प्रोत्तुङ्गपीवरकुचौ वरकामिनीनाम् ।
दृष्टौ यदा रुचिरकञ्चुकबन्धनेऽपि
तच्चाम्बरस्य च तदाऽभवदम्बरत्वम् ॥४०॥

कान्तावियोगविषजर्जरमानसानां
कन्दर्पराजखरमार्गणपीडितानाम् ।
रात्रावहो ! प्रखरदीधितिकातराणां
कालः कथं कथय गच्छतु पान्थ ! यूनाम् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आम्री-परागखरमार्गणताडितानां
शय्यासु पार्श्वपरिवर्तनचञ्चलानाम् ।
नक्षत्रचक्रगणानापरिदेवनानां
गच्छन्ति चण्डसमयाः किमु पान्थपुंसाम् ॥४२॥

भृङ्गावलीगुणककिंशुककार्मुकाग्रै-
र्मत्ताङ्गनानयनकोणशरैः शरण्याः ।
भूयः प्रचण्डमलयानिलशोषितास्ते ।
हा ! हा ! कथं विरहिणः क्षपयन्ति कालम् ॥४३॥

कान्ताभिसारसुरतव्रतसंरतानां
यूनां प्रियाविरहमन्थरमानसानाम् ।
स्वर्गापगासलिलबिन्दुगतश्रमाणां
किं वर्णनेऽपि कवयोऽत्र भवन्ति शक्ताः ॥४४॥

पञ्चेषु पञ्चशरपातविमूर्च्छितानां
कान्ताभिसाररसलोलुपचेतसाञ्च ।
पस्पन्द्यमानमलयानिलवीजितानां
यूनां दशा क्वचिदहो ! वदतानुमेया ? ॥४५॥

उद्यद्धनुर्मदनमात्रसहायकानां
गाढान्धकारवसनाऽऽवृतसंहननानाम् ।
यूनां प्रियाविरहमार्गणजर्जराणां
नो वर्णनेऽपि कवयः कुरुत स्वचेष्टाम् ॥४६।

रामाऽभिसारशतपत्रमधुव्रतानां
तद्वक्त्रशीतकरशीधुचकोरकाणाम् ।
निर्दिष्टकालविलयादपराधभाजां
यूनां दशां वदवधूविहितक्षमाणाम् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कान्ताभिसाररसलोलुपमानसानां
दर्भाङ्कुराक्तपदवीकुसुमास्तराणाम् ।
सातङ्ककम्पितदशामभिसारिकाणां
पादप्रहारसुखभागिह कोऽपि धन्यः ॥४८॥

कश्चिद् युवा प्रियतमाकटिदत्तहस्त-
स्तद्भ्रूधनुर्नयनमार्गणविद्धचेताः ।
विच्छिद्य तीक्ष्णनखरैर्ननु रत्ननीवीं
भूयश्चुचुम्ब मदनासवकुण्डनाभिम् ॥४९॥

धम्मिल्लतल्लजकचग्रहणात्परन्तु
भूयः प्रियाभुजलतापरिवेष्टितोऽसौ ।
कृत्वा रतिं सपदि रत्यवसानकाले
कश्चिद् युवा पुनरहो ! सुरते प्रसक्तः ॥५०॥

कश्चित्तु रम्यरमणीरमणीयभोग्य
आदाय काञ्चन च काञ्चनभास्वराङ्गीम् ।
सत्पल्लवातिललितास्तरणे वसन्ते
सुष्वाप तद्भुजलतायुगपाशबद्धः ॥५१॥

कश्चिद् युवा प्रियतमासुरतप्रसक्तः
सन्ताडितो मुहुरहो चरणाम्बुजाभ्याम् ।
यावेन रञ्जितशिराः पदपल्लवानां
घस्रे सुहृत्सु सुकृती ह्युपहस्यतेऽसौ ॥५२॥

वक्षोजपूर्णफलबाहुलताऽभिरामा
तद्वक्त्रपुष्पमधुकण्टकरोमजाला ।
भृङ्गस्वनञ्च भणितैर्मधुरैर्विजित्य
तन्वी विनिन्दति च फुल्ललतां मनोज्ञाम् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वक्षोभवद्वयविडम्बितयुग्मतुम्बी
गीताविगीतमधुरस्वरभासुरा च ।
कामिप्रिया गुणवती रमणीयवर्णा
वीणेव सा कुलमणी रमणी विभाति ॥५४॥

वक्त्रेन्दुका कचनिशा द्विजभाप्रदीप्ता
राजत्पयोधरघटा विमलाम्बरा च ।
कामिप्रिया रुचिमती मधुपानहृद्या
सा नायिका किल विभाति विभावरीव ॥५५॥

आस्याम्बुजाऽमृतरसा,मधुपैः सुसेव्या
रोमालिकण्टकभुजालिमृणालदण्डा ।
कान्तोष्णरश्मिविकच्चाऽगुरुरेणुपूर्णा
शश्वद्विभाति नलिनीव विलासिनीयम् ॥५६॥

नानामनोज्ञसुरपुष्पविभूषिताङ्ग्यो -
नाभीवलित्रितयपल्वलतल्लजाढ्याः ।
काञ्चीसुशोभिजघनाऽनतगुल्फदेशा
रामा हरन्ति हृदयं ननु पान्थयूनाम् ॥५७॥

दग्धः शिवेन विलयं परिशङ्कमानो
नाभीसरोऽमृतरसे वितनुर्ममज्ज ।
रेजे वलित्रयमिषेण च धूमराजी
प्रत्युद्गताऽनुपमयौवनकामिनीनाम् ॥५८॥

हंहो ! अपूर्वरचनास्ति पितामहस्य
निर्माय केलिललितालयनाभिदेशम् ।
संस्पर्शकातरमनाः समयं स निन्ये
लक्ष्मापि तस्य कुहरच्छलतो विभाति ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लीलागृहं किमपि मन्मथनायिकायाः
क्रीडास्थलं किमपि पञ्चशरस्य नित्यम् ।
एकास्पदं किमपि तत्सुरतव्रतस्य
नाभीसरश्चपललोचनसुन्दरीणाम् ॥६०॥

अत्यन्तसूक्ष्मफलकञ्च नितम्बिनीनां
वेधा विधाय तदभावमहो ! विचिन्त्य ।
यो मुष्टिना स्म च मुहुः परिमाति तासां
किं वेष्टनं तु कुहरच्छलतो विभाति ॥६१॥

मुग्धः 'कथंनु विवृतं स नितम्बविम्बं
कामी त्यजेदिति" जगाद महाकवीन्द्रः ।
मोक्तुं जडा अपि कचा नहि शक्नुवन्ति
लोकत्रयीसकलसुन्दरतैकगेहम् ॥६२॥

रत्याहवे विवृतयुग्मनितम्वविम्वे
नेत्रप्रदीपयुगले रतिमन्थरस्य ।
धन्यस्य कश्यचिदहो मदघूर्णिते ते
नीराजनं प्रकुरुतो मणिमेखलाढ्ये ॥६३॥

निद्राच्छलेन शयितं दयितं विलोक्य
रामाऽपि यौवनधना सुरताभिरामा ।
एकान्तकान्तमुखचुम्वनलोभकृष्टा
जातोभयस्य वदनासवपानलीला ॥६४।

कामाहतास्तु युवका हि वकाः सुवर्णाः
मग्नास्तु केलिसलिले निजलक्ष्यसिद्ध्यै ।
कालानुसारमथ तां शफरीं निजेष्टां
धत्ते यथा वचनवागुरया किशोरीम् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्यब्धिमन्थनभवामृतमण्डभाण्डम्
लोकेशकौशलकलापकलैकगेहम् ।
रथ्याचलद्रुचिरयौवनयौवनं यद्
नेत्राञ्जनीभवति सम्प्रति पान्थयूनाम् ॥६६॥

सूक्ष्मोत्तरीयपटसंयतकण्ठदेशा
गात्रातिमग्नविमलाम्वरभास्वराश्च ।
केशाऽभिकास्य परिचुम्बिनितम्बविम्बा
रामा न कस्य हृदयं प्रसभं हरन्ति ॥६७॥

शृङ्गाटकेषु रमणीभ्रमणोचितेषु
भूयश्चलद्द्रुतमरुत्तरवाहनेषु ॥
कुर्वन्ति पान्थयुवकान् प्रमदाश्चरन्त्यः
पङ्गून् सुरेन्द्रपुरदुर्लभचेष्टितैस्तैः ॥६८॥

सञ्चारयाननियमे ननु ये नियुक्ता
धन्यास्तु राजपुरुषा इह शासनेन ।
येषां स्वकार्यमिषतः पुरसुन्दरीणां
सन्दर्शनं तु नयनाञ्जनतामुपैति ॥६९॥

सा नासिका मदनकार्मुकलस्तकं किं ?
सा भ्रूधनुश्च नयनेषुधिजाः शराश्च ।
तौ दुन्दुभी कुचघटौ किमु पाश एष
हारश्च नाभिरपि दुर्गमदुर्गगेहम् ॥

सा कर्णपुष्पकलिका किमु वैजयन्ती ?
तौ स्यन्दनौ च जघने खरमार्गणस्य ।
मञ्जीरशिञ्जितरवो विजयध्वनिः किम् ?
काञ्ची च यस्य जयिनोऽत्र विभाति मुद्रा ॥७०।७१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेपे तपः किमतुलं किमु कुण्डलानि
गण्डस्थलीकनककुट्टिमचुम्बितानि ।
रत्याहवे प्रचलिते किल केलिकाले
स्पर्धां सदा विदधतीव च नायकस्य ॥७२॥

संस्पर्शनोद्भवरसं वनितालतान्मं
को वा ब्रवीतुमिह भूवलयेऽस्ति धृष्टः ।
आसामचेतनहृदां स्तुतिवाद एष
हन्तोत्थितो वलयनूपुरमेखलानाम् ॥७३॥

तातप्यमानकनकोज्ज्वलभास्वराङ्गा
नक्तं निजाङ्गगतचित्रमहार्घरत्नाः ।
यूनामहो सुरतलोलुपमानसानां
घस्रभ्रमं हचकृषत क्षणकेन नार्यः ॥७४॥

काचिन्निजप्रियकपोलतले सुलोला
स्वीयाननच्छविमहो रतचुम्बनेषु ।
दृष्ट्वैव मानमकरोत्तरसा शुभाङ्गी
निश्चित्य साऽन्यवनिताधरदष्टमेतद् ॥७५॥

अत्युन्नतस्तनमहीधरपीडिता ये
कान्तामुखोच्छ्वसितशीधुमधुव्रता ये ।
धन्या निशासु रजनीकरभासितेषु
हर्म्योत्तरेषु शयिता वनिताश्रिताङ्गाः ॥७६॥

चन्द्रस्तु धन्य इह सौधशिरस्थिताना-
मालिङ्गच चुम्बति मुखं स्वकरैर्वधूनाम् ।
कार्येऽत्र लग्नमनसोऽनुदिनं हिमांशो-
र्देहोऽभवद् मुखकरात्मक एव तस्य ॥७७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तौ हेमकोकनदयामललोललीलौ
गुञ्जन्मधुव्रतसहोदरनूपुराढ्यौ ।
आलक्तरक्तचरणौ युवतेश्चरन्त्याः
पद्मानि कुट्टिमतले कुरुतो ह्यजस्रम् ॥७८॥

कश्चिद् युवा मदनमार्गणभिन्नमर्मा
कान्तापदोर्युगलनूपुरचेष्टितानि ।
कृत्वा मरालमधुरस्वनझङ्कृताञ्च
यो न्यक्चकार युगपङ्कजलोललीलाम् ॥७९॥

कश्चिन्निदाघसमयेऽतिपिपासितस्तु
जातो युवाऽतिरभसं रतिगेहमेत्य ।
तूर्णं प्रियावदनपङ्कजमद्यमद्य
पीत्वाऽभवत्सपदि पूर्णकृतार्थचेताः ॥८०॥

उद्यत्सुगन्धसलिलाञ्चिततालवृन्तै-
र्हाराभिरामकुचमण्डलकार्पणैश्च ।
भूयो हठाज्जघनकूपनिषेवणैश्च
पुंसां मनस्सु मदनोऽतितरामुदेति ॥८१॥

आदर्शदर्शनरता सुरतावसाने
रामाऽपि केलिचतुरा स्वतनुं ददर्श ।
कामाहतप्रियनखक्षतकस्तनाद्रि-
मास्याब्जदन्तमुखकुन्तलपीडितोष्ठम् ॥८२॥

देवेश्वरोऽतिसुकृतीह पुलोमकन्या-
शृङ्गाररूपरसदर्शनकामुको यः ।
धत्ते सदैव खलु नेत्रसहस्रकाणि
पञ्चेषु भिल्लखरमार्गणभिन्नचेताः ॥८३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारायणोऽमरगुरुर्ननु धन्य एव
यस्सर्वदा कमलयाऽमलया सहास्ते ।
लक्ष्म्यङ्गसङ्गसुखलोलुपमानसत्वात्
सर्वाधिराजशयनादपि नो विभेति ॥८४॥

पञ्चाननं विषमवाणचमूमृगाणां
कान्तं विलोक्य तुहिनाचलकन्यका तु ।
या ह्येककालसमकण्ठजिघृक्षयैव
धत्ते सदैव किमु सा दशहस्तमूर्तिम् ॥८५॥

देवासुराधिपतिपूजितपादपद्मा
धन्या पयोनिधिनरेन्द्रसुता च पद्मा ।
स्वर्णाद्रिसोदरकुचाम्बुजयोर्नु यस्यां
धत्ते प्रभू रुचिरबाहुचतुष्टयं सः ॥८६॥

वेधा विधाय जघनं घनसारगौर-
मत्यन्तभारवहनात्पतनात्स भीतः ।
नूनं तदिङ्गितवशा इह तास्तरुण्यो-
धत्ते तु बन्धनकरीं रशनां कृशाङ्ग्यः ॥८७॥

बाणस्तु काण इह यो मुखदर्शनाय
वक्षोभवावुपगताविति वाक्यमूचे ।
आलिङ्गनोद्भवसमुद्धतचूचुकाग्रौ
वक्षोभवावुपगतौ पविकर्कशाङ्गौ ॥८८॥

पार्श्वस्थचारुतरुणीतनुसंश्रितानां
दुग्धाब्धिफेनधवलाऽनुपमास्तराणाम् ।
शश्वत्सहाध्ययनसंरतपूर्णयूनां
किं स्यात्सुखन्नु पुरतो गृहिणाममीषाम् ॥८९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अङ्कस्थपूर्णयुवतीभुजवेष्टितानां-
संकेतमञ्जुवनकुञ्जसमागतानाम् ।
किंस्यात्सुखञ्च गृहिणां पुरतो बटुनां
गार्हस्थ्यभारशिथिलीकृतमानसानाम् ॥९०॥

आपीतमद्यरसिकाः स्मरबाणविद्धाः
पान्थालयोत्तमतमास्तरणे शयानाः ।
आवर्तचञ्चलकुचद्वयकुम्भनम्रा
रामा विलोक्य समयं क्षपयन्ति धन्याः ॥९१॥

गङ्गातटीं स्वसवनाय समागतानां
पस्पन्दयमानपवनाहृतकञ्चुकानाम् ।
कल्लोलधौतकुचकुङ्कुमचन्दनानां
काशी चकास्ति नगरीह मदालसानाम् ॥९२॥

भागीरथी धवलदूकुलवेष्टिता या
सोन्मादहंसरवहंसकनादरम्या ।
गुञ्जद्द्विरेफसुमनःपरिवासिता च
वाराणसी जयतिवारविलासिनीव ॥९३॥

रम्भोर्वशी सुनयना मदना सुकेशी
रस्याऽतुला सुवदनाऽपि च मञ्जुघोषा ।
यद्वाहिनीपतय इत्यथ तस्य सद्यः
कामस्य वामसरणेश्चरणौ नमामः ॥९४॥

हा हन्त ! हन्त ! धरणौ न सुधेति हेतोः
रे रे बुधा, नहि मुधा कुरुतेह शोकम् ।
शृङ्गारसारसुतिरस्कृत सौधसिन्धुं
काव्यामृतं सुकवयोऽनुदित्तं पिबन्तु ॥९५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यं समीरितमहो ननु योऽपि कश्चि-
च्छ्रुत्वा तदुत्तरत एव शिरो न धुन्वन् ।
नूनं भवेन्नरपशुः शव एव साक्षात्
किं वा भवेत्पशुपतिः शिव इत्यवेहि ॥९६॥

ये कान्ता चरणाब्जदण्डयुगलैः सन्ताडिता निर्दयं
ये वा सोन्मदलोहिताक्षिधनुषस्तीक्ष्णैः शरैर्जर्जराः ।
ये वा मत्तगजेन्द्रगण्डघटसोदर्यस्तनालिङ्गिता
धन्यास्ते कृतिनो वसन्ति च दिवं जित्वा महीमण्डले ॥९७॥

हं हो, मिष्टं किमिष्टं क्वचिदपि च भवेदिक्षुदण्डस्तु दण्डः
क्षीरं क्षारं तथास्याद्घृतमपि हृतं, नो सुधायाः क्षुधाऽपि ।
द्राक्ष्याऽभक्ष्याऽथ रामारतमपि विरतं गीतमेतद्विगीतं
यावद्यच्छन्ति काव्यामृतमिह मनुदेवस्य विष्वग्वचांसि ॥९८॥

काव्यालापकलाकलापललितं लालित्यलीलालयं
कूजत्कोकिलकाकलीकुहुकुहूसोदर्यमिष्टस्वनम् ।
भूयश्श्रोत्रयुगाञ्जलिद्वयभरैः पेपीय्यतां कोविदै-
रेतच्छ्रीमनुदेवनामककवेः शृङ्गाटकाख्यं मधु ॥९९॥

यद्गन्धर्वकलासु कौशलमहो ! यन्नृत्यगीतादिषु
यत्सम्पूर्णसुधांशुरात्रिसुरते, यन्मानिनीमानने ।
नीवीबन्धनमोचने, चरणयोरालक्तसँल्लेपने
तत्सर्वं किल लभ्यतां सुकृतिभिः शृङ्गारशृङ्गाटके ॥१००॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मम द्राघीयसी चिन्ता

प्रा.नयराजपन्तः

आस्ते नेपालनामा तुहिनशिखरिणं सेवमाना धरित्री
यस्याः स्तन्यं पिबन्तः सुखमिव दिवसान् यापयन्तो वयं स्मः ।
नेपालस्येतिहासो भवतु कलुषितो नैव मिथ्याकथाभि-
श्चिन्ता द्राघीयसीयं विरचयतितरां मानसं व्याकुलं मे ॥
(२०५२।१।२३)

पृच्छ स्वं, सिद्धान्तिन्

यदुनाथः खनालः

सिद्धान्ती भव जीवनं नय सदाचारैस्त्यजाऽहङ्कृतिं
योगं साधय, मानवे धर रतिं, पक्षान् विपक्षाञ्छृणु
छन्नं चित्ततले तमः शबलितं पूर्वाग्रहाऽहिं जहि
पृच्छ स्वं किमसि त्वमेव विशदः प्रक्षेपजाद्विभ्रमात् ? ॥१॥

शास्त्राण्याकलय श्रमेण गुरुणा प्राच्यानि सञ्चिन्तय
गाहस्वाऽऽसु तरङ्गभङ्गिषु मुदाऽर्वाचीनशास्त्राम्बुधेः ।
शास्त्रं योजय शुद्धनिश्छलधिया लोकं च संयोजय
शास्त्रं यत्र विरोधि मानवहितात् तत् साहसात् सन्त्यज ॥२॥

कार्याकार्यनिरूपणे प्रथमतः स्वब्रह्म ते कारणं
शास्त्रं तत्र सहायकं भवति तत् सेवस्व दृष्ट्या तया ।
दृश्यन्ते बहुशः प्रमादविकलाः शास्त्रे विदग्धा जना
भ्रान्तास्ते न तथाऽनुयान्ति परमं येऽन्तः स्थितं साक्षिणम् ॥३॥

तद्वेदं कुरुषे यथामति यदा कार्यं विविच्य स्थितिं
सिद्धान्तिन् ! शृणु वस्तुतोऽसि विनये दायी निजब्रह्मणे ।
स्वात्मानं प्रति सत्यवान् परजनस्त्वत्तोऽन्यदेवाऽऽचरेच्-
चेत् त्वं तत्र तथैव शुद्धमनसा श्रद्धातुमप्यर्हसि ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धान्ती प्रथमं प्रयाति नितरामेको नियोगे निजे
काले योग्यसमर्थिनः कलयते नीत्यां प्रतिष्ठावतः ।
पश्चाच्छक्तिनिपाततो रचयते त्वष्टेव सृष्टिं नवा-
मेकस्त्वं विसखः सदा यदि भवेः सिद्धान्तमाशोधय ॥५॥

अध्येतुं क्षमते जनो जलगतिं सामांन्यतः शासितुं
प्रत्यावर्तयितुं परं न स नदं शक्नोति शास्त्रादिभिः ।
विश्लेष्टुं युगभावनामभिनवीकर्तुं समर्थं परः
सिद्धान्तेन युगप्रवाहमपि नो नेतुं प्रतीपं क्षमः ॥६॥

आच्छन्नेव कलाकृतौ स्फुरति या विज्ञैः कला सा मता
विद्वत्ता खलु सा कृतार्थयति या गुप्तेव ते जीवनम् ।
प्रच्छन्नश्चरिते तथैव जगतः कल्याणविस्तारिणि
सिद्धान्तो नयवर्त्मनोऽकलुषितः स्तुत्याऽऽत्मनः शोभते ॥७॥

स्वस्यैव प्रतिभां तितांससि नु किं व्याजेन देशोन्नतेः
किं वा कामपि संस्कृतिं विकचितां देशप्रकृत्याऽऽगताम् ।
कल्याणीमितिहासतोऽप्यवितथामन्योन्यसंवादजां
पृच्छ स्वं त्वमुदारभाववलितां संवेदिनीं लक्ष्यसे ? ॥८॥

योज्यं स्वं न मतं हठात् परजने श्रद्धावता मानवे
सेतीतीरशिलासु मोहवशतोऽध्यास्यो न पाराशरिः
नोपेक्षा जनजातिभावनगतिर्भावात्मके निर्णये
सौराज्ये हि सहिष्णुता द्रढयते संवादिनीं संस्कृतिम् ॥९॥

उक्तः शिष्यगणैः पुरा सकरुणं कन्फचूसिया धर्मधीः
शालाऽश्वस्य गुरो ! गता ऽ नलवशाद् दाहं हहा द्रागिति ।
भक्तो मानवसन्तते रसयुते नेत्रे विधायाऽऽतुरे
पप्रच्छ प्रथमं स्थले किमु जनो दग्धो न वा कश्चन ? ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्बाधं रचनां विधेहि तव चेत् संप्रेष्यजातं नवं
प्रत्यक्षानुभवात्मकं न तु परोच्छिष्टं न वा जीर्णकम् ।
संप्राप्ते क्रयविक्रयस्य समये सत्काव्यमुक्ताफले
कान्तिं दर्शयते विवेकनिकषो देशं न नो वा कुलम् ॥११॥

व्याख्या ह्याप्तवचांसि तेऽस्ति पटुता व्याख्येयसाराय चेन्-
मूलं तेन विशद्यते सहृदयोऽवश्यं च लाभायते ।
पाण्डित्येन तथाऽऽवृतेश्च तमसा देशस्य मूलं कृतिः
स्फूर्तिं नैव परं तिरस्कृतिमियाच्चेद् भाष्ययत्नं त्यज ॥१२॥

व्याख्या दृष्टिविशेषदिष्टसमया पक्षैकसीमाऽङ्किता
नैकं तत्र महाधियामपि मतं लोके प्रमाणं तव ।
पुष्पस्योपवने सुगन्ध इव ते पक्षो विना चोदनं
यायादर्थगगौरवेण हृदयं हृत्वा स्वतो विस्तृतिम् ॥१३॥

माता त्वां न हि बुध्यते तव पिता ऽऽ चारं पृथक् सेवते
जाया चाप्यबला भयेन विकला मूकायिता वर्तते
भ्राता स्वस्य विवेकतः परतरं निः सत्त्वकं दण्डचते
शिष्याणामवशिष्यते न च सुतः स्वात्मानमालोचय ॥१४॥

स्थास्याम्येकदिने यमस्य पुरतः प्रश्नं दृढं पृच्छत-
स्तस्मै दास्यसि निश्छलेन मनसा न्यायोचितं स्वोत्तरम् ।
प्रक्ष्यत्येष तदा कृतं परहिते कल्याणकार्यं त्वया
किं शैवोऽसि न तत्र पृष्टिविषयः शाक्तोऽसि बौद्धोऽसि वा ॥१५॥

परिणतवयसा च व्याधिना चाऽभिभूतः
शयनशरणमूढो वेदनाऽवेदनस्थः
क्वचिदपि विशदं चाऽव्यक्तकल्पं क्वचिच्च
विरमति यदुनाथो भावबन्धं विधाय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चित्तचेतना

स्व.पं. भीमकान्तः पन्थी

रे मच्चित्त ! विकल्पसे प्रभुतया हर्म्ये स्थितिं कर्हिचित्
गायन्नाम हरेरजस्रमथवाऽरण्ये कुटीराश्रयम् ।
दैवाधीनतयाऽप्यभीष्टविषये पूर्वे न लब्धे पुनः
स्वेच्छापेक्ष्युभयत्र नित्यसुखदं कस्मात्परं नाश्रयेः ॥१॥

रे मच्चित्त ! दशेन्द्रियाधिपतया धात्रा नियुक्तोऽस्यपि
श्रोत्रादेर्बहिरेव ते तु विषयाश्चैकस्य पूर्णान्तरः ।
बाह्यानां वयसोऽर्धमेव समयो भोगाय चेद्दीयते
ह्यर्धं ते मननाय दत्तमपि तन्न्याय्यं न गृह्णासि किम् ॥२॥

रे मच्चित्त ! दशेन्द्रियार्थ उचितः शब्दादिनानाविधो
बाह्यार्थो विषयः प्रवृत्तिपरकस्तेषां कृतार्थाय सः ।
दत्तं ते मननं सुचिन्तनमथो ध्यानं निवृत्त्यात्मकं
त्यक्त्वा तत्त्रितयं परस्य विषयं केनेच्छसि स्तेनवत् ॥३॥

रे मच्चित्त ! दशेन्द्रियाऽधिप इति त्वन्नाम धात्रा कृतं
स्वाधीनेन्द्रियवर्ग एष भवता नेयः सदा सत्पथे ।
आज्ञां धातुरलङ्घि किं क्वचिदयं त्वच्छासनाभावतो
नाना दुर्विषयोरगास्यविवरे यात्येव धिक् कापथे ॥४॥

रे मच्चित्त ! दशेन्द्रियैरपि धृतं कर्णाक्षिनासादिकं
तद्द्वारा बहिरिन्द्रियार्थविषयान् भुञ्जन्तु शब्दादिकान् ।
त्वं त्वन्तर्हृदि वर्तसेऽनवरतं कर्णाद्यभावाच्च किं
वेदैः प्रोक्तमचक्षुरित्यधिहृदं ब्रह्मामृतं नेच्छसि ? ॥५॥

रे मच्चित्त ! दशेन्द्रियं तव दशा यल्लग्नसम्बन्धतः
संसारार्णवसन्निपात उदितश्चानन्त दुःखाकरः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यच्छ्रान्त्या ग्रहगोचरे शिथिलता जायेत सर्वात्मना
नैर्मल्यात् प्रतिबिम्बितस्त्वयि भवेज्ज्ञानोच्चसूर्योदयः ॥६॥

रे मच्चित्त ! विषाहि-फेन-मदिरा-धत्तूर-तम्वाखु-सद्-
भृङ्गी-तज्जतुसन्निभा हि विषयाः सर्वेऽपि ते मादकाः ।
यस्त्वेतानपि सेवते प्रतिदिनं लोकैर्भृशं निन्दितः
कार्याकार्यहिताहितस्वपरतां सत्यं कथं वेत्तु सः ॥७॥

रे मच्चित्त ! विषात्मका हि विषया यत्सेविनोऽस्मिन्भवे–
ऽत्युद्विग्नाः कति तूत्पतन्ति निपतन्त्यन्ये भ्रमन्तीतरे ।
तत्त्यागे सति सच्चिदात्मसुखिनो दृश्यन्त एके बुधा-
स्त्यक्त्वा ताँस्त्वमपि स्वयं सुखितया सद्ब्रह्मनिष्ठं भव ॥८॥

रे मच्चित्त ! गृहाण मद्वच इदं शाम्यामि शान्ते त्वयि
ह्युद्विग्ने त्वहमुद्विजे प्रमुदिते मोदे शयाने शये ।
चाञ्चल्यप्रकृतेस्तवानुसरणात् खिन्नोऽस्मि किन्त्वावयोः
सौहार्दातिशयान्ममोपकृतये शान्तिं भजेथाः सदा ॥९॥

रे मच्चित्त ! भवार्णवेऽसि पतितं मध्ये तरङ्गायसे
विस्तीर्णं भवसि प्रतिक्षणमहो ! मोहान्न विश्राम्यसि ।
त्यक्त्वा सङ्गममुं न दूरयसि चेत् पारेऽर्णवं नेष्यसि
ब्रह्म-ध्यानमनारतं विदधतां पारं स्वयं नेष्यसि ॥१०॥

रे मच्चित्त ! कुरु व्रतं ह्यविरतं त्वं ब्रह्म भूयाय सत्
नैवाहारविहारमाचर तवाहारेन्द्रियार्था इमे ।
आहारैस्तव पुष्टता यदि तदैवात्मा तनुत्वं भजेत्
नाहारात्तनुता तवास्ति सहभूः पुष्टो बलिष्ठो भवेत् ॥११॥

रे मच्चित्त ! परं विधेहि नियमं त्वं नित्यजाग्रत्स्थितिं
ब्रह्म-ध्यानमविश्रमं यदि भवेज्जाग्रत्स्थितिः सा तव ।
जाग्रत्पश्यति वस्तु सूक्ष्ममपि यत् सत्यं यथावत्तथा
निद्राणस्तु न पश्यति क्वचिदयं स्वप्नं तु मिथ्यात्मकम् ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रे मच्चित्तचकोर ! दीप्तविषयाग्निज्वालमालान्तिके-
ज्योत्स्नापानतृषा न याहि हिमगुभ्रान्त्याऽतिदन्दहचसे ।
मर्यादामविलङ्घ्य ते स्थितिरिह स्वान्तःसमुद्रे यदि
श्रुत्युक्तः शतधा न किं त्वयि भवेदानन्दचन्द्रोदयः ॥१३॥

रे मच्चित्त ! विशालदर्पणनिभं स्वच्छं त्वमस्यात्मना
साक्षात्कारकृते सुसाधनमिति प्रोक्तं परब्रह्मणः ।
पङ्कं विद्धि दुरिन्द्रियार्थविषयान् सङ्गत्य तैः पङ्किलं
मा भूः स्वं प्रकृतिं भजस्व भवता साक्षात् क्रियेतेश्वरः ॥१४॥

रे मच्चित्त ! दशेन्द्रियार्थविषया दृष्टाः सहस्राधिका
नैषु स्यात्तव धारणा बहुगणैः संबन्ध्य दुःखीयसी ।
एकं ब्रह्म निरन्तरस्वविषयीकृत्यैव चेद् ध्यायसि
ब्रह्मीभूय विभासि तत्त्वमसि तद्ब्रह्म त्वमेवासि भोः ॥१५॥

रे मच्चित्त ! त्वदर्थेयं मदर्था चास्तु चेतना ।
नातोऽपि चेतसि त्वं चेच्चित्तता ते न सार्थका ॥१६॥

ताम्रकौशिकीं विलोक्य

भरतराज शर्मा घिमिरे 'मन्थलीयः'

रामेछापमण्डलस्थः

हिमाच्छन्ने तुङ्गे शिखरिणि मनोहारिणि वरे ।
पयः पूरं रूपं समजनि पुरा कौशिकि तव ।
अपर्णायास्ताम्राभरणधरकर्णात्तदनु तत् ।
पपाताऽऽद्या विद्या वदनत इवाऽम्भोजजनुषः ॥१॥

स्रवन्ती त्वं शैलाज्झरझररवं निर्झरभरा
व्यभा गङ्गा स्थाणोरिव शिरस आस्कन्दितवती ।
न पानीयैरेव व्यवसितमिदं तावकवपु-
रगाधे गाधेय्या ह्यवतरणतोऽभूदधिगुणम् ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाव्य प्रेयस्या रमणमनसा स्विन्नमिव यत्
परिष्यन्दैः पृक्तं मधुरवदनं चुम्बति मृडः ।
तदेव त्वज्जन्म प्रणयिमिलने हेतुसफलं
महत्सेवाऽमोघा भवति भवितुं भावितयशाः ॥३॥

त्वमूर्मीणां हारैः सलिलमणिभारैरधिरसं
प्रपातानां पातैर्विलससि च लासोत्कवपुषा ।
विलोक्याऽऽलोकं तेऽभिनय निपुणाया दृषदपि ।
स्वजाड्यं संत्यज्याऽमृतसमजले मज्जति पथि ॥४॥

कुरावः काको वा कलरवमरालस्तव जले
द्विजो वा शूद्रो वा विभवमदमन्दोऽधनजनः ।
भुजिष्यो वा भूभृत् प्रविशतु न भेदस्तव दृशि
समं शैत्यं चैत्यं वपुषि मनसि त्वं वितरसि ॥५॥

नमस्ते हे मातस्तव जलमुपस्पृश्य मनस-
स्तमो वातस्पर्शान्मलमिव विनिर्यातु नभसः ।
नमित्वा त्वां याचे भगवति भवत्यास्तटभुवि
मम प्राणोत्सर्गो भवतु भगवन्नाम जपतः ॥६॥

यदुत्थाय प्रातः प्रतिदिनमिहाऽपांसुलजलां
नमित्वा त्वां स्तौमि प्रतिपदगलद्वाष्पवचसा ।
न किं प्रेक्ष्यस्तेनाऽहमखिलखलानामपि खल-
स्तव स्रोतस्तीरे गलतु जरसाऽऽक्ता मम तनुः ॥७॥

प्रसूर्मे कैशोरे तटिनि नटकेऽसूनुदसृजत्
पिता मे कौमारे तव सलिलतीरे हि गतवान् ।
तदीयोऽयं पुत्रः पलितशिरसा त्रस्तधमनिः
समिच्छत्यच्छं त्वच्छरणमपुनः सूतय इह ॥८॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम्

'जयतु संस्कृतं'-संस्थया पुरा बहु कृतं जनकान्तिपूर्त्तये ।
विदितमेव तद्दैशिकेष्वलं चरति साऽधुना संस्कृतेः कृते ॥१॥

कविवरान् बुधान् भुग्नजागरान् घटयति ह्यसौ ग्रन्थगुम्फने ।
मधुरया गिरा वल्गुवाक्यया सुरसरस्वतीं नर्तयन्ति ते ॥२॥

शिवधरा धरा किन्तु सम्प्रति रुधिरपङ्किलाऽऽतङ्क चङ्क्रमैः ।
जनगणः शयन् रौति रोदिति स्वदलचालकान् वीक्ष्य न क्षमान् ॥३॥

जनबलार्जितं जानतन्त्र्यकं छलबलाद् गतं किन्तु विक्रियाम् ।
न खलु हेतवो लोक-लोकपा निखिल हेतवः सन्ति शासकाः ॥४॥

अपि तपस्विनः पीठसत्तया प्रमदयाऽप्सरः कान्तकायया ।
मुनिवरा इव ध्यानभञ्जनाद् विगलिता शयाः सन्ति साधकाः ॥५॥

तदुदितं वचः प्रायशोऽनतं श्रवणमण्डले मण्डनं कथम् ।
दधति जागरं नागरा यदि प्रमुदितान्तरा भूमिरुल्लसेत् ॥६॥

'जयतु संस्कृतं' संस्कृतध्वजं नवनवैर्ध्वनैरुन्नयन् पुनः ।
नमयतूत्थितान् स्वार्थलोलुभान् शमयतु द्रुतं राष्ट्र विप्रियम् ॥७॥

●

भगवन् मानवता भुवि जयतु

आचार्यः खेमराजकेशवशरणः

भगवन् मानवता भुवि जयतु ।
मनुसन्ततिरिह विमलैः कृत्यैर्जगदुन्नतिमानयतु ।
शान्तं राज्यं विततं परितो जनहिंसामपनयतु
निष्ठुरतामपहाय समाजः कारुण्यं हृदि सन्धारयन्तु ।
बाह्योपाधिमतीत्य मनुष्यः स्वान्तं परिशीलयतु ।
आन्तरमैक्यं दर्शं दर्शं समतामुन्मीलयतु ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शक्तोऽशक्तान् सधनोऽप्यधनान् सेवाभिस्तोषयतु
जीवहितं शिवपूजैवेति स्थिरभावं पोषयतु ॥१॥
वह हे जीवन ! सह सततम् ।
विरतिमेत्य मलिनत्वं मागा माभूल्लक्ष्यं विहृतम् ॥
बन्धं हित्वा विघ्नान् भित्त्वा मुक्तगतिर्वरणीया ।
विकृतिः स्यात्तव वहनविरामं भव साध्यं निरतम् ॥
पथि मिलतां त्वयि प्रणयजुषामुपदशम्य तृषामखिलानाम् ।
कलकलनिनदैः श्रुतिपुटसुखदैः कुरु कुशलं भुवि विततम् ।
दक्षे भूमिः सव्ये भूमिर्भूमिवृतस्त्वं परितोऽसि ।
पूरय तासां सकलामाशां पोषय हृदि सुकृतम् ।

तेै शेमुषी कुत्र गता ?

डा. हरिभक्त नेउपाने (नवपानीय)

जयतु जीवनं बालकोमलं सततसाधकं स्नेहभाजनम् !
सुखदसेवनं लब्धकेवलं परममोहनं जन्मना ध्रुवम् ॥१॥

शिरसि कुन्तलं मृदुलकोमलं वदनसुन्दरं कर्मणा दृढम् ।
कमललोचनं चरणपंकजम् रहसि रोदनं श्रूयताम् वरम् ॥२॥

प्रहसितं यदा दृश्यतेऽधुना धन्यजीवनं मधुरगुञ्जनम् ।
तव मुखाकृतिर्दिव्यकौमुदी क्षितिसरोवरे दर्पणं गता ॥३॥

तनसमर्पितं जन्मभूमये कृतपरीक्षणं प्रणतशाश्वतम् ।
समयकामदा भ्रमति भूरिदा भवति किं कदा धरणिविव्हला ॥४॥

सततदर्शनं दीनकल्मषं कृतविभूक्षितं विकलशोषितम् ।
छविगताः नराः उदरलालसाः मनसि मंगलं वचसि पीयूषम् ॥५॥

सकलकाननं शून्यछादनं विटपछेदनं किम् न रक्षसि ?
नगररोदनं गन्धदूषणम् श्रृणु मनाक् सखे ! किम् न शोचसि ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रवणज्ञानदं बधिरवञ्चिता निखिलव्यापकं दिव्यलोचनम् ।
कृपणहस्तयोर्नैव सेवनं न्यासः किम् भवेत् शून्यसंचितम् ॥७॥

विविधचारुता यत्र कामयेत् गमनकामना तत्र संभवेत् ।
गमनसुन्दरं यत्र दर्शय भ्रमरगुञ्जनं सरसि संचरेत् ॥८॥

मधुरसैर्युता कुसुममोहका भुवि-प्रदर्शनी दिक्षु दर्शयेत् ।
कविभिरीदृशं काव्यकल्पितं प्रकृतिसम्पदा स्थावरं भवेत् ॥९॥

त्यज सुखाय यत् सौम्यशोभनं भुवि विलासिता किम् चिरन्तन ।
भवकथा गिरा वक्तुमिच्छति प्रणतप्रेयसी नैव प्राक्तन ॥१०॥

मनुजशोषकाः नायकाः गणाः द्रविणलोलुपाः सन्ति निर्भयाः ।
न खलु सेवकाः देशवञ्चकाः पश्य शेमुषी कुत्र ते गता ॥११॥

●

नववर्षस्य शुभाशंसा

-स्व. हेमचन्द्रपोखरेलः

मन्दं वाति शनैः शनैरपनयन्स्वेदान्सुगन्धानिलः
कुञ्जे कूजति कोमलाम्रकलिकामास्वादयन्कोकिलः
फुल्लेन्दीवरकर्णिकासु रमते मत्तो मिलिन्दः किल
प्राप्ते नूतनवत्सरे कथमहो पन्था भवेत् पङ्किलः ॥१॥

क्लिष्टाः शैशिरशीकरैः कटुतरैर्वृक्षा विशीर्णच्छदा
हेमन्ते हिमपातजातजडताजीर्णाब्जिनीका ह्रदाः ।
सामोदं मधुनाऽधुना मधुरतां सञ्चारयन्सर्वतः
श्रेयोऽसौ नववत्सतरो वितरतादस्मभ्यमभ्यागतः ॥२॥

यामिन्यःकति यापिता न गणिता नीताः कियन्तः क्षणा
याता दुर्लभदेवदत्तदिवसाः संख्यामतीताः समाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विस्मृत्यैव पुरातनं गतधनं सङ्गृह्यतां नूतनं
सम्प्राप्तो नववत्सरः प्रतिदिशन्सन्देशमेतन्नवम् ॥३॥

वैशाखेऽप्यनवद्यहृद्यमधुरे वृद्धा विशाखा द्रुमाः
शोभन्तां नवशाखपल्लवदलै रम्या यथा विद्रुमाः
भूयासुर्भवने वने च वसतां कर्माणि भद्राय नः
सर्वेषां सुखदस्तनोतु कुशलं नित्यं नवो हायनः ॥४॥

अन्तेच–

तत्र संस्कृतिर्यत्र संस्कृतं
मूढधीर्मुधा मन्यते मृतम्
निखिलवाङ्मयं व्याप्य संस्थितं
जगति सन्ततं 'जयतु संस्कृतम्' ॥५॥

मम खलु देशः

प्रा. डा. टीकाराम अधिकारी
कास्कीमण्डलस्थः

चरणसरोजैर्गिरितनुजाया
ललितसखीभिर्जनकसुतायाः ।
अतिपरिपूतोऽखिलशुभवेषो
ललितनिवासो मम खलु देशः ॥१॥

दशरथपुत्रैरनुगतमित्रैः
सुचरितकृत्यैरपि परिपूतः ।
धृतनृपवृन्दः सततमनिन्द्यः
शुभचरितोऽसौ मम खलु देशः ॥२॥

नरधननाशैर्न सुखविनाशै-
र्न यवनघातैर्न च रणपातैः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न नरपिशाचैः कलुषित एष
नियतविलासो मम खलु देशः ॥३॥

रविशशिशोभि ध्वजमपि यस्य
विमलतपोभी रिपुरपि वश्यः ।
नयविनयाभ्यां नततर एष
धृतकवचोऽसौ मम खलु देशः ॥४॥

चपलनदीनां मधुरतरङ्गै
र्विमलगिरीणां गगनसुसङ्गैः ।
नववनभङ्गैर्हृदयहरो यो
ललितवसन्तो मम खलु देशः ॥५॥
गिरिपतितं सच्छतशतधारं
भवति यदीयं खलु नदजालम् ।
जलधरयोगैर्मधुरव एष
धृतसुरचापो मम खलु देशः ॥६॥

प्रतिदिनमादौ रविकिरणानां
नवनवरूपैः श्रितपरिवेशः ।
तुहिनशिलाभिर्मणिमय एष
मुनिजनवन्द्यो मम खलु देशः ॥७॥

अजमहिषाणां शकुनिमृगाणां
हरिहरिणानां विपिनचराणाम् ।
विचरणहृद्योऽमृतमधुरेष
शिशिरसमीरो मम खलु देशः ॥८॥

पुरवनितानां ससहचराणां
मधुमयहासैर्जितरजनीशः ।
विततविकासोऽचलमधुमासः
कविकलकण्ठो मम खलु देशः ॥९॥

जगति च सर्वैः कृतशमसङ्गो-
ऽनवरतशान्तो वपुषि च कान्तः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रविशशिनेत्रो विमलचरित्रो
हिममुकुटोऽसौ मम खलु देश : ॥१०॥

•

भगवन् ! भुवि शान्तिरस्तु सा

भगवन् ! भुवि शान्तिरस्तु सा
तटिनीवन्मुनिहृन्निनादिता
नवबालकवृन्दसंस्तुता-
ऽखिलवर्णा तव भारतीव सा ॥१॥

भगवन् ! भुवि मानवा नवाः
शुभसंस्कारधना भवन्तु च
परवित्ततडित्पराङ्मुखा-
स्तव भक्ता इव योगवैभवाः ॥२॥

भगवन् ! भुवि मानवाः कथं
नरसंहारमखं नवं नवम् ।
इह विस्फुरदस्त्रसङ्गरं
विदधाना अपि सन्ति विप्रियम् ? ॥३॥

भगवन् ! हृदयेश्वरो भवा-
नखिलानां समरार्थिनां महान् ।
तदिहाऽशुभदां तमस्ततिं
कुरु दूरं रविवत् कृतक्षतिम् ॥४॥

भगवन् ! रमणीव हारिणी
धरणीयञ्च दिगन्तगामिनी
असतां यदि तन्मनोजग-
च्छुभभावाङ्कुरितं सदा भवेत् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वद कुत्र गता दया तता
रमणीवत्तव मानसाश्रया ?
भगवन् ! समरार्थिनामपि
भव माधुर्यमयी दयाततिः ॥६॥

भगवन् भुवि शान्तिरस्तु सा
हृदि तेषामसतां कलाप्रिया
तव मन्दिरमस्तु तद्गृहं
स ह शङ्खध्वनिरस्त्रजालकम् ॥७॥

इह मानवताकलोदयः
परहिंसाप्रतिरोधकश्च सः ।
इह तुच्छविवादसंक्षयः
सततं स्याद् भगवन् ! बुधप्रियः ॥८॥

इह काननवैभवं नवं
विदुषामस्तु तपोविवर्धकम्
असतां समराश्रयं कथं
भगवन् ! स्यात् तरुगौरवं शुभम् ? ॥९॥

भवने विपिनेऽखिले नवे
गगने वाऽथ सरोवरेऽगले
पथि वाऽऽपणभोजनालये
भगवन् शान्तिकला ततोऽस्तु ते ॥१०॥

विचरन्तु सुखं स्त्रियोऽखिला
न च सीदन्तु दयालवोऽमलाः ।
अतिकोमलबालबालिका
नितरां शान्तिधना भवन्तु च ॥११॥

रचनासुषमामव प्रभो !
रसरम्यामवनिस्थितामहो !
सृजनाक्षयकारिणोऽधमान्
भगवन् ! शाधि नृसिंहवन्महान् ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वागतं नववसन्त स्वागतम्

हेमराजपौडेलः

अभिनन्दितोऽसि सहर्षं स्वागतपुरस्सरं वसन्त ! त्वम् ।
आनीतवानसि विजयं नववर्षरूपेण यतस्त्वरितम् ॥
क्व गतं, किन्तु मनोज्ञं मृदुपवनोल्लासि ते नृत्यम् ।
क्वचन विनष्टं मन्ये मोहकमतुलं त्वदीयलावण्यम् ॥

वद नूतनाऽस्ति का वार्ता म्लान इव दृश्यसे नितराम् ।
नानुभवामि पुरावत् परिमलभरितं तवागमनम् ॥

प्रभवति न मनो हर्तुं कलिकासु विकस्वरं हसितम् ।
वितरति न सुखं शोणितमयमिव नूतनकिसलयतल्पम् ॥
झञ्झावातविदीर्णा विलपन्त्य इव भूमिगता लतिकाः ।
दृश्यन्ते, न मिलिन्दान् सुखयन्ति पर्युषिताः कलिकाः ॥

श्रवणानन्दं जनयति कोकिलकूजितमपि न स्वल्पम् ।
कथमिह जातं सुरभिविहीनं सुपरिष्कृतमिदमुद्यानम् ॥
परितो हिंसा क्रन्दनबहुला, शशकविषाणसमा शान्तिः ।
दृश्यत इह न स्थिरयति हृदयं विजनवनेऽपि न विश्रान्तिः ॥

तदियमवस्था कथमपनेया साधु विचारय, योजय बुद्धिम् ।
यौवनवानसि शक्तियुतस्त्वं सञ्चिनु साहसमपनय मोहम् ॥
देहि विवेकं नेतृगणेभ्यो विकिर सुशिक्षारविकरजालम् ।
बोधय सुप्तान्, प्रशमय हिंसां, वर्धय मैत्रीं, स्थापय शान्तिम् ॥
स्वीकुरु नूतनवर्षारम्भे पुनरपि हार्दं स्वागतवचनम् ।
साधय कार्यानुन्नतिपथगान् दूरीकुरु गुरुतरजननीदैन्यम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालदेशः

प्रा. जगन्नाथशर्मात्रिपाठी

शैलोच्छृङ्गैस्तुहिनधवलैः सर्वदा रक्ष्यमाणः
प्रोत्तुङ्गाग्रैः क्षितिरुहवृतैः पर्वतैः सेव्यमानः ।
गण्डक्याद्या गिरिवरसुता यं सदा पालयन्ति,
नेपालोऽयं जयति सततं शाश्वतं प्राणधर्मः ।
॥१॥

यत्र स्थित्वा तपसि निरतः पाणिनिश्चन्द्रमौलि-
मस्तौषीच्चालभत नितरां शब्दशास्त्रं यथैशम् ।
व्यासो जातः परममहिते गण्डकीद्वीपमध्ये
वाल्मीक्याख्योऽप्यभवदभयश्चादिमो यः कवीनाम् ॥
॥२॥

यत्रत्यानां हिमगिरिगुहागह्वराणां मुखेभ्यः
प्रादुर्भूताः श्रुतिगुणमयाः शान्तिमन्त्रा वरेण्याः ।
बुद्धो जातः सुगत इति यः शान्तिसन्देशदाता,
यत्रत्यश्चावनिपतिसुहृच्छ्रान्तिकामः सदैव ॥
॥३॥

वेदान्सर्वान् विविधविधिना संयुतान् पालनीयान्
रक्षन् धर्मान् सुकृतिबहुलान् स्वान्जनान् गौरवेण ।
स्निग्धैः पुण्यैर्जनपदयुतैरञ्चलै रम्यमाणो
नेपालोऽयं जयति नितरां हिन्दुराष्ट्रं सुराष्ट्रम् ॥
॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पशुपति-दर्शने हिमालय-वर्णनम्

प्रा.रामेश्वर शर्मा ,
दाङ्गमण्डलस्थः

हर्षोऽयं किमु भारतीय सुहृदां नेपालजानामपि
वन्धूनां नवदर्शनादुपचितो राशिर्महान् दृश्यते ।
ऊर्ध्वोदीचि विराजितो हिमगिरिः सूर्यप्रभाभासुरो
रत्नानां ननु चन्द्रभास्कररुचां भण्डारमालोकितः ॥१॥

राजा भौतिकवैभवस्य सुकृतैर्हृष्टो हिमानीपतिः
राजाऽध्यात्मिकसम्पदोऽपि जगतामीशोभवानीपतिः ।
राजा देवतनुश्च हिन्दुविषयाधीशोऽत्र भूमीपति-
र्द्रष्टव्योऽस्ति वदन्ति यात्रिण इमे यान्तोऽद्य राज्ञः पथि ॥२॥

आर्याणां किमु सर्वनिर्गदसुखस्याऽऽकांक्षिणां निश्छला
स्वच्छाऽन्तर्गतभावना हिमगिरिव्याजेन किं दृश्यते ?
सर्वोच्चैः शिखरैः करैरिव नरान् कोलाहलातङ्कितान्
अध्येतुं सुखशान्तिमाह किमितो नेपाल आगम्यताम् ॥३॥

मुक्तादामधराः सहस्रश इतो नद्यो झरन्निर्झरा
लोकानामुपकारजीवनकरा नादेर्मया प्रेषिता
याभिश्चोपकृताश्चित्ररत्नसुहृदः पश्यन्ति मां नेति किं
शोचन्तं हिमशैलमागुरखिला याम्याऽऽशया बान्धवाः ॥४॥

आर्याणां किमु वेदराशिमभितोऽनभ्यस्यमानश्चिरात्
शम्भोरुज्ज्वलमुच्चमर्चितपदं प्राचीनमासादितः
गर्जं गर्जमनल्पनिर्झरनदीव्याजात् सविज्ञानकं
ज्ञानं मे ग्रहणीयमाह हिमवन्नेपालमागत्य किम् ? ॥५॥

सौन्दर्यस्य विशाल एष जगतामादर्श कार्यालयः
आश्चर्यस्य समस्तविश्वविदितं किं प्राकृतं मन्दिरम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालीयविभिन्नभागनिलयैर्दूरान्नरैर्दृश्यते
यानैर्व्योमचरैः पदातिभिरपि स्वाकर्षकं चान्तिके ॥६॥

दाताऽहं हिमशैलसंस्कृतिरुचेर्नृभ्यः सहस्रैः करैः
कृष्णाद्युच्छलतुङ्गनिर्भरनदव्याजाद्य उद्घोषयन् ।
दत्तेऽत्यूर्वरमृत्तिकां तटभुवां सेकं सुपेयं जलम्
तीर्थस्वच्छमरुद् वनौषधिपुरी श्रीवृद्धिवातायनम् ॥७॥

दायं दायमसौ विधाय हृदयं खण्डं जगत्याः कृते
द्रावं द्रावमनादिकालत इहायं सेवको दृश्यते ।
निः स्वार्थः परमेष सेवितनृणां स्वेषां हि दिदृक्षते
सौहार्दं परसेवनाय च धनं शक्तिर्मिथः कांक्षते ॥८॥

दानं कोटिगुणं भवेदिति कथा दूरेऽस्तु दानं यथा
तावल्लाभवचोऽपि नष्टमिति किं शैला अधस्या अपि
तप्ताभू-क्षय-ताप-वृद्धिवरमृत्-सर्वस्ववाहोषरा-
पत्तीर्नाशयितुं श्रवा अपि गिरा हर्षाश्रुविन्दूत्किरा ॥९॥

●

जयतु संस्कृतम्

आचार्यः पूर्णचन्द्रढुङ्गेलः

सततसंस्कृतसंस्कृतिरक्षकै-
रितरशासनकाङ्क्षिदृढैर्जनैः ।
जयतु संस्कृतमत्र महद्ध्वनिः
समुदघोषि तथैव भयं गतम् ॥१॥

अहरहर्जनता परिवर्तन-
दृढतया प्रसृता समभूत्तदा ।
तदवलोक्य तदातनशासकै-
र्भयमधारिकृतं च जनेप्सितम् ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतमत्र गृहे गृहे
जयतु संस्कृतमेव जने जने ।
जयतु संस्कृतमाढ्यकुले पुन-
र्दृढतमं परमास्त्रमजायत ॥४॥

जयतु संस्कृतमार्षबलं दृढं,
जयतु संस्कृतमर्त्यधनं स्वकम् ।
जयतु संस्कृतमीश्वरमोदकं,
जयतु संस्कृतमात्ममन्त्रकम् ॥५॥

स्वधनसंस्कृतसंस्कृतिरक्षकैः
सतततत्परदानतपोव्रतैः ।
विविधशास्त्रकलाऽऽकलने रतै-
र्जयतु संस्कृतमद्य सुरक्ष्यताम् ॥६॥

●

मातृभूमिवन्दना

देवराजपौडेलः
वाराणसीस्थः

वन्दे मातरं नेपालपुण्यभुवम् ॥

महाकालीशिरस्कां मेचीचरणां
शस्यश्यामल-समतलदक्षिणां
हिमशैलसव्यां काष्ठमण्डपहृदयां
वन्दे मातरं नेपालपुण्यभुवम् ॥१॥

सप्तकोशी-सप्तगण्डकी-भेर्यादितरङ्गिणीततिभि
आप्यायित-निजभौतिककायां
चन्द्र-सूर्याङ्कित-राष्ट्रध्वजविराजितां
वन्दे मातरं नेपालपुण्यभुवम् ॥२॥

अध्यर्धशतद्वयवर्षगणतोऽद्य पर्यन्तं
दशभिः शाहवंश्य-जननायकैः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रारब्धसर्वाङ्गीणसमुन्नतिं
विकासप्रिय-वीरेन्द्रभूपप्रसाधितसर्वाङ्गां
वन्दे मातरं नेपालपुण्यभुवम् ॥३॥

कदाप्यसोढपरपदप्रक्षेपैः
कूटनीतावयोधने च प्रख्यातिमद्भिः
वीरतमैर्निजतनयैरनादिकालतो
रक्षित-निजस्वातन्त्र्यां
वन्दे मातरं नेपालपुण्यभुवम् ॥४॥

उत्तुङ्गहिमशिखरिशिखरेभ्यो
ऽनवरतं निर्बाधं प्रवहद्भिः ।
हिमसंहति-शिशिरतमैः स्वजलप्रवाहैः
सञ्जीवितानेकजीवनिकायां
वन्दे मातरं नेपालपुण्यभुवम् ॥५॥

गन्धमृग-चमरी-वराह-गजेन्द्र मृगेन्द्रादीन् वन्यान्
गो-महिष-मेषाज-शूकर-कुक्कुरादीन् ग्राम्यांश्च
नर-वानरैः सह निर्विकल्प-निष्पक्षपातं च
भोज्यदामेन पुष्णन्तीं
वन्दे मातरं नेपालपुण्यभुवम् ॥६॥

सत्स्वपि निजगर्भेऽनन्ताकरेषु
ज्ञानाभावे तदुपयोगेऽक्षमाम् ।
किन्त्वधुना प्रारब्धोद्योगां
विलोक्य निजसन्ततिविस्मेरमुखीं
वन्दे मातरं नेपालपुण्यभुवम् ॥७॥

स्मारं स्मारं विख्यातिमतां याज्ञवल्क्य-जनक-
बुद्धादीनां स्वपूर्वसुतानां स्वनामधन्यानाम् ।
तत्कोटावागच्छतोऽपरान् तनयानभीप्सन्तीं
वन्दे मातरं नेपालपुण्यभुवम् ॥८॥

दक्षिणतोऽनन्तसैन्यशक्तिमद्भ्यां
नयशालिभ्यां मुगलगोरण्डाभ्याम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्तरतश्चीनसम्राजाऽतिसामर्थ्यभाजां
जिघृक्षितामपि बलवत्सुतपराक्रमरक्षितां
वन्दे मातरं नेपालपुण्यभुवम् ॥९॥

पृथ्वीवराहाऽमरसिंहवीरबलभद्रादीनां
वीर्योत्कटानां नीतिमतां निजतनयानाम् ।
परैरनभिभवनीयेन प्रबलेन पराक्रमेण
चिरकालतो रक्षितनिजस्वातन्त्र्यां
वन्दे मातरं नेपालपुण्यभुवम् ॥१०॥

विविध-रोगनिवारिका: स्वयं स्नेहेर्न प्रसादीकृता
आयुष्या ओषधीरज्ञानवशात् पूर्वमनुपयुज्या-
ऽधुना प्रारब्धोद्योगां निजसन्ततिमवलोक्य प्रसीदन्तीं
वन्दे मातरं नेपालपुण्यभुवम् ॥११॥

विविधानां धातूनां शिलादीनां चाकारान् गर्भे
विविधौषधीरनेकप्रकाराञ्जलप्रवाहाम् ।
नानाविधान्यरण्यानि च बहिर्भागेऽनवरतं धारयन्तीम्
तदुपयोगक्षमाया बुद्धेर्विद्याया जागरूकतायाश्च
स्वसन्ततौ विकासं समीहमानां
वन्दे मातरं नेपालपुण्यभुवम् ॥१२॥

●

विनम्रं नमामि

राजेश्वरदेवकोटा

राष्ट्रस्यार्थे जीविता ये च सन्ति
देवास्ते मे तान् विनम्रं नमामि ।
पुष्पं पत्रं मदीयं यदस्ति
सर्वं तत्स्यात् पादपद्मेषु तेषाम् ।

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अराजकता

डा.टीकाराम पन्थी, गुल्मीमण्डलस्थः

आन्दोलयञ्जयतु संस्कृतमात्मशैल्या-
मान्दोलयन्ति जनताधिभुवोऽधुनापि ।
आन्दोलनद्वयमिदं तुलयन्त आहु-
र्निमित्सु तत् प्रथममन्त्यमिदं विकारि ॥१॥

संसदेवाऽशुचिः स्याच्चेत् शुचित्त्वं क्व नु मृग्यताम् ।
अमेध्ये मुक्तिक्षेत्रे हि क्व मेध्यं गण्डकीजलम् ॥२॥
विधिनैव विधित्सन्ति सांसदाः कलहायिताः
प्रातिनिध्याभिमानः किं दूरे तेषां पलायितः ॥३॥

भिन्दन्ति सांसदा उग्रावरणान् पुरमार्गगान् ।
अवलोक्य तदाचारं लज्जन्ते मतदायिनः ॥४॥
आपणानथ यानानि सर्वकर्माणि सांसदाः
अवरुन्धन्ति हा ! हन्त ! प्रातिनिध्यं धरन्त्यमी ॥५॥
चाइनासाउथो वेष्टोऽतिरुष्टो लाउडां प्रति
लाउडा-लाउडेत्येवं रटमानानलाज्जयत् ॥६॥

व्याजाल्लब्ध्वा वयमिह समे लाउडाकाण्डमेकं
संलग्नाः स्मो लडयितुमरीन् मेलिताः षट् प्रवर्गाः ।
हन्तायाते सपदि पुरतश्चाइनासाउथे नो
नास्य ष्ठ्यूतिर्न च निगरणं तप्तदुग्धायितस्य ॥७॥

येषां लब्ध्वा मतमिह वयं सांसदा नायकाः स्मो
रुद्ध्वा कार्यं सकलविषये राजकीयं तथाऽन्यत् ।
तानेवाहो विनतशिरसो नागरान् दुःखयामो
धिग् नो लज्जां जहत इतरानीक्षमाणानरातीन् ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विपिनाश्रयिणोऽपजघ्नवो
गवलानां प्रकृतिं दिधीर्षवः
जगला गजलैर्निरर्गलाः
सुजनाञ्जङ्घ्नति हा ! निरागसः ॥९॥
प्रतिमण्डलमेव प्रायशो
विदधन्मण्डल केन्द्रशासनम्
ननु खण्डितराष्ट्रसीमितो
विषयो राष्ट्रियशास्तिमाश्रितः ॥१०॥
न हि राजनयोऽस्ति निर्मलो
न पुनर्निर्भयमासते जनाः ।
नररूपधरैः किमासुरै
र्नयपालो भयपाल आस्थितः ॥११॥

किं वा प्राप्तो जनादेशः पञ्चवार्षिकशासने ?
किं वा महावरं प्रादाद् वामदेवो महानटः ? ॥१२॥
भिद्यन्ते भ्रातरो ग्राम्या लुण्ठन्तीति जनश्रुतिम्
चारितार्थां प्रकुर्वन्ति सत्तारूढदलाधिपाः ॥१३॥

सहसाऽऽक्रमितुं समुद्यता
अनुजाः स्वीयदलाधिनायकम्
निपतन्ति विपक्षपादयोः ।
क्व नु मृग्येत ततो विडम्बना ? ॥१४॥

प्रवरोऽधिप आश्रितैः स्वकै
युववृन्दप्रभुभिर्नमस्कृततः
पदमध्युषितं सुहृद्वरं
वदतश्च्यावयितुं प्रयस्यति ॥१५॥
दलनेतरि पातिते पदाद्
यतमानैः स्वदलानुजैरहम्
भवितास्म्यधिशासको महान्
इति घोषोऽपि विडम्बितः किमु ?॥१६॥
स्वीयामन्यां परिषदमरां मन्त्रिणां कर्तुकामा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैरायन्ते स्वदलघटकाः सांसदा मन्त्रिवर्यैः ।
उच्चान् मञ्चान् मृगयितुमना युध्यते नेतृवर्गः
खण्डानस्थ्नः स्वदयितुमना युध्यते श्वानवर्गः ॥१७॥
प्राप्ता बाल्यात् स्वदलमिलिताः शिक्षिता ये सुनीतिं
याच्यो मन्त्रिप्रवर इह तैस्त्यागपत्रं विलज्जैः ।
याच्ञा धर्मो भवति भवतां याचकानामदानं
धर्मो मे स्यादिति निगदता लज्जितास्ते विलज्जाः ॥१८॥

विदलां विदलय्य पद्धतिं
सदला साऽऽबलिता बलेन नः ।
विकलामधुना विलोक्य तां
वयमेवाानुभवाम आपदम् ॥१९॥

नूनं शण्ढसमास्कन्दे वत्सानां स्याद् विमर्दनम् ।
परिवृढसमास्कन्दे नागराणां विमर्दनम् ॥२०॥
न राष्ट्रमुख्या न च शासनाधिपा न सांसदा नापि च मण्डलेश्वराः ।
नैपालकान्नः प्रभवन्ति रक्षितुं बन्दीकृतान् सर्वत आततायिभिः ॥२१॥

हे रामचन्द्र ! वयमद्य भृशं विपन्नाः

ऋष्यशृङ्गः

हे राम ! रामनवमीदिवसे पवित्रे
स्मृत्वा भवन्तमुपवासपरोऽस्मि नाथ !
सत्यं ब्रवीमि समयेन हि जानकीशः
मत्क्रन्दनं किमु शृणोति भवान् सधैर्यः ॥१॥

अयोध्याया उदग्भागे सरयूत्सप्रदेशके
ऐरावतीतटोद्देशमाश्रिताः प्रायशस्तथा ।
अन्यत्रापि स्थिता हन्त ! हन्यन्ते सरला जनाः
आततायिभिराक्रम्य प्रदेशेऽस्मिन्नराजके ॥२३॥

कार्यालयेषु गेहेषु विद्यामन्दिरवर्त्मसु
अकस्मादेव हन्यन्ते शर्शरीकैरमन्तवः ।
आततायिभिराक्रान्तान् म्लायमानाननाथकान्
त्वं न चित्रीयसे राम दृष्ट्वाऽस्मान् क्रन्दतः कथम् ? ॥४-५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्लभा अत्र वाल्मीकिवसिष्ठव्यासवादिनः ।
सुलभा भगवन् माओमार्क्सलेनिनवादिनः ॥६॥
न सन्ति मिथिला क्षेत्रे साम्प्रतं ब्रह्मवादिनः ।
जनतां घातुकास्तत्र हिण्डन्ते ब्रह्मघातिनः ॥७॥

बहुभिर्वपुसां समपर्णा-
दुदिता या जनतन्त्रपद्धतिः,
विवशाः खलु नागरा हि तां
प्रणयन्तोऽपि गृहाँस्त्यजन्त्यहो ! ॥८॥

नरनैर्ऋतलुण्ठिता नरा
निरयन्ते निरमायितालयान् ।
अहिना हि निलीनमेढकै–
र्निगृहीते सृतिरस्ति निर्गतिः ॥९॥

सुजना जनतन्त्रपद्धतौ
स्वतनूः पातुमहो नृशंसतः
प्रविशाय जनान् प्रियान् गृहान्
विवशा हा प्रविशन्ति भारतम् ॥१०॥

भिक्षामहेऽवतारं ते मानवादर्शदर्शिनः
निवसेम कथं नाथ ! प्रदेशेऽस्मिन्नराजके ॥११॥

समीक्ष्यतां जनस्थितिः समैरपीह सांसदै–
र्विचिन्त्यतां स्वराष्ट्रियस्थितिर्हि मान्यमन्त्रिभिः ।
म्रियेमहीह घातुकप्रहारतो निरागसः
करोतु किन्नु लोकतन्त्रपद्धतिर्मृते जने ॥१२॥

स्वर्णस्तेयरक्तपारपत्रोत्कोचपजेरकैः
रमेरन्नायका रामराज्यमन्वर्थकं ननु ॥१३॥
भ्रामं भ्रामं कदुत्कोचं पीवरा यदि शासकाः
रामराज्यं क्व मृग्यामो कामराज्ये स्थिता वयम् ॥१४॥

सांसदः पदलाभार्थं नृणां मतानि याचितुम्
स्वकिङ्करा हनूमन्तः प्रेष्यन्ते पटुनेतृभिः ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रभूणां निजभुजिष्या दूराश्च जनमानसात्
प्रेषिता मतयाञ्चायै नमस्यन्तेऽवशैर्जनैः ॥१६॥

लब्ध्वा मतानि जेतारो दरिद्रशुष्कवासिनाम्
सांसदा राजधानीस्था विस्मरन्ति मतप्रदान् '१७॥
सर्वतो भद्ररूपाणि हर्म्याणि काष्ठमण्डपे
निर्मीयन्ते परस्कोटिमुद्राभिर्मान्यनेतृभिः ॥१८॥

हे रामचन्द्र वयमद्य भृशं विपन्ना
विक्रीय भूमिभवनं ननु शुल्कहेतोः
खिष्टीयशिक्षणगृहेषु शिशून् निदध्मो
डयाडी ममीति रटनाय नुदामहे तान् ॥१९॥

क्रीणन्ति चेशुमतविस्तृतये नियुक्ता
आर्यान्वयाप्तजनुषो हि जनान् दरिद्रान् ।
ईदृग्गभीरगतिचिन्तनयोत्सुकः को
नेता दलेन निषितोऽन्यविधो भवेद् वा ॥२०॥

हे जानकी प्रिय ! कथं तनवोऽवनेया
धर्मः कथं दशरथात्मज ! रक्षणीयम् ।
नाराजकं जनपदं जनताऽधितिष्ठे-
देतन्न वेत्सि भगवन् ! क्व गतोऽसि नाथः ! ॥२१॥

शाधि प्रभो ! पशुपतिं पशुरक्षणाय
घात्या वयं पशव एव हि मात्स्यनीत्या ।
मर्यादया जगति विश्रुतकीर्तिराप्तो
नूनं भवानवतु नो निदधत् सुराज्ये ॥२२॥
आतङ्कनीतिरपयातु नृशंसकेभ्य,
उत्कोचरीतिरपयातु च शासकेभ्यः ।
सौराज्यमेतु जनतेति प्रधानमन्त्रि–
संभाषणं फलितपुष्पितमस्तु देशे ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुखं मलीनं ननु तेऽस्ति वाग्वती

प्रा.डा.ऋषिरामपोखरेल:

पुरा मुरारेर्मृगराजरूप-मुखाद्विनिर्गत्य सुराँस्तृडार्तान्
आकाशगङ्गेव धरामुपेत्य मृगेन्द्रशैले त्वमतर्पयोदैः ॥१॥
ततः क्रमात्सुन्दरशैलशीर्षे श्रीसुन्दरीदेव्याधिपुष्करिण्याः ।
स्वरूपमादाय तृषातुरस्य श्रीकान्तिपुर्या जनजीवनस्य ॥२॥

सन्तर्पणाज्जीवनदानपुण्यं त्वमर्जयित्वा चालितासि भूयः ।
असाद्य तां नागमती जवेन शिलां सलीलं सलिलैर्विदीर्य ॥३॥
प्राप्तासि शैलेश्वरनिर्झरस्य संयोगमासाद्य सहस्रधाराम् ।
जातासि यज्जेष्ठसिते दशभ्यां स्नानेन गंगा दशपापनाशा ॥४॥

ततश्चलन्ती गणनाथघट्टं निर्माय याता तदधो वहन्ती
तत्सेवनाज्जातगृहाप्तपुत्रो दासस्तुलस्या खलु सत्यकोऽभूत् ॥५॥
संसेव्य सर्वो घटते मनोरथो यस्मादिहार्थं खलुलोकसिद्धम्
तदुच्यते श्रीघटको गणेशो योऽन्वर्थनामाऽजनि लोकसिद्धः ॥६॥

तदत्र सन्तो निवसन्ति यत्र सानन्दमानन्दमुखा रमन्तः ।
मज्वाभिधेयान्वितमन्जुघोषस्तथा महाकालचितासमेतम् ॥७॥
ततः परस्तात् प्रहितं सुसिद्धं प्रशोधितं पेयजलं जनेभ्यः ।
श्रीभारतीयादिह मित्रदेशाद् प्रधानमन्त्रित्वमुपेत्य गान्धी ॥८॥

यदिन्दिरोद्घाट्य समर्प्य चापः सुयोग्यपुत्रस्य सुयोग्यपुत्री ।
ज़गाम तस्मादपि निम्नभागं रामेश्वरं घट्टमुपेत्य गङ्गा ॥९॥
तत्क्षेत्रजानां गतजीवनानां विमुक्तये तत्र चिताग्निभूतम्
आदाय तद्भस्म समुद्रसञ्ज्ञां गङ्गां प्रणेतुं त्वरितेव यान्ती ॥१०॥

श्रीवाग्वती त्वं तदधो वहन्ती प्राप्तासि काकेश्वरपादजाताम् ।
नाम्ना महादेवमतीं पवित्रामासाद्य ढक्कालचितासमीपम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततश्चलन्ती त्वमभूः पवित्रा सुसङ्गता मृत्युमतीं सुसेवाम् ।
सीम्नाऽऽलपोटाभिधभद्रवासग्रामौ धयन्ती मरुवाखेरष्ठाम् ॥१२॥

तस्मात्प्रदेशादपिनिम्नगा त्वमात्रेयगोत्रद्विजवासपूतम् ।
यस्मादनेके रमणीयकृत्याः सेवापरा ज्ञानधनप्रधानाः ॥१३॥
वेदप्रमाणा ऋषितुल्यनामा द्विजा अभूवन्नयपालरत्ना ।
ततः परस्तादथ वाग्वतीत्वं प्राप्तासि हत्या शतमोचनाख्यम् ॥१४॥

तीर्थन्ततोऽधस्त्वमसि प्रसिद्धा भूयो वहन्त्युत्तरवाहिनीति ।
यदुत्तरन्तीर्थमिदं भवत्या जगत्प्रसिद्धं खलु कान्तिपुर्याः ॥१५॥
गलेश्वरो वासुकिब्रह्मचारी तथा षडानन्दगुरुश्च तेपे ।
पुर्युत्तरःश्रीशिवसंज्ञकोऽथ बाबातुलस्यभिधसिद्धसङ्घाः॥१६॥

तप्त्वा तपःसिद्धिमुपागतास्ते समाधिमस्थाय गुहान्तरस्थाः ।
जगत्प्रसिद्धा नयपालसूनवो बभूवुरध्यात्मरविप्रकाशाः ॥१७॥
श्रीकान्तिपूर्वोत्तरभैरवाख्यं संरक्षकं कान्तिपुरस्य याता ।
तदत्रधान्याचलपूजनादिसम्पत्तिधान्यान्नजनप्रदानैः॥१८॥

सेतुं विनिर्माय जनैः सुरम्यं पञ्चास्यवातात्मजनाथभक्तैः ।
तत्रापि धर्मेण विर्निमितेन त्वदीयतीर्थोत्तरवाहिनीति ॥१९॥
स्नानार्थत्तां मोक्षसुखं वितीर्य तै गौरिघट्टं समधिश्रिताभूः ।
तत्स्नानदानैरथदर्शनेन किरातलिङ्गेश्वरशङ्करस्य ॥२०॥

भक्तानसंख्यानथ पावयन्ती श्रीसूर्यघट्टं तदधोगतासि ।
ततः समासाद्यशुभार्यघट्टं जलेन सम्प्लाव्य शवं पुनाना ॥२१॥
आराध्य भूतपतिं महेशं रूपं सदा पाशुपतं श्रयन्तम् ।
श्रीरामघट्टं शवघट्टमाराच्छ्रीराजराजेश्वरघट्टजातम् ।२२॥

सम्पूय यातासि शिवे मिलित्वा श्रीशंखमूलं मनमत्तया त्वम् ।
समुद्धृतावेदगणः पुरा तु मत्स्यावतारेण मुरारिणेति ॥२३॥
व्यापाद्य शंखासुरदैत्यराजं यच्छंखरत्नमूलं प्रवदनति सन्तः ।
तत्तीर्थराजं जगति प्रसिद्धं यद् वैष्णवं धाम वदन्ति लोकाः ।१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततस्त्वधस्ते त्रिपुरेश्वराख्यं घट्टं समायाति जगत्प्रसिद्धम् ।
तत्रेक्षुमत्या मिलितासि देवी प्रयागरूपा सततं प्रणम्या ॥२५॥
तस्मादधस्ते तञ्जनिसूनुघट्टं श्रीभैरवं यत्पचलीति नाम ।
तस्मादधो वागवतिटेकुघट्टं संप्राप्तवत्या तव दीव्यरूपम् ॥२६॥

श्रीविष्णुमत्या मिलितं विशिष्टं शास्त्रैः प्रशस्तं कलिकल्मषघ्नम् ।
तत्स्नानसन्तर्पणपितृकार्यैर्ददासि भुक्तिं भुवि मोक्षमन्ते ॥२७॥
श्रीवाग्वती त्वं तदनुसृतासि श्रीसुन्दरीघट्टमतिप्रशान्तम् ।
ततस्तु तेऽतीव पवित्रतीर्थचर्चा जले चोर्वरचोभराख्ये ॥२८॥

चोभारवैनायक तीर्थतस्ते तीर्थं गतं किं भुवि वर्णनीयम् ।
तदद्यते वाग्मतितीर्थसारं जलं पवित्रं क्व गतं वतालम् ॥२९॥
किमद्य चिन्ता न तवास्ति मातः स्नानाय पानाय च नासि योग्या ।
ये ते पवित्रं जलमत्र मातर्विदूषयन्तो मलमूत्रपातैः ॥३०॥

कुर्वन्त्यपेयं किमुतान्न हंसीत्यहो चरित्रं तव चित्रमस्ति ।
किंवात्र तान्दूषकदेहभाजो पुनासि वाभिर्ननु तर्कयामः ॥३१॥
यद् वा प्रसुप्तः सलिले मुरारिर्लोकश्च मां दूषयतीह नित्यम् ।
यद् वा मलिना मललीनसत्वान्नालैकृष्णमुखासि मातः ॥३२॥

कस्मान् मलीना किमिहात्रनीतमिन्द्रावतीवारिप्रतीक्षणेन ।
नितान्तचिन्तामलितान्तरात्म दुःखं जानानामवलोकयन्ती ॥३३॥
तद्दुःखखेदेन मलेन मातर्मनः शरीरं किमु कृष्णरूपम् ।
यद्वा मुरारिर्नितरां प्रसुप्तो नीरेष्वनीरे त्विति चिन्तयन्ती ॥३४॥

मुखं मलीनं ननु तेऽस्ति वाग्मतीत्येव मनो नोऽस्ति वितर्कमानम् ।
यद्वास्तु तद्वास्तु प्रसीद मातः पयो विधायऽऽशुसुधासमेतैः ॥३५॥
सन्तर्प्य सर्वान् वत कान्तिपुर्याः पापात्मनां तज्जलदूषकानाम् ।
चित्तं विधूयासु त्वमिन्द्रवत्या जलेन संतर्पय प्रार्थयामः ॥३६॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदमहिमा

प्रा. शिवहरिमरहट्टा
गोरखामण्डलस्थः

अत्यासक्तिर्भवविषयिणी न्यूनरूपा विधेया
कार्याकार्यैः प्रतिदिनकृतैर्वीक्ष्य स्वीयात्मतत्त्वम् ।
एनं सारं वदति निखिलं दर्शनं पूर्वजातम्
रिक्तं तत् तद् वचनमधुना प्रार्थनीयः पदात्मा ॥१॥

मन्त्री सेनाधिपतिसचिवौ सांसदो राजदूतः
न्यायाधीशः कुलपतिपदं राजनीतेस्तु नेता ।
किं वा सम्पादकप्रभृतयः पत्रकारास्तथान्यत्
प्रोच्चं नीचं पदमधिगतं को विहातुं समर्थः ? ॥२॥

गीतापाठेऽभिरुचिरसकृन्नैकसंलब्धकीर्तिः
नित्यं सेनाधिकृतपुरुषैर्दत्तहस्तावलम्बः ।
एवं यष्टेर्बलमपि दृढं पादभावेन चास्ति
सोऽयं कृष्णः सजलनयनो मुक्तिकाले पदस्य । ।३॥

का वार्त्तोच्चैःपदविषयिणी द्वारपालोऽपि सद्यः
हुङ्कारेण ग्रसति विबुधान् दीप्तसिंहायमानः ।
याता न्यायालयमपि पदासक्तिसम्मर्दिता ये
किं तत्संस्था प्रमुखमभितो दासदृष्ट्या न प्रापन् ? ॥४॥

यन्नो भाव्यं भवति बहुधा दाससंवृद्धिहेतोः
यद् यद् भाव्यं न भवति च तत् स्वार्थभ्रंशादिहेतोः ।
गर्तं याते स्वकुलसदने मानसं नास्ति खिन्नं
घोरे जाले दलपदगते नैव लज्जा विवेकः ॥५॥

संसत्सत्रे सुविदितमविश्वासविश्वासग्रस्ते
पञ्चामात्याः सकुशलमहो ! थाइदेशं प्रयाताः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं मेषा इव जनमुखाः सांसदा मूल्यभाजः
एतत्सर्वं पदगतचमत्कारमेवातनोति ॥६॥

न्यायाधीशा अपि निजवयः सत्वरं शोधयन्ति
केचित् काव्यं प्रणतिततिभिः स्वार्थमालेखयन्ति ।
कः संकोचो निशि परवधू-गेहप्राप्तौ बलस्य
सर्वञ्चैतत् पदसदुपयोगस्य चिन्हं वदेत् कः ?॥७॥

प्राप्तं प्रोच्चं पदमपि कथं यत्नतो रक्षणीयं
मत्वा नेतुश्चयनविषये प्रत्तहस्ताक्षराणाम् ।
उच्छेदार्थं गतिरुभयतो माननीयस्य कस्य ?
वृत्तान्तोऽयं किमु पदजं गौरवं नो तनोति ॥८॥

कारागारे जनप्रतिनिधीन् न्यस्य सत्ताधिरूढा
'उच्चं प्रोच्चं पदमुपलभेयम्' दृशा ते कृतान्ताः ।
संसारेऽस्मिन् मुसरफनिभाः सन्त्यनेके मनुष्या
वक्तुं शक्तो नहि पदगतं तन्महत्त्वन्तु शेषः ॥९॥

पूर्वं नैकं पदमधिगतः संघसंस्थाविधाय
साभापत्यं यदि नहि महामात्यमङ्गीकरोति ।
यद्वा तद्वा भवतु विगतं प्रेरकं वृत्तजातं
नो चिन्ता वा नच भयमहो ! सा पदासक्तिलीला ! ॥१०॥

ज्ञानैः किं स्यात् किमु च तपसा छद्मभावादिहेतो-
लभ्यं वित्तं पदमपि प्रियं नेतृसन्देश एषः ।
इत्थं चिन्तामयगतिततौ किं महत्त्वं जनानां
किं भो भिक्षाधनबलमिदं राष्ट्रमुत्कर्षमेति ? ॥११॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लाउडापर्व

शिष्टाचारप्रमाणं समुचितमथवा बीजमैश्वर्यराशेः
शक्तेः स्रोतस्तथैवं निखिलजनमनःस्पन्दने हेतुभूतम् ।
किं वा यात्रा जनानां भवतु च सुखदा किं नवाऽन्यत्प्रहेतो-
र्नीतं राष्ट्रे विमानं निरुपममिव तच्चर्चितं यत्र तत्र ॥१॥

सत्ताप्राप्तेर्निदानं सुलभमुपगतं मर्त्यदेवीप्रभावात्
त्यक्तुं मन्त्रिप्रधानं सुकरमधिगतं साधनं तत् पुरस्तात् ।
मत्वा ताम्बूलवृद्धा अपि स्मितवदनाः सन्ति सार्धं सहायैः
कान्या वार्त्ता विमानं व्यथयति नहि किं तान् सपक्षान् विपक्षान् ? ॥२॥

पार्वत्याः शुक्लपक्षे किमु घनतमसां कृष्णपक्षेऽपि नो किम् ?
ते तद्यानं विना किं न कमपि रुचिरं मार्गमासादयन्ति ?
किं सारोपे विपक्षे, हचवसरशतके शासनाद् दृप्तभावे
सत्तापक्षेऽपि भाति प्रथितबलयुतं राष्ट्रकर्षं विमानम् ॥३॥

भ्रष्टाचारप्रतीके हतविधिनियमे ख्यात लौडाविमाने
संसिद्धे भ्रष्टचक्रं भवति च शिथिलं त्रास उत्कर्षमेति ।
इत्थं भावं विशालं स्फुटमभिदधतां राजनीतेर्दलानाम्
नेतारो निगृहीताः पथि पथि नितरां यानध्याने सुसक्ताः ॥४॥

संसद्मूल्यन्तु यातं न किमपि कृतवान् ऊनविंशोऽधिवेशः
रथ्यासंघर्षकार्ये कतिपयदिवसाः सांसदानाञ्च याताः ।
नेपालस्यावरोधे दिवसत्रितयके यानचर्चां विहाय
नेतॄणां ध्यानदृष्टिः क्व महति विषये किं सगर्वं गताऽसीत् ?॥५॥

विख्यातं तद् विमानं नहि श्रुतिमधुरं नेत्रसंमोहकारि
मैवं मैत्रीफलं वा नभवति जनतादुःखदारिद्र्यहारि ।
यस्यार्थं दूरभाषे प्रवचननिवहे लेखने भाषणे च
यो राशिः कर्गजादेर्व्ययमनुसरतः पर्वताकारमेति ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्चर्चानाम्नि राष्ट्रे प्रतिदिवसमहो ! कोटिशो रूप्यकाणि
नाशं यातानि चैवं कतिपयविषयेष्वर्थस्रोतोऽवरुद्धम् ।
तैस्तैरर्थप्रवाहैः सुगमजनपदे योजना काचिदन्या
शीघ्रं संचाल्यते चेत् श्रमिकसुखयुतं राष्ट्रमुत्कर्षमीयात् ॥७॥

उपचारशतेऽपि केचन यमलोकातिथयो भवन्ति हि
कति मृत्युपथं गता न किं पथिरोधे ह्युपचारकेऽसति ॥८॥

या लेखासमितिः संसत्-शक्तिसामर्थ्यविग्रहा
लाउडाकथाप्रकाशे तु सूत्रधारायते चिरम् ॥९॥

धन्यमस्ति विमानं तद् राष्ट्रे सर्वत्र राजते
सुखसत्ताभिलाषो हि दीप्तिसागरकारणम् ॥१०॥

लाउडापर्वणि नेतारो ये चान्ये ख्यातकीर्तयः
तान् सदा नाभिनन्दन्ति किं ये विपथगामिनः ॥११॥

शिवगंगा (सेउती) प्रसङ्ग :

टीकाप्रसाद शर्मा वस्ती,
धरानक्षेत्रस्थः

एषा 'शिवजटा' गंगा यत्र त्रैलोक्यपावनी
विराजते भूतगुरोर्जटायां भूषणायिता ॥१॥
महिमानं वर्णयितुं न मानं मम लेखनी
त्रस्यति, लज्जते नूनं विभाव्यास्याः परं यशः ॥२॥

तथापि स्थितिरस्यास्तु यथा दृष्टा तथैव सा
संक्षेपेणैव यत् किञ्चित् प्रस्तौति विदुषां पुरः ॥३॥
अधुना सेवती गंगा शशिशेखरभूषणा
क्षीणा न शोभते हन्त ! युगधर्मेण न्यक्कृता ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रस्तराणां प्रभूतत्त्वं पर्वतानां च संगमः
भात्येव किन्तु वृक्षाणां सा शोभा विलयं गता ॥५॥
वृक्षाणां कर्त्तनं कृत्वा ना धनार्जनतत्परः
तेनैषा विधवा मुण्डकेशशून्यायिता धरा ॥६॥

वनस्पतीनां वृक्षाणां फलानां सम्पदं महत्
तथा लता-प्रतानानां समग्रं क्वापि निर्गतम् ॥७॥
न पुष्पकेषु झङ्कारो भ्रमराणां मनस्विनाम् ।
पुत्तलीनां न सम्पातो दृश्यते लोचनाऽमृतम् ॥८॥

नाऽऽलोक्यन्ते खगाः क्वापि तथैव मधुमक्षिकाः
मकरन्दपराः सौम्यास्तथाऽन्येपि विहङ्गमाः ॥९॥
हरीतिमा प्रविसृता मनसो मोददायिनी
दूरमेव गता क्वापि न सन्ति वनचारिणः ॥१०॥

गतश्रीकाऽसि भोः 'स्यौति' ! क्षीणसत्त्वा निरन्तरम्
क्षीयमाणाऽस्ति मलिना कच्चरी तीर शाटिका ॥११॥
अनच्छाऽऽलापविरता मलिना क्षीण-जीवना
हहहा !! सेवती याति लुण्ठितेव मनस्विनी ॥१२॥

अत्रत्या प्रकृतिः सर्वा विकृता कुटिलेक्षणैः
क्व यातु शरणं साध्वी, गतमाना, हृतस्वका ॥१३॥
नत्वेतत् शोभनं मन्ये, परिणामो भयावहः
धनगृध्नोस्तु तस्यैव मानवस्य कृते भवेत् ॥१४॥

प्रकृतिर्नैव प्रकृतेः प्रयोजनपरा क्वचित्
सर्वेषां प्राणिनां माता प्रयोजनपरा च सा ॥१५॥
सर्वोऽपि प्राणिनिचयो विना भेदं सुतो यतः
सर्वेषामेव सा माता ममता-समतावती ॥१६॥

तस्माद् भो मानवा ! विश्वहितमाम्नरत स्वयम्
मातरं प्रकृतिं मा मा परिपीडयताऽनिशम् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयि स्यौति ! शुभे ! गंगे ! चाधुनाऽपि तव प्रियाः
सन्त्येव भक्तास्तान् दृष्टा ब्रज आशावती भव ॥१८॥

समुच्छलन्ती सोद्गारं यथापूर्वं मनस्विनी
सञ्जीवनी गीतवती ब्रजदेवी ! प्रहर्षिणी ॥१९॥
पिण्डेश्वरस्य शिरसि खेलन्ती विमलोदका
ब्रज भद्रे ! शिवे ! गंगे । पावयन्त्यखिलं जगत् ॥२०॥

एकं चित्रं वन्य-समाजस्य

प्रा.डा. माधवभट्टराई
खोटाङमण्डलस्थः

वृकाः शृगाला ऋक्षा व्याघ्रा
वने वसन्ति यत्र तत्र ।
स्वं स्वं स्थानमायत्तीकृत्य
यद्यपि वशगाः प्रारब्धस्य ॥१॥

जन्तव एते युध्यन्ति परस्परं
प्रायो बलवान् दुर्बलमत्ति ।
परं पुनर्विरामः पुनर्युध्दं
मुहुर्मुहुरेतेषां कानने भवत्येव ॥२॥
फुत्कुर्वन्ति कतिचन निजप्रभुत्वाय
दुत्कुर्वन्ति कतिपये परसाम्राज्यविध्वंसाय ।
हुङ्कुर्वन्ति केचन स्वशक्तिप्रख्यापनाय
पलायन्तेऽपि कतिचन निजजीवनसंरक्षणाद् ॥४॥

जन्तवोऽपि वदन्ति जनतन्त्रं प्रजातन्त्रं वा
किमुत राजतन्त्रमेकतन्त्रं चापि ते प्रतिपादयन्ति ।
तेऽपि याचन्ते स्वतन्त्रतां निजपूर्णाधिकारं वा
न कश्चिदपि क्षुद्रायते न्यूनायते वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परोक्षेऽकृत्यं ते कुर्वन्ति यत् तत्तु ते स्वकर्तव्यमेव वदन्ति ॥५॥

अधिकारं यदि लभते कश्चित्
प्रभाषते स सकलक्षमताम् ।
उपस्थिते कर्तव्यसमये
तृणमात्रमपि स न त्रोटयितुं क्षमते ॥६॥

यं सिद्धान्तं ते प्रतिपादयन्ति
केऽपि न तत्र भवन्ति प्रतिबद्धाः ।
अतो निजाधिकारकाले सकलाः
केवलं स्वानेव परिपूरयन्ति ॥७॥
ग्रीष्मवायुः प्रखरोऽवसरं लब्ध्वा
प्रकृति-महिलां भृशं निपीडयति ।
शिशिर-तुषारः पुनः कदाचित्
कोमला बाल-लतिकाः प्रकामं शोषयति ॥८॥

नहि कश्चिदत्र बलात्कारस्य पीडामपहरति
न चात्र कश्चित् कोमलबालानां शोषणं निवारयति ।
समये समयेऽत्र यः कोऽपि
दुर्बलतरमेवं परिपीडयति शोषयति च ॥९॥
यो हि नियमव्यवस्थायाः सूत्रधारो वर्तते
स एव प्रसारयति समाजे दुर्व्यवस्थाम् ।
यो न्यायासनमधितिष्ठति स एव करोति घोरमन्याय्यम् ।
वक्ति यश्च शुकवन्मानवतां हन्ति स एव तां श्येनवत् ।
अतो हि निगद्यते "यो रक्षकः स एव भक्षक" इति ॥१०॥

हिंस्रकपशुभिराक्रान्तः कश्चित् पथिको
वनेऽप्यशान्तो मनुजसंसदि यथा भ्रान्तः
कानने गहनेऽपि स भजते पुनर्भ्रान्तिम् ।
सैषा नियतिः सैषा प्रकृति-
र्विश्वस्य विश्व-विपिनस्य ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुष्कृतिदशकम्

अद्य देशे जनैः किं विचित्रं श्रुतम् ? सर्वतो वीक्षितं चेतसा निन्दितम् ।
संसदि स्थापिता येऽनुकार्या जनास्तेऽभवन् मानहीनाः कथं कर्मणा ॥१॥
संस्कृतिर्दूषिता दुष्कृतिर्भूषिता प्राज्ञता धिक्कृता मूढता स्वीकृता ।
धन्यता दुत्कृता हीनताऽऽविष्कृता किं कृतं नेतृभिः ? धिक्कृतिः स्वीकृता ॥२॥

रक्षका भक्षकाः सन्ति यत्र स्वयं मार्गनिर्देशका मार्गहीनाः कथम् ?
अग्रपूजापदे निन्दिताः स्थापिता वन्दनीया जना नीचतां प्रापिताः ॥३॥
भ्रष्टता दृश्यते पूजितानामिह शोषिताः पीडिता निर्धनाः सज्जनाः ।
नास्ति कश्चिज्जनो दुःखितोद्धारको भाषणे सेवकाः किन्तु सर्वे जनाः ॥४॥

लोक उद्दण्डतां यः करोति स्वयं संयतं शासनं वक्ति सैषोऽपरान् ।
तस्य देशे समाजे कुले वा कथं स्युर्जनाः संयताः कष्टहीनास्तथा ॥५॥
नास्ति चिन्ता समाजस्य देशस्य च चिन्तनं गेह-यानादिषु प्राप्यते ।
स्वोदरार्थे रता ये महान्तो मताः पीडिता आहतास्ते महद्भिर्हताः ॥६॥

मन्दिरे पूज्यता क्षीणतां यात्यहो ! व्यक्तिपूजा समन्ताद् दरीदृश्यते ।
योग्यता धूलिसाज्जायते सर्वतश्चाटुकारप्रवृत्तिर्भृशं वर्धते ॥७॥
संस्कृतं गहर्यते संस्कृतज्ञैरपि मातृभूस्त्यज्यते राष्ट्रभृत्यैरपि ।
तस्य देशस्य का स्याद् गतिः शोच्यतां दुर्गतिः केवलं सर्वतो दृश्यताम् ॥८॥

धूर्तता शस्यते प्राज्ञवर्गैरपि भ्रष्टताऽऽलम्ब्यते नेतृवर्यैरपि ।
उन्नतिः सम्भवेत् तस्य देशस्य का ? यत्र नीतिः स्वयं नीयतेऽधोगतिम् ॥९॥
धर्मरक्षां विहाय प्रबुद्धा जना यत्र धर्मान्तरं कारयन्ति स्वयम् ।
तस्य राष्ट्रस्य रक्षा कथं संभवेद् ? दूयते मानसं स्वाभिमानार्थिनाम् ॥१०॥

संक्षेपाद् दर्शितं चित्रं दशकेनोपलक्षितम् ।
निराशा त्यज्यतां किन्तु पीयतां संस्कृतामृतम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतम्

प्रा.डा. विष्णुप्रसादशर्मा देवकोटा,
गोरखामण्डलस्थः

नमो नेपालराष्ट्राय प्रकृत्या रङ्गभूमये ।
उमाशङ्करपादाब्जरेणुभिः पावितात्मने ॥१॥
सदैव राष्ट्रदेवाय पशुपाय च ते नमः ।
अज्ञानध्वान्तनाशाय ज्ञानपद्मविकासिने ॥२॥

स्मयमानमुखाम्भोजं दयमानदृगञ्चलम् ।
पार्वत्याः स्नेहसम्बद्धं नमामि लोकशङ्करम् ॥३॥
दुःखोपहतितप्ताय ज्ञानपद्मविकासिने ।
सौगताय नमो नित्यं नेपालसद्विभूतये ॥४॥

नेपालैक्यविधानाय नित्योद्योगविधायिने ।
राष्ट्रगौरवभूताय पृथ्वीनारायणाय च ॥५॥

विश्वे बेलायताख्योऽथ च महिमयुतो भाति नेपाल देशः,
याभ्यां सर्वत्र काले नहि समधिगतं पारतन्त्र्यं विनिन्द्यम् ।
गौराङ्गाणां हि देशोऽधिक-सुविधि-महाकूटनीतेः प्रभावात्
सूर्यो नास्तङ्गतोऽभूत् वयमविकसिताशिशक्षणादेरभावात् ॥६॥

देशे बाह्ये विकासे प्रभवतु परज-ज्ञानविज्ञानराशि
रन्तःस्थानां गुणानामथ तु जनचरित्रस्य लाभाय दक्षा ।
नैजी पारम्परीणा विलसतु सततं राष्ट्रवादप्रदा च
अस्मद्रक्तेन रक्ता प्रचलतु सततं संस्कृतं राष्ट्रशिक्षा ॥७॥

अस्मन्नैपालकानामथ च जनिभुवो ह्यस्य नेपालकस्य
गीर्वाणज्ञानराशिर्गुणनिधिमहितौ राजते लक्षणं स्वम् ।
तद्रक्षायै सदैवाध्ययन-मननकं संस्कृतस्याद्य नित्यम्
कर्तव्यं सर्ववैचारिकशुभमतये भाषिकीयोग्यतायै ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाले सन्त्यनेका जनपदविषये बद्धमूलाल्पभाषा ।
राष्ट्रे प्राप्तादरास्ता अथ च सुरगवीशब्दराशेस्तु जीव्याः ।
तासां सम्पत्तिहेतोरपि सकलजनैर्देववाक् सेवनीया
शाखापत्रादिपुष्ट्यै विटपितलजलासेकवत् सेकविज्ञैः ॥९॥
नेवाराद्याः स्वदेश्या बहुविधजनता-भाषिकाः कुल्यदेश्या-
स्तासाँ स्रोतः स्वरूपं विलसति सततं संस्कृतं वाङ्मयं नः ।
तस्यां हैम्यां हि नद्यां निजमतिविरहान्नष्टतायां गतायाम्
कुल्यानां शुष्कतायां जगति कृतत्वरायान्तु किं नैव दुःखम् ? ॥१०॥

नेयं भाषा मृता स्याद् बहुविधकविता-कामिनी-कान्ति-कान्ता,
वेदे शास्त्रे पुराणे स्मृतिषु कृतपदा बद्धमूला च विश्वे ।
सेयं येषां विचारात्मकदृशि मरणं याति वाचामभावात्
तेषां वाग्भिर्मृतानां वितरति सततं साधुशब्दामृतादीन् ॥११॥
सेयं सर्वस्य नित्यं सुवितरति मुदा धर्म-संस्कार-नीतिम्
विज्ञाने ज्ञानयुक्ते बहुविषयविधौ सूक्ष्मव्याख्यानदक्षा ।
सार्वानस्मान् सदैवाह्वयति जगति या आत्मवैशिष्ट्यगुह्यै
रक्ष्या सा प्राणतोऽपि प्रणिहितमनसा वर्धनीया च नित्यम् ॥१२॥

नेयं प्राच्यैव भाषा जनबलरहिता राजवेश्माऽनुरक्ता
रक्ता कामाभिभूतप्रणयपदगतायान्तु रम्याङ्गनायाम् ।
नैवं युक्ता तु निन्दा गुणनिधिसहिते ज्ञानविज्ञानराशौ
योग्ये कम्प्यूटराख्ये सुविहितपदके संस्कृते सर्वदक्षे ॥१३॥

नेपाले संस्कृतं नो निखिलगुणगणागारभूतो हिमालो
हैम्यो नद्यो विभिन्ना वनगिरिगहना कन्दरा सुन्दरास्या ।
भूमेर्भागत्रयत्वं नृपतिवरकृताधिष्ठितिः स्वस्य तन्त्र-
मुष्णीषं सर्वनैपालकशिरसि स्थितं लक्ष्म रक्ष्यं सदैव ॥१४॥

नेपाल्या एकतायामनियतदलतोऽनेकतायां गतायां
नैतिक्या ह्रासतायां प्रविचलनगतायाञ्च धर्मैकपद्याम् ।
अर्थाशौचेन राष्ट्रे निगलनगले प्रापिते नेतृवर्गे-
र्लेयं संस्कारजातं जनसुहितकरं संस्कृते वर्त्तमानम् ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाल्याः सभ्यताया निगमविटपितो निर्गतायाश्च यस्याः
मूलं देवादिसेव्यं गुणगणमहितं संस्कृतं संस्कृतेश्च ।
सेव्यं तत् सर्वकाले सुगतबुधवरेणापि शास्त्रे प्रयुक्तम्
सर्वेषां पूर्णतायै हृदयगततमो नाशनं भासनञ्च ॥१६॥
यन्त्रशालास्तदुत्पाद्यं प्रभूतं स्याद् गुणात्मकम् ।
क्रेता स्वदेशो नैव स्याद् विक्रेता तु सदैव हि ॥१७॥
परेभ्यः सहयोगः स्याद् देयोऽस्माभिरहर्निशम् ।
सहयोगो नैव लेयो निर्धनत्वेन कश्चन ॥१८॥

परोपकारिणः सर्वे धनिनो निर्धनेषु च ।
निर्धनाश्च सदैव स्युः सत्परिश्रमशालिनः ॥१९॥
संस्कृतं राष्ट्रसम्पत्तिर्गौरवं हिमश्रृङ्खला : ।
उन्नतानि हि तिष्ठन्ति अस्मानुद्बोधयन्ति च ॥२०॥

हिमालयाः पर्यटनस्य वर्धकाः
भागो गिरीणाञ्च फलस्य वर्धकः ।
समश्च काष्ठान्नविवर्धको भवेत्
एवं हि नेपालक उन्नतो भवेत् ॥२१॥
प्रवर्धतां नैतिकतासुधाततिः
समेधतामात्मधृतिर्यशस्करो ।
विवर्धतां कर्मठता शुभा मति-
र्महीयतां संस्कृतसंस्कृतौ रतिः ॥२२॥

प्रवर्त्ततां राष्ट्रियगौरवोन्नति-
र्विवर्धतां वैदिक-धर्म-संस्कृतिः ।
महीयतां प्रोन्नत-संस्कृत-स्थितिः
समेधतां प्राज्ञिककर्मसन्ततिः ॥२३॥
नेतारः सत्यनिष्ठाः स्युर्युवानः सन्तु कर्मठाः ।
यान्त्रिका वस्तुशिल्पज्ञा वृद्धास्तथ्यनिदर्शिनः ॥२४॥
इति तथ्यं विनिर्दिष्टं संस्कृतेन हि सर्वदा ।
अत एव हि विज्ञेयं स्वदेशोन्नतये सदा ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चित्करोत्येष देशः

देशोत्थानाभिनयनपटून् स्वार्थपूर्त्यै सतर्कान्
निन्द्योपायैः प्रतिनिधिसभाप्राप्तये लब्धकीर्त्तीन् ।
मन्त्रिप्राप्त्या विपुलधनतः क्रीतसौविध्यवस्तून्
दृष्टवा एतान् प्रतिनिधिजनान् चित्करोत्येष देशः ॥१॥

प्राधान्यं वै कृषिविषयकं किन्तु धान्यादिकं न,
प्राशस्त्ये वै हिमजलनिधेर्नास्ति विद्युत्प्रकाशः ।
रम्यो देशोऽटनरुचिमतां किन्तु नायान्ति तेऽत्र
एतान्ध्यात्वा दहनविषयान् चित्करोत्येष देशः ॥२॥

नेपालेऽपि प्रकृतिहितके लोकतन्त्रे प्रवृत्ते
संस्कारा नस्तदहितकरा एकतन्त्रानुकूलाः ।
व्यक्तेः स्वार्थौ भुजगसदृशो राष्ट्रस्वार्थं समत्ति
ध्यायं ध्यायं विमृशनविधौ चित्करोत्येष देशः ॥३॥

गौरी-गार्गी-भृकुटि-जनकैः ख्यातनामा स्वतन्त्रः
पृथ्वीत्याख्यैर्नरपतिवरैरेकतासूत्रनद्धः ।
वीरेन्द्राद्यै र्नरपतिवरैः पालितः शान्तिशीलः
माओवादाज्जनवधरताच्चित्करोत्येष देशः ॥४॥

कर्षं कर्षं निजभुजबलात् सस्य– सम्पादकानाम्
हर्षं हर्षं निजजनिभुवः शिल्पसम्पादकानाम् ।
ग्रामे ग्रामेऽप्यधिजनपदे व्यक्तिहत्यां विलोक्य
माओवादाज्जनवधरताच्चित्करोत्येष देशः ॥५॥

सर्वे भाग्ना निजभवनतो हन्यामानाश्च सन्तः
रिक्ता ग्रामा, अधिनगरकं नित्यशस्ते प्रयान्ति ।
रक्षाहेतून् प्रहरिनिवहान मार्यमाणान विलोक्य
माओवादाज्जनवधरताच्चित्करोत्येष देशः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रष्टाचारान्, दलविषयकान् कर्मरोधान्, विरोधान्
अन्तर्दल्यान् अपि दलगतान् शिल्पवैराग्यभावान् ।
वस्तूत्पत्तौ विगतमतिकान् सर्वव्यापारिवर्गान्
दर्शं दर्शम् अवनतदशां चित्करोत्येष देशः ॥७॥

दर्शं दर्शं सचिवनिवहान् योग्यतापत्रकेतॄन्
स्मारं स्मारं वयसि गलिते तन्नवीकारदक्षान् ।
ध्यायं ध्यायं पठनविषये चौर्यभावं जनेषु
कर्त्तव्यानां पदवलिततां चित्करोत्येष देशः ॥८॥

ध्यायं ध्यायं स्वशिरसि गतम् आधमर्ण्यस्य भारं
श्रावं श्रावं पथि पथि गतं लाउड-काण्ड-वृत्तम् ।
दर्शं दर्शं निखिलजनतां स्वावलम्बे विरक्ताम्
उत्कोचादेः सरलतरतां चित्करोत्येष देशः ॥९॥

सत्तासीनास्तृषितमनसः सर्वभावेन सत्ताम्
आश्लिष्यन्ति स्वजनसहिताः स्वार्थभावै रपूर्वाम् ।
सत्तावाहच्या अखिलसमये तत्पराभूतिकामा
ध्वंसोपायं दधति निखिलं चित्करोत्येष देशः ॥१०॥

देशोन्नत्यै श्रमविपुलता स्थायिता चापि तत्र
शिक्षादौ च स्तरगुणयुति र्वस्तुजातेऽपि सैव ।
अन्तर्दल्या अपि दलगतास्नेहशान्त्योश्च सत्ता,
स्याच्चेद्देशे झटिति गतिमद् भौतिकोत्थानमस्ति ॥११॥

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
 समेधतां राष्ट्रिय प्राज्ञिकी स्थितिः ।
प्रवर्धतां दैशिक-वित्त-संस्थितिः
 महीयतां संस्कृत-भाषिकी स्थितिः ॥१२॥
स्वावलम्बी भवेद् देशो राष्ट्रवादो भवेद्दृढः ।
 नैरन्तर्यं श्रमेऽस्माकं विक्रेतृत्वञ्च सर्वदा ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रष्टम् आचरणं त्याज्यम ऐक्यं राष्ट्रहिते भवेत् ।
गुणस्तरौ तु सर्वत्र पाल्यौ राष्ट्रविभूतये ॥१४॥
जापानदेशतोऽस्माभिश्शिक्षणीयौ गुणस्तरौ ।
ताभ्यां विना तु सर्वेषामुन्नतिः क्षणिकी भवेत् ॥१५॥
संस्कृतं सर्ववर्गाणां सर्वेषामपि सङ्घिनाम् ।
संस्कृतं यद्युपेक्ष्येत उपेक्ष्येरन् त एवेहि ॥१६॥

कवितायाः कविता

भरतराजपन्तः, काष्ठमण्डपस्थः

(वैतालीयम्)

कवितारसपानलालसो
यदि वृन्दारकभारतीं श्रृणु
कवितामपि गद्यमुद्गिरन्
पणनायैव कथं समुद्यतः ॥१॥

रविचन्द्रमयं चराचरं
सकलं छन्दसि संस्थितं जगत् ।
श्रुतिरेव करोति छान्दसीं
स्मृतिमित्येव वदन्ति सूरयः ॥२॥
कठिना न तु छान्दसी क्रिया
श्रवणेनैव यतोऽवगम्यते ।
श्रवणं मननं च धारणं
निखिलं छन्दसि साधु सेव्यताम् ॥३॥

लय एव विशेषतो यतः
सकलं छन्दसि सा विगीयते ।
लयमार्गमपास्य का कथा
कवितायाः स्वयमेव चिन्त्यताम् ॥४॥
लयतो रमते हि बालको
लय आकर्षति श्रृण्वतां मनः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविता लयतो विराजते
विलयं याति सखे ! लयं विना ॥५॥

(द्रूतविलम्बितम्)
कवितया लयसंयुतयाऽनया
सदयया दययाकुल चित्तया ।
जनजनिः सफलीक्रियते तथा
रसमयं समयं समुपागतम् ॥६॥

कवितया मृदुकान्तपदावली
रचितया भुवनं परिपाल्यते ।
भवति मानसमेव नवं नवं
जनतया नतया न विचाल्यते ॥७॥
कवितया रसनिर्झरिणी च्युता
हिमजलैः सरसाः सरितो यथा ।
सरसयन्ति सदैव रसोत्सुकान्
नवसुधां वसुधां सकलामपि ॥८॥

कवितया मधुनायकसायकाः
प्रविचलन्ति लता इव पादपे ।
कवितयैव विभाति मनोहरः
समुदितो मुदितो भुवि माधवः ॥९॥
(गीतिका)
कविता बलात्कृतबालिका
यमितेव हन्त ! विलोक्यते ।
कविभिः कपित्वमुपागतै-
र्दशनैर्नखैश्च विदारिता ॥१०॥

अधुना धुनोति मुहुर्मनः
परचालितः किमु कम्पनः ।
महिलापि हा ! मलिनीकृता
न च पूजिता न च वन्दिता ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधरामृतासवलम्पटाः
परिवारयन्ति यथा भटाः
निरपत्रपाः किमु ते नरा
गतबन्धनाश्च गलत्पटाः ॥१२॥
क्वगतं शिरस्यवगुण्ठनं
क्वगतं कुचावरणं च मे.
क्वगताऽधुना वतः शाटिका
क्वगतं विभिन्नविभूषणम् ॥१३॥

परिदेविताक्षरमालिकां
परितः प्रदर्शयतीव किम् ।
कुचकुङ्कुमं नयनाम्बुभिः
परिषिञ्चतीव मुहुर्मुहुः॥१४॥

शतशोऽवकीर्णशिरोरुहा
भयविह्वला लतिकेव सा
अवलम्ब्य पादपनग्नतां
न जहाति पादपलग्नताम् ॥१५॥

कीदृशी परिस्थितिः

डा. विष्णुराज आत्रेयः
कपिलवस्तुमण्डलस्थः

कीदृशी परिस्थितिः
आराष्ट्रं दुःस्थितिः
कदाचार एव सदाचारः
भ्रष्टाचार एव शिष्टाचारः
विसंवाद एव संवादः
अराजकतैव सुराजकता
परशोषणेन स्वसिञ्चनम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परभञ्जनेन रञ्जनम्
श्वातन्त्र्यमिव प्रतीयते स्वातन्त्र्यम्
आत्मतन्त्रमापादितं प्रजातन्त्रम्
तदानीं शीतातपयातनासहानि
यानि तपांस्यतप्यन्त
सर्वाणि तानि निष्फलानि हुतात्मनाम्
कुक्कुरबिडालवत् कलहायन्ते दलानि
आरामस्थलमिव विश्रामस्थलमुपपन्ना संसद्
गन्त्रीमुग्धाश्च केवलं मन्त्रिणः
मदान्धो नेता
क्षुधान्धा जनता
प्रखरा विध्वंसकाः
मूकः प्रासादः
मुखरं वर्तते केवलमेकं घण्टागृहम्
हन्त !
संस्कृतमपि तिरस्कृतं वर्तते
स्वधर्मिणोऽपि परधर्मिणः
त्यागिनश्च रागिणो दृश्यन्ते
तदानीन्तनमिवानुभूयत अधुनातनमपि
दिवाऽपि रात्रिरिव प्रतीयते
सिनीवाली च कुहूरिव
नगरेषु शीत्कारः
ग्रामेषु चीत्कारः,
विरोधाभास एव सर्वेषामलङ्कारः
एकं परिवर्तनं पुनरप्यपेक्ष्यते
एकः परिष्कारः पुनरपेक्ष्यते
मन्ये तमस्ततिरियं
श्वस्तनायारुणोदयाय किल !

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहचरी

डा.दुर्गादत्तशर्मा उपाध्यायः
बागलुङमण्डलस्थः

सफलं जीवनमाप्तं तेन
मधुरं जीवनमिष्टं तस्य ।
यत्पार्श्वे चेन्मधुरोल्लासा
सुस्मितभाषा राजति रमणी ॥१॥

निखिला तृप्तिश्चेतसि तस्य
देहे पुष्टिर्वदने दीप्तिः ।
सदने श्रद्धा प्रीतिः कार्ये
सविधे रसिका रमणी यस्य ॥२॥
सुस्मितसुधया सततपृक्तम्
वलयाशिञ्जितमिश्रणमधुरम् ।
रमणीकरकिसलयपरिविष्टं
साधारणमपि तद् भोज्यं मिष्टम् ॥३॥

आभा विलसति मधुरा परितः
शान्तिर्विकसति मुदिता तत्र ।
तापत्रयमपि विलयं याति
सहचर्या सह गरिमा कोऽपि ॥४॥

जीवनदीपो जीवनकान्तिर्जीवनभाग्यं जीवनसिद्धिः ।
जीवनमित्रं जीवनमन्त्रो जीवनसर्वस्वं सा जाया ॥५॥

मधुरा वाणी स्मितपूर्वा सा नूपुरमधुरश्चरणन्यासः ।
मधुरा भूषा मधुरो वेषो मधुरान्मधुरो भावविलासः ॥६॥

मधुरा प्रीतिर्मधुरालापो मधुरं चेष्टितमीक्षितमिष्टम् ।
मधुरः स्पर्शश्चन्दनतुल्यः सहचर्यास्तत् सर्वं मधुरम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवसरमहिमा

कार्यं करोमि सुविचारमितीत्थमत्र
विद्भिर्न कार्य इह कृत्यविधौ हि गर्वः ।
तादृग्विचारसृतिरत्र परिस्थितीनां
गर्भे रसातलतलं सहसा प्रयाति ।१।।

आन्दोलितो भवति कृत्यविचार एष
हृद्दोलया परिणतौ तु परिस्थितिर्हि -
कार्यं करोति विवशोऽस्त्यमुया जनोऽयम्
नेयं कदाचन विचारमनुप्रयाति ॥२॥

भाग्यं सुधामयमभिक्रियते जगत्यां
भङ्गोऽथ शोकभयविप्रतिपत्तयश्च-
कुत्रापि नो यदि परिस्थितिरस्ति सार्था
आकृष्य स्वर्गमिय मानयते धरायाम् ॥३॥

तस्मात् परिस्थितिमिमामनुकूलयद्भिः
प्राप्तः शुभावसर एष न जातु हेयः ।
एतेन सर्वसुलभा क्रियते समृद्धि-
रेतेन भाग्यमभितः फलितं विभाति ॥४॥

●

गायत्रीमाता

रामचन्द्रशर्मा पौडेलः,
तनहुँमण्डलस्थः

गायत्री वेदमाता स्वपिहितमतुलं शक्तिजन्यं प्रभावं
प्रत्येकैरक्षरैः शं वितरति सपदि श्रद्धया जप्यमाने ।
वर्णेशः कः कथं स प्रभवति सफलः सारसङ्क्षेप-मीहे
यत्किञ्चिज्ज्ञानहेतोरपिहितमखिलं यद्ररहस्यं निगूढम् ॥१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्(तद्) वाच्यः श्रीगणेशः सकलसफलतादायको विघ्नहर्ता
बुद्धेर्वृद्धिप्रदाता निखिलसुरनरैः सेवितो विश्वभर्ता ।
ऋद्धया सिद्धया च युक्तः प्रणतजनमनःकामनापूरकोऽसौ,
गायत्र्या आद्यवर्णे विलसति नितरां सिद्धिदो मेऽस्तु नित्यम् ॥२॥

सद्भक्तस्याऽवनार्थं धृतनृहरितनुद्वर्चाकृतिः श्रीनृसिंहः,
शूरः क्रूरः प्रशस्यः कशिपुविदलनो दुष्टरक्षोबलघ्नः ।
आतङ्कक्रान्तिविघ्नादिकभयहरणः पौरुषस्य प्रदाता
तस्याधिष्ठातृदेवो विकिरतु मयि तच्छक्तिपुञ्जं प्रमाता ॥३॥

विष्णुर्वीतितृतीयाक्षरवरविहरो विश्वतो विश्वपाता
विष्वक्सेनो विशिष्टो विबुधबुधजनैर्वीतरागैर्विविक्तः ।
दुःखाधिव्याधिविघ्नैर्व्यपगतमनसामाश्रयो दुःखलेशः,
गायत्रीमन्त्रशक्तिं प्रकटयतु जपान्मय्यनीशे रमेशः ॥४॥

तु(र्)र्यं यद् ब्रह्मतत्त्वं शिव इति भणितं व्यापृतं येन सर्वं
जाग्रन्निद्रासुषुतित्रिविधपरतरं तत्तुना वाच्य बोध्यम् ।
नैश्चल्यं चात्मनिष्ठा विषयविषफलं प्रत्यनासक्तिभावो
यद्यत्तत्सर्वमिष्टं भव ! भवतु मयि त्वत्प्रसादाद् वरेण्यम् ॥५॥

वन्द्यो योगेश्वरो यो भुवि दिवि जनुषां ज्ञानकर्मेष्टशक्तिः
श्रीकृष्णाख्यस्त्रियोगी गुणगणमहितः कर्मनिष्कामभक्तिः ।
सौन्दर्यं सामरस्यं सरससरलताक्षेमयोगानुरक्तिः,
सर्वं मय्यादधातु प्रणयपरवशः पञ्चमार्णप्रसक्तिः ॥६॥

रेखा या प्रेमनाम्नो विकसति हृदये तद्द्रवत्वं हृदुत्थं
नैतस्मिन्नन्यगत्वं भवति भवति तल्लेपितं वज्रतुल्यम् ।
द्वेषाभावः प्रसादः प्रियतममयता प्रीतिमात्रप्रवृत्ती
राधा मह्यं ददातु प्रियगुणमखिलं जाग्रती प्रेममूर्तिः ॥७॥

णी वास्तव्या हि लक्ष्मीर्धनपदयशसां दायिनीभक्तिभाजां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वैराकाङ्क्ष्यमाणा गतिमतिधृतिभिः सर्वथा सर्वदैवम् ।
लोकानां श्रीः प्रतिष्ठा परमतिचपला याऽस्ति सर्वत्र वन्द्या,
मद्गेहे सुस्थिरा सा निवसतु नितरां कल्पमञ्जर्य्यवन्ध्या ॥८॥

यं सर्वे योजयन्तः प्रतिदिनमनलं सोऽनलश्चाष्टकस्थः,
सामर्थ्यौष्ण्यप्रकाशादिकमनुगतिकं यस्य यः सर्वसंस्थः ।
तेजस्तत्वात्मको यो भगणबलयुतः सोऽग्निनामा यथार्थः
सर्वप्रोतान्गुणाँस्तान् वितरतु सततं स्यामहं तैः समर्थः ॥९॥

भर्गस्तस्याधिदेवो विबुधगणपतिर्देवराडिन्द्रनामा,
भूतप्रेतादिचौराक्रमणविशरणोऽनिष्टहा वृष्टिकर्मा ।
स्वाराज्यं शत्रुतो योऽवति कुशलतया भाति यः स्वर्गलोके
शक्तीस्ताराजकीयाः प्रकटयतु मयि श्रीविहीने वराके ॥१०॥

गोवाच्या श्रीसरस्वत्यभिमतकलनां या गिरा ज्ञापयन्ती,
ज्ञानं विज्ञानमक्षाऽक्षरमयसुपथा सत्पथं द्योतयन्ती ।
मेधां बुद्धिं विवेकं प्रकटयति च या कच्छपीं वादयन्ती,
सा स्वीयाः प्राज्ञशक्तीः सुवितरतु तदोमक्षरं नादयन्ती ॥११॥

देवी दुर्गेति देस्था दितिसुतदमनी दुःखदैन्यादिहन्त्री ।
निघ्नन्ती विघ्नसंघान् युधि च विजयिनी लोककल्याणकर्त्री ।
दुष्टारिष्टाद्यनिष्टान् स्वभुजगतबलैर्नाशयित्री विधात्री,
सैषा शक्तिस्वरूपा प्रणतविनयिनी मेऽस्तु शक्तिप्रदात्री ॥१२॥

वन्दे वस्थं सलीलं पवनसमबलं ब्रह्मचर्यप्रतीकं,
निष्ठावन्तं कपीशं दशमुखभयदं श्रीहनूमन्तमीड्यम् ।
सम्पत्तौ वा विपत्तौ सततमविचलं निर्भयं रामचित्तं
सोऽयं स्वीयाश्च शक्तीर्वितरतु मयि ताः प्रार्थनैषाऽस्ति नित्यम् ॥१३॥

स्यन्दिन्येषा सहिष्णुहर्यचरचरजगद्दुर्धरं धारयित्री,
स्वौपम्येन क्षमां वाऽप्यतिभरवहनैः शक्यतां स्थापयित्री ।
आद्यं काव्यं महद् याऽऽदिमपरमकवेः पिण्ड ब्रह्माण्डकर्तुः,
पृथ्वीयं मे स्वशीलान् दिशतु च सततं पुत्रकोऽहं पृथिव्याः ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धीवाच्यः सूर्यदेवः स्फुरति जगदिदं यत्कृपातो यथार्थ-
मात्माद्यावापृथिव्योरखिलखचरराट् स्यादभावे ह्यनर्थम् ।
मेषे सिंहे बलीयान् बहुविधगदहा स्वप्रकाशः सुसेव्यः,
तेजस्तत्त्वं समन्तान्मयि विकिरतु तद् यो हि प्रत्यक्षदेवः ॥१५॥

मर्यादापूरुषोऽयं दशमुखदमनः पापिनां ध्वंसकर्ता,
मैत्रीसन्धानतो वा शरणमुपगते निर्भयत्वप्रदाता ।
कष्टेऽनिष्टे तितिक्षुः सततमविचलश्चैकपत्नीव्रतस्थः,
श्रीरामस्ताः स्वशक्तीः प्रणयतु च सदा मानुषः सत्यनिष्ठः ॥१६॥

हिण्डी सीता द्वितीया दशमुखदनुजं विद्यया मोक्षयन्ती
इच्छाज्ञानक्रियेति त्रिविधगुणबलैः सर्वदुःखौघहन्त्री ।
लोकार्थे सा परीक्षा धवधवलतमा शीलमूर्तिर्हसन्ती,
पृथ्वीगर्भासमुत्था वितरतु च बलं स्रग्धरां प्राप्नुवन्ती ॥१७॥

धित्सू राहुः शशाङ्कं कवलयति परं द्वेष्टिराहुर्नचन्द्रः,
निःशत्रुत्वं समत्वं जनयति च मुदा यं च यस्तारकेन्द्रः ।
क्षोभोद्वेगादिहारी स्वमधुरकिरणैः शीतलाह्लादकारी,
शान्तिक्षान्तिप्रसादैरपनयतु सदा तापमाकाशचारी ॥१८॥

यो वाच्यो यः समस्तान् कवलयति यमः स्थावराञ्जगमाँश्च,
स्फूर्तिर्यस्याऽद्वितीया समुचितसमयज्ञातृता जागरश्च ।
याथातथ्येन दण्डं विदधति नितरां दण्डधृक् कर्मदृग् यः,
सोऽयं शक्तीः स्वकीया प्रवितरतु सदा ताः स्यो मतोऽहं नमृग्यः ॥१९॥

यो ब्रऽमाण्डं विधत्ते शिशुरिव बहुधाऽहैतुकं पूर्ववद् वा,
सर्वं काव्यं हि तस्याऽभिनवनवकवेः कौशलं कौतुकं वा ।
लीलाकैवल्यमेतत्तदपि जगदिदं मायिनस्तस्य खेलः,
इत्थं शक्तो विधाता सुवितरतु मुदा शक्तिमत्त्वं सलीलः ॥२०॥

नः संबोध्या वरेण्यो वरुण इति दिशं नाथते यः प्रतीचीम्,
आर्द्रो माधुर्यधुर्यः श्वसयति नितरां चिज्जडं वस्तुजातम् ।
पारावाराधियोऽयं विनयपरगुणो भावुकः पाशहस्तोः
याचेऽहं स्वशक्तीर्मयि फलयतु ता अस्म्यहं बद्धहस्तः ॥२१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रस्तारो यस्य सर्वस्त्वियदिति गदितुं नैवशक्यो न गुण्यः,
स श्रीनारायणाख्योऽखिल भुवनपतिर्ध्यानमात्रैकगम्यः ।
वृत्तैर्दिव्योज्वलैर्योऽतिमहितचरणो विश्वपः सर्वकृद् यः,
स्वीयाः शक्तीः सदा मे स दिशतु मधुरः सर्वभृत्सर्वहृद्यः ॥२२॥

चो क्षा ग्रीवाहयस्येति च हयवदनः श्रीहयग्रीवनामा,
प्रख्यातो वीरतायां विपदि निरुपधिर्निर्भयो लोककर्मा ।
उत्साही धर्मभीरुर्जलधितलगतां यस्त्रयीमुद्दधार,
स्वीयाः शक्तीरशक्ते मयि विशदयतु श्रीपतेर्योऽवतारः ॥२३॥

दर्पोदम्भो न यस्याऽतिशयविमलधीः क्षीरनीरप्रबोधः,
हंसोहंसावतंसो जगति परमतोपाधिकानां प्रमोदः ।
सन्तुष्टिर्दूरदृष्टिहर्चनुपमधवला यस्य कान्तिः सगुण्यं
भारत्या वाहनो यः स मयि विकिरतात्सद्विवेकः सपण्डम् ॥२४॥

यात्वाधीनां रुजां वा सपदि निरसिनी पावनी प्राणधात्री,
पातिव्रत्ये च सत्ये सततमतुलिता सा तुलस्याधिहर्त्री ।
दिव्याभव्या सुसेव्यास्तवकजनमनः सौमनस्यप्रदात्री,
नित्यं सा प्रीतिदात्री भवतु सुखकरी चान्तकत्रासकर्त्री ॥२५॥

गायत्र्या अक्षरेशान् भजति सविधि यो दत्तचित्तः प्रपन्नो,
दुःखाद्यौघं च हित्वा भुवि दिवि च फलं प्राप्नुयात्सुप्रसन्नः ।
सायं प्रातः पठेच्चेद् भवति स पुरुषो ब्रह्मवित्सप्रकाशः
एतच्चाष्टत्रिकं वै प्रथयति नितरां नात्र शङ्कावकाशः ॥२६॥

गायत्री वेदमाता निखिलसुरनरैर्वन्दिता यास्त्यबन्ध्या,
सायं प्रातर्दिवेति त्रिविधकलनया या विभक्ता त्रिसन्ध्या ।
गायत्री वै सवित्री त्रिभुवनजननी या सरस्वत्यभिख्या,
सैषा महद्यं ददातु त्रिभुवनजयिनी भर्गशक्तीः समाख्याः ॥२७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानसराज्यम्

रंघाली

भूतैः पंचभिरूर्जितं वपुरिदं राज्यं हि पंचाङ्गवत्
राजा चाऽत्र विराजतेऽति बलवान् स्वच्छन्दवर्ती मनः ।
राज्ञस्तस्य सुवासिनी च महिषी मेधाविनी शेमुषी
पञ्चत्वक्श्रुतिनेत्रघ्राणरसनाः सन्त्यत्र तन्मन्त्रिणः ॥१॥

प्राणास्तज्जनताः स्वसन्ततियुताः पञ्चापि लक्षाधिकाः
पायूपस्थगिरः सहस्तचरणास्तत्कर्मसञ्चारिणः ।
अङ्गैरेभिरमात्यराजजनताराज्ञीभटैः पञ्चभिः
राज्यं नः परिवर्द्धितं वपुरिदं नाम्नोच्यते मानसम् ॥२॥

एतन्मानसराज्यराजमुकुटं चेतोऽधिराज्ये स्वतः
सर्वं कारयते प्रशासन-परामर्शं विना मन्त्रिणाम् ।
तस्मात्ते सकलाः सदैव सभयाः स्वच्छन्दतश्चेतसः
कुर्वन्त्यात्महिताहितप्रणतयश्चाज्ञां परां यादृशीम् ॥३॥

राज्ञीं तामुपयान्ति ते भयधिया प्रज्ञावतीं कर्हिचित्,
राजानं प्रणिपत्य बोधयति साऽनिष्टेष्टदिष्टं हि यत् ।
राजा कर्हि करोति तन्मधुरवादिन्यो वचः पालनम्,
हीत्थं शासनपद्धतिं प्रतिदिनं चालोचयामो वयम् ॥४॥

तस्माच्छस्त्रसुशास्त्रतत्त्वपरकैरस्माभिरेवं महद्
युद्धं तेन हृदा विधेयमनिशं स्याद्वाऽमनस्कं यतः ।
सत्यं तत्त्वमिदं विविच्य सुखिनः स्यामः स्वतो निश्चयम्
दुर्नीतेः स्वशरीरराजमनसो मुक्ता भवेम ध्रुवम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धर्मो रक्षति रक्षितः

प्रा. डा. राधाकृष्णअधिकारी, कास्कीमण्डलस्थः

अनार्याणां सर्वं कलिकलुषभावो हितकरः
स वै स्यादार्याणां कलिकलुषभावोऽहितकरः ।
मलोत्पन्नाः सर्वे कृमय इव जाता मलभुवि
तदश्नन्तः स्वस्था न च तदितरे स्युश्चरगणाः ॥१॥

जगद्धर्मस्यैतत्कृतमपि विरूपं भवति वै
विरूपौ द्वौ भावावमृतमलयोर्वै विचरतः ।
तयोर्विज्ञानायाऽसुरसुरगणौ द्वौ विरचितौ
सुराणां सत्कार्यमसुरगणकार्यं पुनरसत् ॥२॥

स्वभावेनैवैतावनुगतविधर्मौ विचरतः
तदस्माकं धर्मो वितरति हितं शास्त्रविहितम् ।
निषिद्धास्ते धर्मा मलमिव सदाऽनिष्टजनकाः
विशुद्धस्याचारा अमृत इव स्वेष्टस्य जनकाः ॥३॥

मनोर्धर्मान्सर्वान् विशदतपाराशरगतान्
तथाऽन्येषां तांस्तान् नियमविधिनाऽधीत्य सकलान् ।
अनुष्ठानं तद्वत्खलु हितकरं निश्चितगतम्
अतस्ते मर्त्यानाममृतमिव मर्त्योन्मथनका ॥४॥

दैवीभावसमुत्थितिर्नियमतः स्वाध्यायतः सम्भवेत्
आसुर्याश्च विनाशनं खलु भवेद् विज्ञानविज्ञानतः ।
विज्ञाने रहितान्धमानुषगतिः सम्यङ्न सम्पद्यते
सम्यक्त्वं समवाप्तुमर्थनिचयञ्चाप्तुं स धर्मो मतः ॥५।

ब्रह्मस्वरूपेण च विद्यमानो धर्मो हि रूपाणि बिभर्ति नाना ।
प्रधानभावेन जगद्विभर्तुं हयावृत्तिकारी स बभूव पूर्वम् ॥६॥
ततो हयनावृत्तिकरं च रूपं विधाय द्वेधा स बभूव धर्मः ।
भवन्ति नानाविधभेदभावास्ताभ्यां प्रसूताः किल सर्वधर्माः ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वैश्च धर्मैः पुरुषार्थसिद्धिः सम्पद्यते सम्यगनुष्ठितैस्स्वैः ।
धर्मस्य रक्षा सततं विधेया भविष्णुमिलोकगतैः समस्तै ॥८॥
तै रक्षितो रक्षति सोऽपि तान्वै निःसंशयं सृष्टिस्वभाव एषः ।
विज्ञानमेतज्जगतो हिताय प्रकाशते विष्णुरसौ विचित्रम् ॥९॥

विज्ञानं खलु धार्मिकं जनकवत्संरक्षणं सर्वतः ।
सर्वेषामपि भूतभावनकरान् भोग्यान् पदार्थान् पुनः ॥
स्वच्छां कालगतिं विधाय मनसो वृत्तिं च दैवीं तथा ।
कुर्याल्लोकहितं ह्यनुष्ठितिपरैः संरक्षितस्सत्सदा ॥१०॥

यागोत्थान् हि विलोक्य सर्वजगतोः सम्वर्द्धनं रक्षणं
सर्वेषां परिपालकः स भगवान् योगस्वरूपं गतः ॥
योगादेव जनिक्रमश्च सकलो ह्युत्पद्यते तत्त्वतो
योगो धर्म इति स्मृतं स च परान् तै रक्षितो रक्षति ॥११॥

●

वेणुवाणिः

हेमराजज्ञवाली
बर्दियामण्डलस्थः

जातो वंशकुले स्वल्पो विनाशाय स्वभावतः ।
भवता करुणार्द्रेण वेणुरूपेण स्वीकृतः ॥१॥
चराचरस्य जातोऽहमद्यानन्दप्रदायकः ।
रन्ध्रेभ्यः श्वासदानेन भवता प्राणपूरितः॥२॥

त्वमेव गीतरूपेण स्थितोऽसि हृदये मम ।
अन्यथा का भवेत् शक्तिस्तुच्छस्य जडवस्तुनः ॥३॥
इत्थं रागप्रलापेन मोहयन् भवमण्डलम् ।
वशीकर्तुं स्वनादेन हर्षोल्लासप्रपूरितः ॥४॥

संभवोऽस्ति श्व एवाहं कालेन कवलीकृतः ।
भस्मराश्यां स्वभावेन भवेयम् परिवर्तितः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदा केऽपि स्मरिष्यन्ति गुणान्मे शोकविह्वलाः ।
बहवस्तु स्वभावेन निन्दिष्यन्ति सुनिश्चयम् ॥६॥

यत्किंचित् संभवेत् तत्र जीवनं सफलं मम ।
भवतोऽनुग्रहेणैव कराब्जे शरणं गतः ॥७॥
अनन्तकालपर्यन्तमानन्दवीचिभिः सह ।
खेलयन् जीवनं मेऽभूत् धन्यं धन्यमहो प्रभो ॥८॥

(भावानुवादः जीशंकरकुरुपस्य 'बाँसुरी' इत्यतः)

अनुतापः

डा. लक्ष्मीकान्तपन्थी
गुल्मीमण्डलस्थः

अहो ! अहोभिर्बहुभिश्चमासैर्वर्षैरनेकैरभवं वयस्कः ।
जीवानि सत्यं शरदां शतं चेदर्धं तदायुर्विगतं ममैतत् ॥१॥

बालः पूर्वं तदनुरभवं रुग्णतापात्रमेकं
कैशोरं मेऽक्षरपरिचयान्निर्गतं नानुभूतम्
पौगण्डं तत् पशुचरणतः कानने सम्प्रयुक्तं
तस्मादर्वाक् पठितुमनसा गेहतो विप्रयुक्तः ॥२॥

पाठाभ्यासे खेलने लेखने च कालो यातः कर्म किञ्चित् कृतं न ।
शिक्षा दीक्षा नैव लब्धोत्तमाऽपि यातायाते काल एष व्यतीतः ॥३॥

सोऽहं पितुः प्रथमपुत्र इहास्मि तादृक्
यादृक् पितुः सुखकरो न च मातुरेव ।
या पञ्चमाब्दवयसाऽतिसुसेवितापि
सा भारती न सुमुखी विमुखी ममास्ति ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कदाचिद् भ्रातॄणामनुगमनसंल्लग्नमनसः
कदाचिद् वामाङ्गीमनुगमयितुं दत्तमनसः ।
अभूवन् वर्षिष्ठस्तदथ सुकृते मे मतिरिह
कथङ्कारं गच्छेत् तदपि न मनश्चिन्तयसि किम् ! ॥५॥

गतः कालो यावान् स च मम हृदा नैव गणितः
कृतः श्वासोच्छ्वासोऽशनवसनहेतोर्विचलितः ।
अभूवं वर्षिष्ठतदथ न च लग्नो व्यवसितौ
हरे ! वृद्धत्वे मां किमथ न दशेत् कालभुजगः ॥६॥

जानकीवन्दना

माधवप्रसादचालिसे
जनकपुरस्थः

नानाभोगविलासपङ्कमलिनं नृणां मनोदर्पणं
यत्पादाब्जरजोभिरेव सततं सम्मार्जनान्निर्मलम् ।
सद्यो जायत एतदेवमखिलं विश्वञ्च यत्राश्रितं
वन्दे तज्जनकात्मजाङ्घ्रियुगलं पापौघविध्वंसकम् ॥१॥

यस्या जन्मन एव पूतमखिलं नेपालभूमण्डलं
यल्लीलाश्रयतश्च राक्षसकुलं रामेण विध्वंसितम् ।
स्पर्शाद् यच्चरणाब्जयोरपि समा धन्याभवद्भूरियं
वन्दे तां जनकात्मजां श्रुतिनुतां रामार्धपीठासनाम् ॥२॥

यन्नामामृतपानतः कलिमलं सद्योऽखिलं नश्यति
यल्लीलाश्रवणाद् गमागमपरं चक्रं समुच्छिद्यते ।
लोकादर्शसतीशिरोमणिरिति प्राज्ञैश्च या कीर्तिता
वन्दे भूतनयां त्रिलोकजननीं तां रामलीलेश्वरीम् ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रव्यादापहृतिच्छलेन सहसा ह्यात्मानमाच्छादिता-
मज्ञानादिव मुञ्चदश्रुकलुषामादर्शलीलाकरीम् ।
रक्षः स्त्रीपरिवेष्टितां सकपिना रामेण चान्वीक्षितां
वन्दे तां धरणीसुतां हनुमता भक्त्या समाश्वासिताम् ॥४॥

साक्षित्वेन सदैव विश्वहृदये क्षेत्रज्ञरूपापि या
भक्तानां परिपालनाय सगुणं स्वीकृत्य रूपं शुभम् ।
लोके प्रादुरभूत् तथैव विविधां लीलां सुजायोचितां
कृत्वादर्शमदर्शयच्च भुवितां वन्दे सदा जानकीम् ॥५॥

भक्तानां समनुग्रहाय मिथिलाक्षेत्रे यया सन्ततं
स्थातं वाञ्छितमत्र वत्सलतया तेष्वेव यन्मन्दिरम् ।
निर्माय प्रणयेन तैश्च भवती सैव स्थिता प्रेमतः
वन्दे तां मिथिलाप्रियां जनकजां सद्भक्तकल्पद्रुमाम् ॥६॥

याद्याशक्तिरनन्यभावसुलभा ह्यागत्य लक्ष्मीः स्वयं
प्राकारैः परिवेष्टितं च शवलैरत्युन्नतैः सुन्दरैः ।
भक्तानां यजनैः कथा प्रवचनैर्नृत्यादिभी रञ्जित-
मध्यास्ते निजमन्दिरं सशिखरं वन्दे सदा जानकीम् ॥७॥

या देवी जनकस्य पुण्यनगरे ह्युद्भूय भूकर्षणाद्
वृत्वा दाशरथिं च कार्मुकमखे वीराग्रणीं धन्विनम् ।
यायोध्यागमनेऽपि गेयचरितैरादर्शमस्थापयद्
वन्दे तां रघुनन्दनस्य दयितामादर्शनारीश्वरीम् ॥८॥

नेपालस्य सुतापि भारतमपि स्नेहेन सिक्त्वाखिल-
मुच्चैस्तद्धृदयेऽपि वासमलभत् सप्रेम या सादरम् ।
प्रख्याता कुलपालिकेति भवती स्थित्यै तु लोकस्य या
वन्दे तां ह्युभयस्य दीपकशिखां सीताभिधानां रमाम् ॥९॥

यस्याः पारमनन्तदृष्टिमुनयोऽप्याप्तुं न शेकुः परं
तस्या वर्णनमेष मूढहृदयः शक्नोतु कर्तुं कथम् ।
वाणीमेव परं पवित्रयतु मे ह्युद्दिश्य मातेति सा
श्रद्धापुष्पसमर्पणं तु कुरुते भक्त्या पदोः केवलम् ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अज्ञानावृतमन्दबुद्धिवटुना हार्दा शुभा मालिका
प्रैषीयं ग्रथितुं तु भावकुसमैर्नैवास्ति या मञ्जुला ।
गृह्णातु प्रणयेन तां तदपि मां पुत्रं विदित्वा निजं
मूको वा बधिरोऽपि मातुरनिशं पुत्रस्तु पुत्रोऽस्ति सः ॥११॥

भिक्षुकः

कृष्णप्रसाद कोइराला
पाल्पामण्डलस्थः

भिक्षुकमागतमेतं पश्यत चरणौ दरं समाक्षिप्य ।
करुणाक्षिणी किरन्तं मौनं कथनं हि तीव्रदुःखस्य ॥१॥
दिनकरदीप्ताङ्गणके लिप्सातन्त्रीं स वादयँल्लघ्वीम् ।
प्राप्तो जीवनवृत्तं वर्तुलबिन्दावपातयत्स्वस्य ॥२॥

वत ! निष्ठूरसमयोऽयं पश्यत वासांसि तस्य जीर्णानि ।
पान्थो जीवनमार्गे कम्पितहस्तौ प्रसारयति ॥३॥
शीर्षे पतिततुषारं वदनं नेत्राम्बुभिः कृतं गर्तम् ।
पश्यण विदीर्णवक्षो भिक्षोरेतैर्दिनैर्जनितम् ॥४॥

निःसृतदीर्घश्वासो मौनं विलपन् क्षणं क्षणं तिष्ठन् ।
यष्टिसमाश्रितदेहस्तण्डूलमुष्ट्यै निवेदयति ॥५॥
मनुजे मनुजकृतं रोदनमार्त्तं हृदः समुद्भूतम् ।
वन्धुष्वात्मन एवादेदनमित्यं दयामुष्ट्यै ॥६॥

कोऽयं ? कस्य च तनुजः ? कस्य च जनको दरिद्रतामाप्तः ?
कस्या अङ्के शयितो मातुर्द्रवतोर्दृशोर्दीपः ? ॥७॥
चन्द्रार्कयोः समीपे विकसितनेत्रे कयाशया विहिते ? ।
ग्लपितः परं किमर्थं ? जीवनदीपश्च किं मलिनः ? ॥८॥

प्राप्तो दृग्गोचरतां भिक्षुक एवैष शाक्यसिंहस्य ।
हृत्तः पीडा न्यनदन्मूर्त्तौ शब्देषु चास्यैव ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शब्देष्वेतेषु पुरा सागरमूर्तिर्दया समुच्छलिता ।
वेशेनैतेन बलेर्दर्पश्चूर्णीकृतो हरिणा ॥१०॥
अयमीश्वर उत भिक्षुर्नूनं प्रत्यङ्गणं प्रभुश्चरति ।
निनदेष्वार्त्तेषु सदा करुणामूर्तिर्वदत्येषः ॥११॥

(लक्ष्मीप्रसादेवकोटामहोदयस्य 'भिखारी' इत्यस्यानुवादः)

●

कथम् जयतु संस्कृतम् ?

तेजकेशरि उपाध्यायः
काष्ठमण्डपस्थः

जयतु संस्कृतं जयतु संस्कृतम्
कथं जयतु संस्कृतम् ?
जयतु संस्कृतं जयतु संस्कृतम्
कथं जयतु संस्कृतम् ? ॥१॥

स्वसंस्कृतिर्न सत्कृता मनीषिणो न सत्कृताः
उत्कोचकाः पुरस्कृताः कथं जयतु संस्कृतम् ? ॥२॥

विद्वांसो न समादृताः क्वचिदहो नोसत्कृताः स्वीकृताः ।
नीतिज्ञाः समुपेक्षिताः प्रतिपदं न्याय्ये पदे न्यक्कृताः ।
भ्रष्टाश्चाटुकराः समुन्नतपदे नीताः पुरस्तात् कृताः
दुर्वृत्ताः परितः स्थिता बहुमता, योग्या जना धिक्कृताः ॥३॥

धर्मे स्वे निजसंस्कृतौ च युवभिश्छात्रैरनास्था कृता
धर्मेऽन्ये परसंस्कृतौ त्रुटिपरैर्मोहान्धताङ्गीकृता ।
को देशः क परम्परा नवनवं किं किं तथावश्यकं
कोऽतीतः किमु वर्तमानसमयो भावी भविष्यत् कथम् ॥४॥

इत्थं चेतयते न कश्चन जनः सर्वेऽर्थकामातुराः
वैषम्ये युधि संस्कृतं जयतु कं कस्मै यथाऽसीत्पुरा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वच्छं शासनमीहितं यदि मुधा कार्यं न वै भाषणम्
मिथ्या भाषणतो विलुप्यत अहो नक्तं दिनं प्राशनम् ॥५॥

धर्मज्ञा न समादृताः परिषदि स्रग्धूलिवत् फूत्कृताः
कर्मज्ञा न समीहिताः सदसि ते द्वारादहो धूत्कृताः ।
शर्मज्ञा न समाहिता ? समितिषु प्रागेव ते दूत्कृताः
मर्मज्ञा न समीक्षिता विकृतिषु द्रागेव ते हूत्कृताः ॥६॥

कुशासनस्थाश्च सुशासनस्थाः
मृदु प्रतिष्ठाश्च दृढात्मनिष्ठाः
स्वधर्मपाला निजकर्मपालाः
जयन्ति सन्तः कृतिनो महान्तः ॥७॥
संस्कृतं जयतु संस्कृतं भो कथं जयतु संस्कृतम् ?
सर्वथा जयतु संस्कृतं सर्वदा जयतु संस्कृतम् ॥८॥
संस्कृताष्टकमिदं पुण्यं
योऽक्षुण्णं पठेज्जनः ।
संस्कृतं संस्कृतं कुर्यात्
संस्कृतं तं सुसंस्कृतम् ॥९॥

यक्षप्रश्नः

प्रा. डा. वेणीमाधवढकालः,
पाल्पामण्डलस्थः

१. यक्षः पृच्छति कविविशेषम्
कथय, नेपाले सम्प्रति का वार्ता ?
कविर्भणति भो यक्ष !
अधुना नेपाले यत्र तत्र जनाः सन्ति भयार्ताः ।
रुकुमं रौति नीरवं, रहसि ग्लायति गोर्खा,
सुरक्षेत्रं सीदति, रक्तरञ्जिता वर्तते रोल्पा,
प्यूठानमस्ति विपन्नं म्लायति गुल्मी दीना
सल्यानमस्ति विषण्णं जुम्ला सन्त्रासक्षीणा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वपुत्रहतानां स्वपुत्राणां शवशय्यात्वं याता
रक्तस्नाता नेपालवसुधा कीदृशी कीदृशी जाता,
नो निर्माणं नापि विकासः
न च धर्मो नैवाध्यात्मिकं कृत्यम्,
किं वदानि राष्ट्रेऽस्मिन्
सततं प्रचलति मृत्योरेव ताण्डवं नृत्यम्,
नरा नार्यश्च सन्ति भयार्ताः
संप्रति नेपाले इयमेव वार्ता ।

२. यक्षः पृच्छति कथय
कीदृशाः सन्ति राजनेतारः
कविर्भणति प्रायः सर्व एव
मन्त्रिपदप्राप्तिमहासमरस्य योद्धारः
नेपाले सन्ति राजनेतारः
व्यवसायो राजनीतिः
लक्ष्यं भ्रष्टाचारः
प्रायो बहूनां राजनायकानामयमेवाधुनिकः समाचारः ।

३. यक्षः पृच्छति, कथय,
बुद्धिजीविनः कीदृशाचरणाः ?
कविर्भणति
प्रायस्ते दलविशेषलाङ्गूलशरणाः
आत्मविक्रेतारः
स्वर्थसिद्धिफलक्रेतारः,
नाध्ययनं गभीरं न च सुन्दररचना,
न धर्मो न च स्वस्थसमाजसंरचना,
न विवेको नास्ति उदारता
यक्षाधिपते ! प्रायो बुद्धिजीविनामियमेव वार्ता ।

४. यक्षः पृच्छति,कथय,
शिक्षाक्षेत्रं किं रूपम्,
कविर्भणति
शिक्षाक्षेत्रमेव नेपाले सर्वाधिकं विरूपम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न संस्कृतिः नापि संस्कारः
अपि तु केवलं द्वन्द्वाग्नितो
विषाक्तो हूङ्कारः,
न मर्यादा नापि लज्जा
नृत्यन्ति केवलं उद्दामयौवनमूर्तौ विद्रूपः श्रृङ्गारः,
विद्या मलिना प्रतिभा म्लाना
प्रज्ञादयश्च विषण्णाः सन्ति
छात्रा अध्ययनाद् गुरवो ऽध्यापनात्
मुक्तबन्धनाः सानन्दं विहरन्ति ।
स्वपक्षपोषणस्य परपक्षशोषणस्य
अलिखितनियमा जागरुकाः सन्ति ।

यानि दृश्यानि संसारे न दृश्यन्ते
तानि नेपालस्य शैक्षिकक्षेत्रे
दृश्यमानानि सन्ति ।
शिक्षका युद्धमुद्रायाम्
छात्रा युद्धमुद्रायाम्
शैक्षिकप्राङ्गणे सन्नद्धाः सन्ति
मन्ये वीणावादिनी सापि
युद्धार्थिनीव वीणां
विहाय खुकुरीं गृह्णाति
मर्कटान्नप्रियाणां वानराणां हस्ते
नारिकेलमस्ति किं क्रियते
किमसङ्गतं किञ्च सङ्गतं
कश्चिन्तयति
सङ्गतमपि असङ्गतम् असङ्गतमपि
सङ्गतं स्वेच्छया क्रियते ।
सर्वा परिस्थितिरस्ति भयार्ता
यक्षाधिपते ! नेपालस्य इयमेव वार्ता ।

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रे रे गर्जति गर्जति

राष्ट्राद् गर्जति मन्त्रित्वं तस्माद् गर्जति भ्रष्टता
गर्जत्यस्या विरोधश्च विद्रोहोऽस्माद् प्रगर्जति ॥
तस्माद् गर्जति भूगुप्तिरातङ्कोऽस्याः प्रगर्जति ।
ततो रक्तनदी वेगान्नेपालेऽस्मिन् प्रगर्जति ॥

निर्दोषानामनाथानां मानवानां दिने दिने ।
शवाः गर्जन्ति किं ब्रूमो रे रे मृत्युः प्रगर्जति ॥
मृतापत्या मृतप्राया माता रौति निरन्तरम्
आराष्ट्रं विधवानां तत् श्रूयते परिदेवनम् ॥

मृत्युर्गर्जति दारिद्र्याद् बाध्यतायाः प्रगर्जति ।
मृत्युर्गर्जति चान्यायात् रे रे मृत्युः प्रगर्जति ॥

मृत्युर्गर्जति ग्रामेषु नगरेषु प्रगर्जति ।
उद्योगेषु च कोषेषु कार्यक्षेत्रेषु गर्जति ॥
मृत्यू रक्षानिकायेषु प्रहरिषु प्रगर्जति ।
शिक्षागारेषु व्यापारनिकायेषु प्रगर्जति ।
दिने गर्जति रात्रौ च सन्ध्यायां स प्रगर्जति
वाहनेषु च यानेषु व्योमयानेषु गर्जति ॥

स्वप्ने गर्जति मर्त्यानां जागरायां प्रगर्जति ।
किं ब्रूमो गर्जनं तस्य रे रे गर्जति गर्जति ॥

अशान्तेरसुरक्षायाः शवपङ्क्तिर्महासने ।
पदवन्धेन संस्थाय सर्वकारः प्रगर्जति ।
वशाधिकान् जनान् भ्रष्टान् भ्रष्टाचारस्य नायकम्
भर्त्सयन् पदमूलाभ्यां लाउडा तत् प्रगर्जति ॥

प्रमुखं प्रतिपक्षं तं भ्रष्टाचारविरोधिनम्
भ्रष्टाचारे स्वयं मग्नं दृष्ट्वा राष्ट्रं प्रगर्जति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चीनदेशोद्भवं यानं सधिक्कारं प्रगर्जति
रे विपक्ष ! जहि प्राणान् निर्लज्ज ! किमु तिष्ठसि ॥

भीषयन् प्रतिपदं तं सर्वकारं जनानपि
माओवादः सहुङ्कारं रे रे गर्जति गर्जति ॥
मृत्योरपि महामृत्युर्माओवादः प्रगर्जति
माओवादात् परं नास्ति रे रे माओ प्रगर्जति ॥

●

कवितानुतिः

प्रा.रामहरिदाहालः,धादिङ्मण्डलस्थः

लोको दुःखस्य हत्यै भ्रमति ह सततं नैव तद्धातुमीशः
लोकः सौख्यस्य लब्ध्यै भ्रमति हि सततं नैव तल्लब्धुमीशः ।
किं स्याद् दुःखं तथा किं सुखमिति सततं चिन्तयन्नेष लोकः,
सौख्यं सम्यङ् न जानन्नपि खलु यतते सन्ततं तस्य लब्ध्यै ॥१॥

उत्तुङ्गोत्तुङ्गशैलान् विहरति मनुजो भूरि सौहित्यकामः,
सिन्धोरुत्तालवीचिष्वपि झष इव संयाति कल्याणकामः ।
व्योम्नो निस्सीममार्गं भ्रमति सुखलवस्पर्शलाभं विचिन्त्य,
किं किं कर्तुं प्रवृत्तो न हि जननिकरश्शर्मलब्ध्यै विशिष्य ॥२॥

भोगा भुक्ताः कियन्तो धनमदमहिताः सेविता वा कियन्तः
देशा दृष्टाः कियन्तो बहुविभवयुता भूपवर्गाः कियन्तः
राद्धा धीराः कियन्तो महिमचयचिताः शास्त्रवादाः कियन्तः
सौख्यं लब्धं भवद्भिः कियदिति सुधियो ब्रूत सत्यं प्रकाश्य ॥३॥

केचिज्जल्पन्ति सौख्यं मिलति नववयोराजितायां रमण्यां
केचिज्जल्पन्ति सौख्यं मिलति नवखगभ्रजितायामटव्याम् ।
केचिज्जल्पन्ति सौख्यं मिलति हिमगिरेः संपतन्निर्झरिण्या-
मित्थं धावन्ति मर्त्या विधिविहितसुखाशाः सचिन्ताः समन्तात् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौख्यं लब्धुं समेताः श्रृणुत जनसमूहा द्रुतं तथ्यवाचः
सौख्यं प्राप्तुं क्षमध्वं कथमिति च विनाशोन्मुखेष्वेषु हन्त !
वाणी दत्ते प्रमोदं रसमधुरिमवाग्भङ्गिभिस्सारपूर्णै–
स्तां सेवित्वा निकामं कथममरसुखं नैव किं भो लभध्वम् ? ॥५॥

एषा नूत्ना विचित्रा मधुरमधुझरीवर्षका सारपूर्णा
सम्पूर्णा सूक्तिरत्नैर्मनुजजनिहिताधायिनी भावपूर्णा,
विस्तीर्णा पूर्वकालाद् विबुधजनमनोहारिणी रूपपूर्णा
विद्वद्वर्गे नितान्तं जयति सुकविताकामिनी रागपूर्णा ॥६॥

उद्यानं तावदेकं जयति बुधसमाजे मनोहारि भव्यं
शब्दा अर्थाश्च यस्मिन् स्थिरतरतरवः व्यापृता भूरिभागे ।
माधुर्यौजःप्रसादाः स्फुटितसुमनिभा रीतयः पत्ररूपाः
वाच्यालङ्कारशाखाः सकलजनमनोहारि रूपं रसाश्च ॥७॥

उद्यानेऽस्मिन् प्रविष्टो ललितपदलसद् भूरिरागां सुरक्तां
काञ्चिद् विच्छित्तिभूषां दरमुकुलितदृग्रीतिमध्यां सुमध्याम् ।
रस्यैर्वाचो विलासैरधिकतरवशे वर्तिनीं द्राग् विधाय
भुङ्क्ते योऽसौ स धन्यः स विविधसुखभुक् सैव जेता स मान्यः ॥८॥

अत्यन्तं सौखमाप्तुं श्रयत किमुधनोन्मादिनो भेदभाजः,
यद्वा रम्भाशिरीषोपममृदुदयिताङ्गानि किं संश्रयध्वम् ।
आनन्दं किन्नु दद्यात् गुरुमयनियमैस्संश्रितो योगमार्ग–
स्तस्मादास्वादकामा रसमयकविताकामिनीमाश्रयध्वम् ॥९।

या शङ्कालोभमोहप्रभृतिदुःखदवैर्नित्यमभ्यर्दितानां,
दीनानां दुःखदावद्रुतदलनविधौ शीतला वारिधारा ।
या ब्रह्मास्वादकल्पं सुखयति च सुधास्राविभिर्वाग्विलासैः,
सेयं वाणी नसेव्या वदत कथमहो सौख्यलाभाय धीराः ॥१०॥

एषा त्वन्यैव सृष्टिर्मधुरनवरसैः केवलं ह्लादरूपा,
या सृष्टा काव्यकर्त्रा रुचिररचनया लोकबाह्यैर्निमित्तैः ।
अन्तस्तत्त्वं समेषामखिलमपि द्रुतं बोधने या समर्था,
सैषा भाषा कवीनां कथमिह नितरां सेवनीया न किं भोः ! ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रित्वा कारुण्यवृत्तं सकलजनमनोरोदने या समर्था,
वृत्तेऽसौ हास्यजाते निखिलमपि जगद् हासयत्येव नूनम् ।
वृत्तैरुत्साहपूर्णैरथ जनमनसो दीपने या क्षमाऽऽस्ते,
सैषा वाणी सुधन्या जयति कविकृता सर्वसम्पत् स्वरूपा ॥१२॥

एषा जीर्णा न भूता न भवति नपुनर्भाविनी जातु लोके,
नित्यं नूत्ना सुरूपा रमयति विविधैरङ्गसौन्दर्यसारैः ।
अन्तर्निःसीमतोषं जनयति सुधियां वाग्विलासैर्विचित्रैः-,
कीर्तिं प्रीतिं ददाना जयति कविकृतौ भारती विश्ववन्द्या ॥१३॥

आख्यानैर्देवतिर्यङ्नरविषयगतैः प्रेरणादायिवृत्तै–
रेषा कान्तात्मशैल्या नयति जनबलं स्नेहसद्भावमार्गम् ।
लोकोत्थानाय स्वात्मार्पणमपि सुजनैः कार्यमित्थं ब्रुवाणा,
तन्वाना विश्वमैत्रीं जयति जनमनःस्थायिनी काव्यवाणी ॥१४।

कालिदासार्चनम्

उत्तोल्योत्तोल्य खड्गं गहनतमतमोदैत्यनाशे प्रवृत्तां
कालीं कालाभ्रमूर्तिं प्रणतजनमनःपूरणे दत्तचित्ताम् ।
भक्त्युद्रेकैर्वचोभिर्ललितपदविलासैस्समाराध्य धीरः
लेभे वैदुष्यसिद्धिं सुकविगणपुरोगण्यतां कालिदासः ॥१॥

विश्वस्मिन् काव्यकारा अजनिषत कियन्तस्सुधासूक्तिमन्तो
जायन्ते शिष्टभाषाविरचनपटवो वा जनिष्यन्त एके ।
माधुर्यावेशधन्यं सकलजनमनस्स्पर्शिवृत्तं गृहीत्वा,
काव्यं प्रस्तोतुमन्यः क्षमत इह जनः कालिदासात् परः कः ! ॥२॥
कस्मिन् वृत्ते पदं किं समुचितमथवा रीतिरौचित्यपूर्णा-
ऽलङ्काराः के प्रभावं विदधति, रचनासिद्धिदः को गुणः स्यात् !
किं कथ्यं हार्दभावं स्पृशति किमु चमत्कारकं वर्ण्यजात-
मेवं सौन्दर्यसारं मिलति हि सकलं कालिदासीकाव्ये ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धृत्वा सौहार्दभावं स्थिरतरमधिकं भ्रातरः सम्मिलन्तु
शीलं सम्यग् गृहीत्वा स्वकुलविधिमथो योषितः पालयन्तु ।
आर्यादर्शानुसारी नृपतिजनतयोजायतां स्नेहबन्धो
मर्यादासेतुवद्धा चिरमिह भवताल्लोकयात्रा विशिष्य ॥४॥

नेतारः स्युर्गभीरा अकुटिलमतयो निर्मदास्सत्त्वसारा-
स्तद्वद् नेयोभवेयुर्विगतमदकलापारगाश्शीलवत्यः ।
सर्वे वर्णा लभन्तामुचितमवसरं स्वस्वकार्याणि कर्तुं
वृत्ताद् हीनो न भूयादथ जननिकरो जायतां नैव दीनः ॥५॥
नारीरत्नं सुरक्ष्यं चलति ननु यतो लोककार्याणि सम्यक्
स्वंस्वं कार्यं न त्याज्यं स्वजनकुलहिताधाकं जायते तत् ।
राज्ञालोकः सुशाष्यस्तत इह नृपतेः कीर्तिलाभो महीया-
नित्यं सौभाषितैस्तैजयति बुधसभायामसौ कालिदासः ॥६॥

गोदारेवादिनद्यः सुखदकलध्वनीन् श्रावयित्वा वहन्त्यः
कृत्वा लोकोपकारं प्रचलत सुजनाश्चेति सन्देशमाहुः ।
ब्रह्मावर्तालकाद्या विपुलजनपदा दिव्यशोभां दधाना
लोको जीव्यात् सुकीर्त्या किमु ब्रुवत इमे कालिदासीयकाव्ये ॥७॥
लोके वर्षा वसन्तस्तपनशिशिरयुग् हैमकालः शरच्च
पङ्कं पुष्यं विदाहं जडतनुविधुती स्वच्छतामेव दद्युः ।
सर्वातिक्रान्ततृप्तीरथ निरतिशयं सौख्यमाप्तुं तृषा चेद्
धीराः शीघ्रं श्रयध्वं मधुरमधुझरं कालिदासीयकाव्यम् ॥८॥

लोके बल्ल्यः सपुष्पाः कतिचिदवसरे सन्ति चैता अपुष्पा
स्तद्वत् सर्वास्तटिन्यः कलुषतदितरद्देहचक्रं धरन्ति ।
काव्ये वै कालिदास्ये विषयनदनदीपुष्पवल्ल्यः सदैवा
ऽम्लानं कालुष्यहीनं निरतिशयहृदाहृद्यरूपं धरन्ति ॥९॥

हैमो भूभृत्समुच्चोऽभ्यधिकजडतरः किं सुखं स्थायि दद्याद्
नद्यो वक्राङ्गसाराः कुटिलजडतरास्ताः सुखं किं प्रदद्युः ।
वृक्षावल्यो हृचशेषाः स्थिरजडवपुषः किं ददत्येव सौख्यं
तस्माद् धीरा भजध्वं सुकविगणनुतं कालिदासीयकाव्यम् ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वादप्राणैकधाम्नां नवगणनयुतानां रसानां समेषां
श्रृङ्गारोऽसौ रसेशो वचनमिति बुधाः सन्ततं प्राहुरेव ।
काल्याः दासस्य काव्यं यदि नयनगतं नैव स्यात् सत्सभायां
शृङ्गाराश्रित्य प्रोक्तं सकलकविवचस्तर्हि यायान्निरर्थम् ॥११॥

स्वर्गः सौख्यस्य धामेति विबुधपरिषद्गीतमेतन्न दृष्टं
सोमः पीयूषवर्षीति निगमगदितं प्रोषिता नानुभूतम् ।
कौमारं संभवं तद् रघुकुलचरितं मेघदूतं तथाऽन्यद्
येनाऽधीतं रसाढ्यं क्षयरहितसुखं हन्त तेनैव भुक्तम् ॥१२॥

अर्थिभ्यो वित्तजातं सततमिह ददत् सार्वभौमोऽपि राजा
स्वंरङ्गीकृत्य रङ्कं त्वरिततरमसौ राजराजीकरोति ।
इत्थंभूतोऽपि शश्वद् हृदि शममधिकं भूपतिस्संनिधत्ते
दृष्ट्वा चैतच्चरित्रं द्रवति नहि मनः कस्य काव्ये विशिष्टे ॥१३॥

आवन्त्या उच्चशोभामनुपमसुषमामङ्गवङ्गोत्कलानां
प्रासादोद्यानशोभास्पदवपुरलकां राजराट्राजधानीम् ।
माहिष्मत्याः प्रकामं विभवचयवपुर्दिव्यकैलाशशोभा
मित्याद्येकत्र द्रष्टुं पठत बुधवराः कालिदासीयकाव्यम् ॥१४॥

केचिज्जल्पन्ति दिव्ये सुरयुवतिगणे मेनकाद्याः सुरूपा
अन्ये व्याख्यान्ति भूमेर्विवरतलगता योषितो रूपवत्यः ।
दिव्यं तत्कण्वपुत्र्या रुचिरमनुपमं रूपराशिं न दृष्ट्वा
स्वं विज्ञम्मन्यमाना अपि बुधनिचयाः किं वितथ्यं गदन्ति ॥१५॥

लोकं लोकं प्रकृत्या मृदुतरकमनीयं स्वरूपं समन्तात्
तत्काव्येऽसौ निवेष्टुं रसिकरुचिकरं योऽभवद् दत्तचेताः ।
तस्यैवं सूक्तिरत्नोज्जलतनुकविताकामिनीरञ्जकस्य
निश्शेषाणां गुणानां परिगणनविधौ को भवेत् सक्षमोऽत्र ॥१६॥

भूलोके संस्थितानां रुचिरनदनदीशैलरथ्यागृहाणां
तद्वद् रम्ये द्युलोके स्थितसुखसतेर्वर्णनेऽसौ प्रवीणः ।
औचित्यालम्बिवर्णैः सुललितपदवाक्सन्ततीनां प्रयोगै-
र्विद्वद्वृन्दस्य तुष्ट्यै क्षमत इह बुधाः कालिदासो न चान्यः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दोषैश्शून्यं गुणैः संभरितमयमनोल्हादि लोकानुकूलं
धीरोदात्तं गभीरं चरितमिह प्रबन्धेषु गायन् मनोज्ञम् ।
सर्वस्वं लोकसेवाव्रतधरणविधावर्यपद्भ्यो जनेभ्यो
कर्तव्यं वित्तमर्त्या इति गदति जनान् कालिदासो मनीषी ॥१८॥

●

न गदतु कोऽप्यसंस्कृतपदं वचनं मनुजः

आचार्य हरिशरण उपाध्यायः, तनहुँमण्डलस्थः

पशुपते ! तव भूतिविभासिते
किमधुना नयपालमहीतले ।
नयवतां विदुषामपि चेतसि
द्रविणमेव चिराय सुखायते ॥१॥

न सुरभाषितमत्र सुसंस्कृतं
पठितुमिच्छति कोऽपि जनो वत ।
सुकृत-भोग-सुखान्यवनीतले
दिवि च साध्वपवर्गफलं यतः ॥२॥

यदि परिष्कृतभूरिमनोहरा
जगति सौम्यतमा च सुधारणा ।
क्वचन लभ्यत एव तदोत्तमा
'जयतु संस्कृत' मेष महान् ध्वनिः ॥३॥

ध्वनिरयं जनकल्मषनाशनं
प्रकुरुते च नरं शुभदर्शनम् ।
मदविमोहतमांसि जिघांसति
सुमनसां मनसोऽपि मलं हरेत् ॥४॥

भुजगभूषण ! हे गिरिजापते
तव कृपा यदभूत् करुणामयी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इयमजायत भूरथ मैथिली-
गिरिसुतायशसा च महोज्ज्वला ॥५॥
सुचरितेन सतां च महात्मनां
गुणवतां विदुषां वयुनेन च ।
सदृशमस्ति समुत्तमगायनं
जयतु संस्कृतमत्र महान् ध्वनिः ॥६॥

कविकुलाय रसं प्रददाति यो
भुवि सुमङ्गलमावितनोति च ।
रसनयाऽऽकलनीक्रियते हृचयं
रसयुता रसना हि तदा भवेत् ॥७॥
विधिरसौ वलवान् यदि तर्हि मे
रसमयी रसना स्मरतादिदम् ।
अनुदिनं निगमामृततुल्यकं
जयतु संस्कृतमेव विदां वचः ॥८॥
श्रृणु मम जान्हवीधर ! गिरीश ! वचो निखिलं
प्रसरतु राष्ट्रके सकल ईश्वरभावमतिः ।
जयतु सुसंस्कृतं मधुरमेतत् कोऽपि वदेन्
न गदतु कोऽप्यसंस्कृतपदं वचनं मनुजः ॥९॥

राज्ञी पुष्करिणी धन्या संस्कृतावासधारिणी

ठाकुरप्रसाद आचार्यः, दाङमण्डलस्थः

अरूपाऽप्यामूर्ता स्फुटमधुरवर्णामृतमयी
पुराणे यातापि प्रतिपदनवार्था रसवती ।
परापि स्वात्मस्था सततममृता मर्त्यभुवने
श्रुतिस्यन्दानन्दा किमपि सुरवाणी विजयते ॥१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचित्रा मूर्तेव स्वयममरशिल्पिप्रतिभया
  पुरी गीर्वाणानामिव समवतीर्णाऽवनितले
हिमाद्रे सत्सङ्गे पशुपतिशिरोरत्नरुचिरा
  चिरान्नेपालेऽस्मिन् विलसतितरा कान्तिनगरी ॥२॥

विधायैनां नैके खलु नृपतयो मुख्यनगरीं
  पुरारातेर्लब्धामवनिमनुवभ्रुःसुमतयः ।
विराजन्ते राष्ट्रद्युतय इव येऽद्यापि परितः
स्मृतिं यान्त्याकल्पं जगति जनतानन्दनकराः ॥३॥

स्वरूपं राष्ट्रस्य स्थिरमिह विधातुं श्रुतिपथं
निधातुं चाक्षुण्णं,पदमनुसरन्तो भुवि सताम् ।
ररक्षुस्ते राणान्वयभवसुराजर्षिप्रवरा
अपि स्ववर्णीं तां नृपतय इवातीतयुगजाः ॥४॥

रणीद्दीपो येष्वप्रथयदिह पुण्यां सुरगवीं
स्थिरीकुर्वन् विद्यालयममरवाण्याः प्रथमतः ।
वटून् वृण्वन् वृत्त्या चतुरधिकपञ्चाशदमलान्
ततो राणाधीरोऽवतरति च तत्पोषकतया ॥५॥

ततो जाते वर्षेऽनिल-कमुख-दुर्गात्म (१९४३) गणिते
चलैश्वर्येणापि स्थिरयितुमलं कीर्तिलतिकाम् ।
स वीरःसम्शेरोऽभ्युदयमगमत्संस्कृतमतिः
समर्प्य स्वां भूमीमविषमविशालां कृषिमयीम् ॥६॥

ततश्छात्रावासं सुखदमथ पाकालयमपि
  वटूनां वासाय व्यतरदशनायापि सुमतिः ।
व्यवस्थां धीरस्याध्वनिविपुलयन् तां द्विगुणतो
वटूनां संख्यां तामनयदपि साष्टोत्तरशतम् ॥७॥

ततः पृथ्वीवीरो नृपतिरपि राज्ञी सुकृतिना
वनैष्टां तां वृद्धिं स्वयमपि तदा भीमसमये ।
पुनर्वृद्धिं जुद्धोऽप्यनयदथ जन्मोत्सवदिने
स रूप्याणां लक्षं व्यतरदपि सङ्कल्प्य यशसे ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो भूयः पुष्टिं गमयति च तां चन्द्रमहिषी
वटूनां संख्याऽतो भवति शतयुग्मा च सदशा ।
क्रमेणेत्थं लोक-ग्रह-रस-कु-संख्यैः (१९९७) परिमिताद्
वटूनां संख्याऽब्दाद् व्यरमदथ सा विक्रममिताद् ॥९॥

समुत्तीर्णश्चास्माद् गहनधिषणः स्नातकगणः
स्वराष्ट्रस्योत्थानाज्जगति गरिमाणं द्रढयति ।
न जानीरन् केऽब्दे विधिमुख-ख-शून्येक्षण (२००४) मिते
कृतं तैः सङ्घर्षं भुवि "विजयतां संस्कृत" मिति ॥१०॥

नृसिंहायन्ते भो ! द्विजवटव एवात्र महसा
न सिंहः प्रासादोऽवनमति यतः किं प्रलपितैः ।
पुरर्षीणामग्रेऽनल इव स वेनारणिभवः
पुरोऽशाम्यद्येषां सुजनदमनोऽमर्षदहनः ॥११॥

प्रजातन्त्रावाप्त्यै रविहय-ख-शून्यायन (२००७) मिते
कृतं वर्षेऽत्रत्यैः खलु विदितमान्दोलनमपि ।
पुनः शक्ति-क्षोणी-ख-नयन (२०१३) मितेब्दे च विहितः
प्रसिद्धः सङ्घर्षो न किमु भुवि सत्याग्रह इति ? ॥१२॥

ततः क्षीणप्रायां जगति सुरवाणीं श्रुतिनिधिं
समीक्ष्येमां क्रान्तिं मतमपि राष्ट्रे सुविदुषाम् ।
तदुत्थानायात्र प्रथयति महेन्द्रो नरपति-
र्व्यवस्थां, छात्राणां षडधिकशतं (१०६) याति गणना ॥१३॥

पुनर्वर्षे प्राणा-यन-ख-नयना- (२०२५) ङ्के परिमिते
बुधैः प्राज्ञैश्छात्रैरपि समनुरुद्धो नृपवरः ।
इमं छात्रावासं स्तुतिगृहयुतं भोजनगृहं
महेन्द्रो राजर्षिर्व्यतरदिह निर्माय यशसे ॥१४॥

राणा-शाह-कुलावतंसपुरुषैः संस्थापिते पोषिते
पूर्णत्वं शरदाङ्गते भुवि शतं हर्षप्रकर्षोऽस्ति नः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मादप्यधिकप्रमोदविषयः श्री विश्वविद्यालयो
वीरेन्द्रान्नृपतेरभूच्छिवशतं जीवन् शतं पश्यति ॥१५॥

राज्ञी पुष्करिणी धन्या संस्कृतावासधारिणी ।
इतोऽपि भूयात्सा प्राच्यज्ञानविज्ञानसारिणी ॥१६॥
संस्कृतं संस्कृतेर्मूलं विद्यामूलं च संस्कृतम् ।
रक्षध्वं संस्कृतं यस्माद् बुधाः स्याम सुरक्षिताः ॥१७॥

जयंतु वीर-मनीषि-नरेश्वरो
 जयतु नो नयपाल वसुन्धरा ।
जयतु पुण्यहिमावनिसंस्कृति-
 र्जयतु विश्वनुता सुरभारती ॥१८॥

●

तत्संस्कृतं दीव्यतु

प्रा. सिद्धिनाथगौतमः, धादिङमण्डलस्थः

नूत्न-प्राण-चिरन्तनं वहुविधं वैशिष्ट्यमित्थं वृहद्
विश्वेऽस्मिन् विबुधै : समर्चितमहो ! विज्ञानज्ञानान्वितम् ।
आर्षं दिव्यमनन्तशक्तिसहितं विश्वोपकारे रतं
सञ्जागर्ति भृशं समर्जितयशस्तत्संस्कृतं वाङ्मयम् ॥१॥

सदवृत्तं ह्यनुशासनं च जगति प्रोल्लास्य नेतृत्वदं
सोन्मेषं महनीयजीवनमथो विस्तार्य विजृम्भितम् ।
आम्नायादि समग्रशास्त्रभरितं शाखाप्रशाखान्वितम्
'दैवी वागि'ति वित्तवृत्तिलसितं तत्संस्कृतं दीव्यतु ॥२॥

नेपाले नरपालपालितजने संस्कारधर्मादिषु
प्रोद्दीप्तं सततं समर्थयति यद्भाषाविभाषादिकम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आचाराञ्जनताजनार्दनगतान् संबद्ध्य चैकात्म्यतः
सोद्घोषं नितरां जयत्वतिपरां तत्संस्कृतं संस्कृतम् ॥३॥

सा संस्कृतिर्या प्रथमा विश्ववारा सरस्वती नः सुभगा मयस्करत्
इतीत्थमुद्घोषमुदात्तरूपं विमृश्य धीराः सततं चलन्तु ॥४॥

संस्कृतं विश्वसर्वस्वं विश्वकल्याणकारकम् ।
ज्ञानविज्ञानसम्पन्नं शाश्वतं च चिरन्तनम् ।
सूक्तिश्चेयं संस्कृतस्योन्नयार्थं कार्या सर्वैः सक्रिया सातिश्रद्धम् ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥५-६॥

●

संस्कृतं जनसर्वस्वम्

प्रा.डा.रामचन्द्रगौतमः
धादिङमण्डलस्थः

दैवीवागितिविख्यातं वेदादिशास्त्रसंयुतम् ।
संस्कृतं जनसर्वस्वं विश्वकल्याणहेतुकम् ॥१॥
सर्वोन्नतिकरं ज्ञेयं सुखामोदप्रयोजकम् ।
दिव्यचक्षुः प्रदं ध्येयमन्तर्मलविघातकम् ॥२॥

विनयोत्पादकं शुद्धं ज्ञानविज्ञानसंयुतम् ।
प्रकाशकं तीक्ष्णबुध्देरुत्कृष्टशीलवर्धकम् ॥३॥
विवेकदं महत्पुण्यं मदमात्सर्यनाशकम् ।
विशिष्टजीवनाधारं श्रेष्ठत्वप्रतिपादकम् ॥४॥

अदृष्टोत्पादकं कर्म-धर्मनिष्ठा प्रवर्तकम् ।
सद्वृत्तजनकं नित्यं दुर्वृत्तस्य विनाशकम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मर्यादितसमाजस्य देशभक्तस्य सर्जकम् ।
चिन्तनीयं सदा सत्यं मननीयं च शाश्वतम् ॥६॥
भूपालपालितमेतत्संस्कृतेः प्राणधारकम् ।
ग्रहणमस्यकर्तव्यं सर्वैरेव हि मानवैः ॥७॥

●

श्रीकृष्णाष्टकम्

प्रा.डा.दुर्गाप्रसाददहालः,
ओखलढुङ्गामण्डलस्थः

अयि नन्दकुमार केशिहन् वसुदेवात्मज कृष्ण मोहन !
विषमे भवसागरे ऽधुना पतितं मां कृपया विलोकय ॥
पृथिवीभुवने यदा यदा सुकृतानां भयदा परिस्थितिः ।
स्वयमेव हरे प्रजायसे वितरन् धर्ममयं प्रशासनम् ॥

भगवन् बहुधा श्रुता मया भवतो जन्मकथाः सुशर्मदाः ।
सकलासु हितासु कंसहन् ! शिखिपिच्छाभरणः प्रमोददाः ॥
महतः परितः प्रसर्पतस्तमसस्तत्वविभेदनाय वै ।
क्षणदासमये प्रभो गुरो ! प्रकटोऽभूत्सुजनान् प्रहर्षयन् ॥

महतां विदुषां कृतात्मनां सततं ब्रह्मसुधासु मज्जताम् ।
हृदि भक्तिफलं ददासि हे ! युगतस्ते खलु भावयाचकाः ॥

यदि वाञ्छसि भक्तिसाधकान् स्वपदे स्थापयितुं कृपावशात् ।
मुरलीध्वनिनाह्वय प्रभो ! तव वंश्यस्ति सखे ! कृपामयी ॥

शरदो निशि पूर्णिमातिथौ भगवन् ! वेणुरवेण गोपिकाः ।
परिहाय समस्तबान्धवान् त्वरितं मुक्तिपतिं हरिं श्रिताः ॥
विकलो ऽस्मि हरे दुरत्ययं भुवनं प्राप्य रुजां करण्डकम् ।
यदि पश्यसि मां कृपादृशा यदुभाग्येश ! विमुक्तिभागहम् ॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तव्यम्

भानुभक्तभट्टराई
पिण्डेश्वरविद्यापीठस्य छात्रः

अस्मद्विकासमवनेः प्रकृतिस्वरूपं
द्वारं प्रकाश्य जननि ! प्रकटीकरोतु
नासीन्न किं जलनिधेर्जलधारपूर्वं
संरक्षितं कमलमेव सपुष्पमस्ति ॥१॥

कथ्यं किमस्ति ? सदने वदने तथा वा
मार्गो हि संप्रति कथं अवरोधयुक्तः ।
लक्ष्यस्य सागरकला यदि सा गभीरा
कि नो भवेत् परहिते जनरञ्जनाय ॥२॥

कार्यं भवेत् खलु सदा गुरुसत्यवाचि
प्राप्तिः फलस्य भवति व्यवधानहीनः ।
अध्यात्मज्ञानमपि चेतनबोधतत्त्वं
संसारसाररहितो ननु भौतिकेषु ॥३॥

श्रृङ्गारशास्त्रकथितं न तु यौनशास्त्र-
मानन्दयुक्तवचने न भवेत् शरास्त्रम् ।
संचाल्यते हि प्रकृतिपुरुषव्यवस्था
स्थिरो भव भवतले मनुजा वसन्ति ॥४॥

आचारज्ञानरहिता पशुतुल्यजीवाः
कोलाहलेन सदने शपथे रमन्ते ।
धर्मं विहाय अपरः परवाक्यद्वन्द्वे
युक्ता जनाश्च हृदये मलिना भवन्ति ॥५॥

विमृश्य कार्यसमयं सुखसाधनीयं
वैज्ञानिकैः समुचितैर्विधिना प्रयोज्यम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाविप्रकाशमधुना हृदि चिन्तनीयं
कर्तव्यज्ञानसफलं फलमातनोति ॥६॥
स्वार्थः सदा विषलता न तु तत्र पुष्पं
सर्वेष्वहं इति पदं खलु वाक्यमात्रम्
पश्यन् समस्तविषयेष्वपि दृष्टिविम्वं
को रोचते छलफलमपहाय दिव्यम् ॥७॥

●

आपातनिपातनिरोधः

आहिताग्निः तीर्थराजआचार्यः

स्मररसरसिकानां योषितां रूपिणीनां
स्तन-वदन-नितम्बाऽऽवेषभूषादिकञ्च ॥
प्रकृतिनिजमहिम्ना भेदभावं विनैव ।
नरनयनमनांसि क्षिप्रमाकर्षयन्ति ॥१॥

अविदित-नरतत्त्वा भोगमात्रैकलक्ष्या
अहितहितविमूढाः कामपूर्तेरतृप्ताः ।
अजवृषभसमाः स्वं मृत्युमप्यस्मरन्तो
मृतिमयमधुकुण्डे मक्षिकावत् पतन्ति ॥२॥

अनुचितफललाभात् सर्वदा निः श्वसन्तो
निखिलमपि धनं स्वं लोकभीत्याऽर्पयन्ति ॥
सकलजनसमाजे दोषमाच्छादयन्तो
ह्यनुतपनसुतप्ताः प्राणमप्युत्सृजन्ति ॥३॥

कतिचन वत नार्यो वीक्ष्य रम्यं पुमांसं
निजवशमुपनेतुं हावभावैर्यतन्ते ॥
मदनदहनदग्धा नेत्रयुग्मं निमील्य
क्षणिकसुखविमुग्धास्तं नरं पातयन्ति ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निजदुरितविपाकाद् गर्भमासाद्य पश्चात्
सकलजनसमाजैर्धिक्कृताः पापदग्धाः ।
अमृतमिव विषं या मन्यमाना जयन्याः (जघन्याः)
स्वकृतदुरितभोगान्मूर्च्छितास्ता भवन्ति ॥५॥

ऋषिमुनिवरदृष्टो धर्मसेतुर्न हि स्याद्
भुवि नृषु पशुधर्मो वार्यमाणः कथं स्यात् !
परिणयनविधानं केन कस्याः कथं स्यात् !
सहजनि-नरनारी-सङ्गमः किन्नु न स्यात् ! ॥६॥

अपि तनय-जनन्योस्तातपुत्र्योस्तथैव
प्रकृतिनियमलभ्यः सङ्गमः केन वार्यः ।
इति च विशददृष्ट्याऽऽलोकनीयं मनुष्यै
र्न हि तु जनसमाजः सर्वदा स्याद् विनष्टः ॥७॥

राजनीतिर्विजयते

ध्रुवभट्टराई, खोटाङ्मण्डलस्थः

सत्ताशासनयोर्न केवलमियं सर्वत्र संराजते
यस्याः सन्ति शरीरिणो वशगता दासायमानाः सदा ।
अस्यां दिव्यगुणा भवन्ति रुचिरा को वास्ति लाभो महान्
सर्वे मोहवशादटन्ति विधिना राज्ये पदाकाङ्क्षिणः ॥१॥

देवानामपि या प्रिया समभवद् दैत्यास्तथा प्रेमिणः
सामान्या जनतापि मोहवशगा वार्तैव का ज्ञानिनाम् ।
त्वं वाञ्छेर्धरणीं महच्च भवनं यानं च मानं धनम्
वैकुण्ठं यदि भोक्ष्यसे नरजनौ सेवस्व नीतीरिमाः ॥२॥

यस्याः शक्तिरतीव विस्मयकरी विध्वंसने, विप्लवे
सैषा निर्वलशालिनी भवति किं राष्ट्रस्य सेवां प्रति ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धान्ते परिहापिते प्रतिपलं सम्पूज्यते गर्दभः
गौस्तु त्यज्यत एव नीतिनिपुणैरेषा मतिर्धार्यते ॥३॥

विद्या निष्फलता प्रयच्छति सदा भाग्यं च संवर्धते
सुन्दर्यश्च विलोकयन्ति भवतां रूपं,स्तुतिं कुर्वते ।
सर्वं सौख्यमिदं विचार्य सहसा संसेव्यते येन वै
सोऽयं नेतृमहाजनो विजयते सर्वेऽपरे बालिशाः ॥४॥

पूर्वं संसदि गम्यते छलवशाद् मन्त्रित्वमाप्ते ततो-
दीयन्ते तदनन्तरं धनचया मन्त्रालयाः केषुचित् ।
पश्चाद् मन्त्रिपदाच्च्युतैर्बलयतैः सङ्घ्यते सम्प्रभौ
प्रस्तावं पतने पदस्य तव वै पञ्जीकरिष्यामहे ॥५॥

पत्नीबन्धुसहायकैरनुगता यात्रा च वैदेशिकी
वार्तामिलनयोः सुखं सुविपुलं वाराङ्गनाभिस्सह ।
भक्ष्याभक्ष्यमतिस्तदा व्ययगता पानेषु गानेषु च
किं किं नैव विधीयते नयविधौ नीत्याऽनयाऽपारया ॥६॥

न शोभते चन्द्रकलाविलासः

मुकुन्दप्रसादलामिछाने
बर्दियामण्डलस्थः

क्षुधातृषातापितमानसेभ्यो
न रोचते भाषणविप्रलापः ।
वर्षर्तुकाले जनवृष्टिहीनो
न शोभते केवलमेघनादः ॥१॥

दारिद्र्यदावानलतापितेभ्यो
न रोचते हास्यकलाविनोदः ।
यथा च ज्यौत्स्न्यामभिसारिकाणां
न रोचते चन्द्रकलाविलासः ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कलङ्कपङ्कैः परिदूषितानां
किं शोभते संसदि सिंहनादः ।
विधुन्तुदे हि ग्रसतीन्दुविम्बं
न दृश्यते चन्द्रकलाविलासः ॥३॥
आपत्पयोधौ विनिपातितानां
किं रोचते दिव्यपुराणवादः ।
गते नु भानौ सरसीरुहाणां
न शोभते चन्द्रकलाविलासः ॥४॥
आसन्नदुःखावलितर्जितानां
नोदेति सत्यं सदसद्विवेकः ।
यथा दिनान्ते हि रथाङ्गनाम्नां ।
न जायते चन्द्रकलाविनोदः ॥५॥

कथं विरच्येत मनः समुन्नतम्

न मे धरायां नयपालको जने
न मे ऽन्तरिक्षे जलवाहको घनः ।
न मे ऽङ्गणे भाति च साधुसङ्गमो
न कूजनं रौति शुभं विहङ्गमः ॥

दिशोऽप्रसन्नाः सलिलं ह्यनिर्मलं
समीरणो नोद्वहतीष्टसौरभम् ।
प्रशान्तवातावरणं प्रदूषितं
कथं विरच्येत मनः समुन्नतम् ॥

न वाटिकायां कुसुमं प्रभुप्रियं
न चारविन्दं विनिविष्टषट्पदम् ।
न वापिकासु द्विजराजविम्बनं
न पौरुषेणाऽस्ति विकासचुम्बनम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परस्परं कार्यविधौ हि तर्जनं
न विद्यते यद्यपि सूचिसर्जनम् ।
सदास्त्यवैधं कलुषं धनार्जनं
तथापि निर्माणमयं हि गर्जनम् ॥

सुरालये तिष्ठति देवमन्दिर-
मवन्धनं पश्यति यत्र ववन्धनम् ।
प्रतिक्षणं मानवदेहपातन-
ममारणं तिष्ठति यत्र मारणम् ॥
प्रशासने वास्तविको न शासको
न मन्दिरे वास्तविकं हि दैवतम् ।
तथापि सर्वर्द्धिमयं प्रभाषण-
ममोघसंघर्षमयं हि गर्जनम् ॥

न पुस्तकं नैतिकता-प्रशिक्षकं
न दर्शनं वाद-पदार्थदर्शकं ।
न चिन्तनं चेतनचित्तरञ्जकं
कथं विरच्येत मनः समुन्नतम् ॥

●

जल-महिमा

डा. बद्रीपोखेल:
काष्ठमण्डपस्थ:

वर्षासु प्रकृतिर्यथा जलवती देवा मनुष्यास्तथा
वर्षाया जलधारयैव सहसा तृप्ता भवन्ति द्रुमाः ।
शोभाया विषये तथेन्द्रधनुषा संवर्ध्यतेऽहर्निशं
मन्येऽहं सकला कला सुविपुला वर्षर्तुजन्यं धनम् ॥

पानीयं नवजीवनस्य विषये हेतुः स्वयं वर्तते
पानीयं यदि नास्ति तत्र जनता धैर्यं किमालम्वते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्नं वा नभवेत् फलस्य च कथा-मात्रं भवेत् सर्वदा
निर्जीवा पृथिवी भवेदिह कथा-मात्रा भवेयुर्जनाः ॥

सन्तुष्टा जलविन्दुना सुरगणा विज्ञो हि सर्वे वयं
पितृणामपि भाव्यते खलु जलैरल्पैः सदा तर्पणम् ।
स्वास्थ्यं वौषधनिर्मितौ जलकणान् लोकः प्रयुङ्क्ते सदा
भूयाद् वारि सुधासमं जगति नः सर्वापदां वारकम् ॥

विश्वं पाति हरिर्यथा जलनिधौ मात्स्यं वपुर्धारयन्
राजानोऽपि जलीयशक्तिचयने ग्रीष्मे यथा भारविः ।
सन्नद्धा नवराष्ट्रनिर्मितविधौ वाचा गृणन्तो जलं
को वा ऽ स्त्यत्र जलं विनैव जनताः पातुं क्षमो भूतले ॥

●

दिव्यपीयूषधारा

प्रा. दैवज्ञराजन्यौपाने
भोजपुरमण्डलस्थः

मधुर-सरस-भाषा वाग्मिनां मन्त्रगीतं
कठिन-जटिल-ग्रन्थि तर्क-संप्रेषणाय ।
विविध-विषयवाणी धीर-गम्भीर-भाषा
विकसतु शततं नो दिव्यपीयूष-धारा ।

जयतु संस्कृतम्

जयतु शोभना काव्य-संस्कृति-
र्जयतु वाग्मीनां प्रौढ-चेतना ।
जयतु मौलिकी संस्कृतार्चना
जयतु सर्वदा राष्ट्र-गौरवम् ।

जयतु कोविदकाव्यकौमुदी
जयतु ध्यायिनो धारणा-धृतिः ।
जयतु निर्भयं ह्यार्यगौरवं
जयतु संस्कृतं काव्यवाङ्मयम् ।

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमङ्गलमूर्तये नमः

गोपालवैद्यः, किञ्जल्कः

शुण्डादण्डमतिप्रकाण्डमभित
स्तुण्डं प्रचण्डाऽधरं
गण्डे कुण्डल-कुण्डलीकृत-वलत्
ताटङ्क-पङ्काऽरुणम्
चण्डांऽशोरिव मण्डनं विनयते
प्राक्ताण्डवाऽऽडम्बरा
द्धेरम्बाय हताऽन्तराय-तिमिर
स्कन्दाय वन्दामहे

महेश-स्तव-पञ्चकम्

कलत्रपुत्रादिक-बन्धु-वर्गै-
स्तिरस्कृते, वित्तवयोबलैश्च
क्षीणेऽतिशोकाऽऽकुलिते महेश !
त्वमेकमात्रं शरणं सदैव ! ॥१॥

मिथ्याऽभिलाषा-परिपूर्त्य-भावो-
द्वेगे, परद्रोहदवाऽग्निदग्धे,
स्वार्थाऽन्धकूपाऽन्तरिते महेश !
त्वमेकमात्रं शरणं सदैव ॥२॥

अनागतव्याधिविचिन्तनाया
गनागताऽऽपत्परिकल्पनायाम्
सदाऽतिभीते दलिते महेश !
त्वमेकमात्रं शरणं सदैव ॥३॥

व्यर्थप्रयत्ने विकले वियोगे
वैचित्यके दिग्भ्रमितेऽसहाये
नान्योऽस्ति मे कोऽपि च सान्त्वनाय
त्वमेकमात्रं शरणं महेश ! ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हर्षे विषादे च जयेऽजये च
मानेऽपमाने विभवे च दैन्ये
कालक्रमेण भ्रमतो ममेह
त्वमेकमात्रं शरणं महेश ! ॥५॥

●

नेपालदेशः

श्रीरामसापकोटा,सिन्धुपाल्चोकमण्डलस्थः

ग्रामे ग्रामे करुणघटना स्नेहसौहार्दशून्या ।
क्षेत्रे क्षेत्रे गरलसहिता धूमसङ्घो जिहीते ॥
दीनां हीनां सभयकुटुतां रिक्ततां रुग्णताञ्च ।
गृह्णातीयं नयनसलिलं कुत्र सानन्दता च ॥१॥

तिष्ठन् पश्यन् वदतु मुकुटोत्तुङ्गरूपेण शैलः ।
देवा याता क्वच मुनिगणा अद्य नेपालदेशः ॥
दैवी भाषा अपि विगलिता संस्कृतिः स्मर्यते न ।
स्तुत्या मान्या सुरगणमता भारती सभ्यता च ॥२॥

नेपालाङ्के स्वपिति भगवान् शेषशय्यां निधाय ।
शैले शैले विबुधसहितौ तापसैः सेवितोऽपि ॥
नेपालेऽस्मिन् प्रकृतिविषमा दृश्यते लोकयात्रा
सम्प्रत्येनां सुनयकुशलःस्वस्थितौ स्थापयेत्कः ॥३॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जागृयात् कोऽपि शूरः

जीवनोऽधिकारी,लमजुङमण्डलस्थः

विश्वेऽस्मिन् विश्ववन्द्या सकलजनहिते व्यापृता मानवीया
याऽस्माकं पूज्यवर्यैर्मुनिभिरधिगता योगवृत्तिं निविष्टैः ।
आमृत्योर्या सुधीभिः सविनयमनिशं स्वीकृता भावनाऽऽसीद्
दृष्ट्वेदानीं नराणां कलुषितचरितं साऽन्यलोकं गता किम् ॥१॥

बालं, सद्यः प्रसूतं शिशुमविकसितं भ्रूणमप्यत्ति लोको
राज्ञां नीतावनीतिः प्रसरति भुवने क्रूरकृत्यं नराणाम् ।
स्याच्चेत्पृथ्व्यां विवेकः कविगणगणितो लेशमात्रोऽपि दुष्टाः
किं भक्षेयुर्नरादाः शिशुपिशितमहो ! भर्जितं तप्ततैले ॥२॥

घस्रे घस्रे जनानां मृतिरवनितले जायते जन्यजन्या
घ्नन्त्येदानीं स्वबन्धूनपि विगतदया बन्धुताऽपि प्रयाता ।
सर्वं दृष्ट्वापि पृथ्वी कथमपि सहते बाष्पमन्तर्वहन्ती
तस्माद्विद्वत्समाजः कथयति वसुधानाम सर्वंसहेति ॥३॥

राष्ट्रे जागर्ति नेता त्रिभुवनविजयीवाऽसुरो नैव शूरः
प्रच्छन्ना काऽपि नारी प्रभवति कुलटेवाऽद्य कोषक्षयाय ।
संसद् बन्ध्याऽस्ति वार्ता प्रचलति च सदा स्वार्थपूर्त्यर्थमेव
खे दुष्टे धूमकेतौ समुदितवति कः शान्तिमाप्नोति भूमौ ॥४॥

प्राप्तुं राज्याधिकारं विवदति सततं लुब्धको नेतृवर्गः
शिक्षाक्षेत्रेऽप्यनीतिर्नहि पठितजना योग्यकर्माऽऽप्नुवन्ति ।
भ्रष्टाचारस्य वृद्ध्या प्रतिदिनमवनौ दुर्गतावुद्गतायां
कः स्याच्चिन्ताविहीनो विपदि निपतितो राष्ट्रवादी नरो यः ॥५॥

शान्तिर्नास्त्यद्य देशे, विधिनियमगतं जायते नैव कार्यं
नीयन्ते वित्तलोभादनुदिनमबला बन्धुभिर्विक्रयाय ।
अहन्येवाऽऽयान्ति चौराः परधनहरणे प्राप्तलुण्टाकदीक्षा
बोढुं दुर्वृत्तभारं तदपि च विवशा दृश्यते मातृभूमिः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौम्यः सत्यो विवेकी सुललितवचनः कोविदो राजनीतौ
सच्छीलः सत्यवादी परहितनिपुणः स्वार्थवृत्या विहीनः ।
नेतृत्वे दूरदृष्टिः सुचरितमहितो राष्ट्रमुन्नेतुकामः
सोऽस्माकं राष्ट्रदेवः प्रवितरतु शिवं जागृयात् कोऽपि शूरः ॥७॥

●

स्वकीयं राष्ट्रम्

श्रीरामोऽधिकारी
काभ्रेमण्डलस्थः

हैमस्रोतो गिरितटगलन्निर्झराश्चातिदूरम्
घर्म्मातप्तां समतलमहीं स्नापयन्त्यत्र चित्रम् ।
यस्माद् देशात्प्रवहति नदीन्द्रावती गण्डकीयम्
जीव्याद् राष्ट्रं दिनकरनिभं विश्वभूमण्डलेऽस्मिन् ॥१॥

आसीत्स्थानं ननु भगवतः पूर्वजानामृषीणा-
मेतद्द्रष्टुं गिरिमुभयतो देवदवैः स्वधाम ।
न्यस्तं भाति प्रथितकृपया मुक्तितीर्थादिवृन्दम्
राष्ट्रं जीव्यात् प्रथितयशसा मन्दिरव्रातरम्यम् ॥२॥
शौर्येणास्य नतः समोन्नतगिरिः पद्भ्यां सनाथीकृतः
बालेन स्वकपादपद्मयुगलेनालङ्कृतः साम्प्रतम् ।
नेपालध्वजपट्टिका सगरमाथस्योपरि प्रोन्नता
जीव्याद् राष्ट्रमिदं हि चन्द्ररवियुक् कीर्तिध्वजालङ्कृतम् ॥३॥

मेची पूर्वदिशि प्रसीदति महाकाली प्रतीच्यां दिशि ।
नानावर्णसुवेषसंस्कृतियुतो देशो मुदा राजते ।
सव्येऽस्मिन् गिरिकन्दरस्सुविततः पुष्पं गुराँसञ्च नः ।
पञ्चश्रीपृथिवीश्वरैर्नृपतिभिस्सोऽयं युतः काशति ॥४॥

प्राजातन्त्र्यसुतन्त्रशासनवधूर्विश्वैः परिगृह्यते
एनामद्य प्रतीक्ष्य राष्ट्रमनुजो भूयस्समालिङ्गति ।
राज्ञैषा सुचिरं मुदा नववधूः संसेव्यते साम्प्रत-
मैश्वर्यं हि समानयेत् सुविपुलं नेपालराष्ट्राङ्गणे ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऐतिह्यमस्ति विपुलं कनकाक्षराढ्यम्
स्नेहेन राष्ट्रपरिवर्तननीतिकाम्यम् ।
सर्वत्र संस्कृतवचः प्रसरीसरीतु
संस्था जयेज्जयतु संस्कृतनामिकेयम् ॥६॥

●

कथं पोष्यते संस्कृतम्

सूर्यनाथसुवेदी,लमजुङमण्डलस्थः

नेपाले हिन्दुदेशेऽस्मिन् संस्कृतस्य प्रशिक्षणम् ।
कर्तुं विद्यालयाः सन्ति पुर्यां ग्रामे यथा तथम् ॥१॥
संस्कृतस्य विकासार्थं वृत्तयः सन्ति दापिताः ।
छात्रावासाश्च निः शुल्काः प्राप्यन्तेऽत्र व्यवस्थिताः ॥२॥

तथात्वेऽपि विलोक्यन्ते छात्राः संस्कृत पाठकाः ।
विद्यालये ऽल्पसंख्यायां को हेतुः स्याद् विचार्यताम् ॥३॥
परं समीक्ष्य दृष्टे तु सौविध्यरहिता अपि ।
आङ्लभाषारताश्छात्रा लभ्यन्ते बहुसंख्यकाः ॥४॥

भाषेयं कर्मकाण्डार्था नाऽन्यक्षेत्रे प्रयुज्यते ।
प्रायशो ब्राह्मणैः पाठ्या इति शोचन्ति केचन ॥५॥
संस्कृतस्यैव ज्ञानेन तेषां भाषा विकास्यते ।
इति तत्त्वं न जानन्ति गृह्णन्ति भ्रान्तधारणाम् ॥६॥

संस्कृतस्य महत्त्वं वा संस्कृतस्योपयोगिताम् ।
वैदेशिका विजानन्ति स्नेहेन महता युताः ॥७॥
विधातुं संस्कृतं सर्वैः स्वीकार्यं व्यवहारतः ।
पाठ्यक्रमादिनिर्माणे पूर्वदृष्ट्या कृतं बहु ॥८॥

अतोऽपि पूर्णातां दातुं विधातुं व्यावहारिकम् ।
दृश्यते बहुकर्तव्यं पाठ्यांशपरिमार्जने ॥९॥
कविगोष्ठ्यदिकं कृत्वा शास्त्रार्थोऽपि नियोजितः ।
अधुनाऽनुसृतो मार्गः संस्कृतार्थे प्रशस्यते ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धान-कार्यार्थं विद्वांस उच्चशिक्षिताः ।
काले काले प्रेषणीया जर्मन्यां भारतेऽपि वा ॥११॥
भारते संस्कृतस्यार्थे ऽस्मिन् वर्षे विहितो बहु ।
गते निरीक्षणे तत्र लाभो भवति निश्चितम् ॥१२॥

अनुदानादिवृद्धया वा दत्वा भौतिकसाधनम् ।
सर्वकारेण दातव्यः प्रश्रयोऽत्र विशेषतः ॥१३॥
वैदेशिकैः स्वदेशस्थैर्विद्वद्भिर्मिलिता सभा ।
गाम्भीर्येण परामृष्टे फलं दास्यति नूतनम् ॥१४॥

ऋषिभिर्गुम्फितं तत्त्वमनुसन्धाय यत्नतः ।
यच्छन् लोकोपकाराय सदा जयतु संस्कृतम् ॥१५॥
विश्वशान्त्यै जगद्भूत्यै राष्ट्रसंमृद्धिहेतवे ।
धर्मसंस्कृतिरक्षार्थमग्रे गच्छतु संस्कृतम् ॥१६॥

●

कालजयी

प्रह्लादपोखेलः

प्रतिदिनं प्रातः काले
उषसं दुहितरं पुरस्कृत्य
तेजस्वी सूर्यः
नवयुवतीस्वरूपाया हिमान्याः सीमन्ते सिन्दुरं समर्पयति
दिनं यावत् रसवतीं प्रेयसीं सस्नेहमालिङ्ग्य
प्रतिसन्ध्याम्
ओजस्वी सूर्यः
नवविवाहितां प्रेयसीं परित्यजति
तदा अवरोद्धुं न शक्यन्ते
प्रियतमवियोगस्य वियोगजन्यान्यश्रूणि
अथ शोकाकुलाभ्यां नेत्राभ्याम्
कुत्रचित् गण्डक्यो निस्सरन्ति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुत्रचित् कौशिक्य उद्भवन्ति
कुत्रचिच्च कर्णाल्यो वहन्ति ।

सन्ध्याकाले च
सन्ध्यामयीं राज्ञीं पृष्ठतः कृत्वा
रात्रिं यावत् रजन्या सह गुप्तवासानन्तरं
कालजयी सूर्यः
अप्रत्याशितरूपेण, पुनरपरप्रातः काले
प्रेयसीरूपां हिमानीं चुम्बितुं ससम्भ्रमं समायाति,
तदा च, निरोद्धुं न शक्यन्ते
अप्रत्याशितमिलनस्य हर्षाश्रुधाराः
अथ च, हर्षाकुलाभ्यां नेत्राभ्याम्
कुत्रचिद् गङ्गा निस्सरन्ति
कुत्रचिच्च वाग्मत्यो वहन्ति ।

●

क्व गतो मम देशः

जगत् प्रेक्षितः,दैलेखमण्डलस्थः

न कोकिलः कूजति क्वापि कश्चित्
न सारिका रौति शुकश्च कश्चित् ।
न वाति हैमः पवनश्च कश्चित्
न भाति भानुः शिखरेषु कश्चित् ॥

हिमालयो भाति नतो भविष्यन्
जलस्य राशिरतलं गमिष्यन् ।
रक्तानि पुष्पाणि च पल्लवानि
म्लानानि भान्ति करमर्दितानि ॥

न शान्तिघोषो न च कान्तिरस्ति
प्रसारिता केवलभ्रान्तिरस्ति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न रक्षितो मौलिकगौरवञ्च
न निर्मितं चिन्तनसौरभञ्च ॥

निजं परं वा नहि वेत्ति कश्चित्
स्वमातृभूमिं च छिनत्ति कश्चित् ॥
संरक्षको भक्षक एव कश्चित्
सत्यार्थवक्ता न क्वचित् विपश्चित् ॥

उत्कोचविद्रोहच्छलैश्च बद्धः
दुष्कृत्य-भ्रष्टाचरणैः पिनद्धः ।
विराजते ह्यत्र खलस्तु नेता
न राजते अत्र जनो विजेता ॥

क्व भीम-पृथ्वी-बलभद्रसिंहाः
खलस्तु क्वचाद्यतननेतृवर्गः ॥
क्व स्वाभिमान्नोनतशौर्यश्रृङ्गम्
क्व दासवृत्यास्खलितञ्च शीर्षम् ॥

क्व शान्तिभूमिः क्व च भ्रान्तिभूमिः
क्व बुद्धभूमिः क्व च युद्धभूमिः ॥
क्व शस्यश्यामा हरिता च भूमिः
क्व रक्तनद्या भरिता च भूमिः ।

क्व मेऽस्ति देशो गिरिराजभालः
गवेषणीयो नवपादचालैः
जाड्यं हरज्जागरणैकमत्यम्
उद्भावनीयं नवदेशकाव्यम् ॥

युद्धेन सह योद्धव्यम्

किमर्थं क्रियते युद्धं युद्धायेति च केवलम्
गम्यते नाशता किञ्च मारयन् सर्वदुर्बलम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धूमायते च सर्वत्र युद्धाग्नेरेव सा शिखा
घनगर्जनवद् घोषाः श्रूयन्ते चात्र दुस्सहा :॥

चालयन्ति कथं तत्र भुशुण्डीं स्वजने जनाः
परमाण्वग्निचूर्णानि प्रक्षिपन्ति पुनः पुनः।
धरण्यो लोहितास्सर्वा : दृश्यन्ते रक्तसागरा :
किं ग्रामे किं नगर्याञ्च शवायन्तेऽत्र नागरा : ॥

न केनापि च युद्धेन कृता सृष्टिश्च श्यामला
दग्धाऽस्ति हरिता भूमिः परं पुष्पितकोमला।
हिरोसिमा न हि दृष्टा नागासाकी च किं त्वया ?
रुवाण्डा इथियोप्यादिदेशानां दुर्गतिः परा ॥
नहि युद्धं समाधानं मरणं मारणं तथा
हिंसया जायते हिंसा दहनात् दहनं यथा।
स्रष्टारो न विनश्यन्ति सृजन्ति नूतनं जगत्
विश्वस्मा एव जीवन्ति-जीवयन्ति परम्परम् ॥

'जीव-जीवय' तस्मात्त्वं धारय विश्वधारणाम्
अहिंसा-शान्ति-सत्यानां शाश्वतां सुविचारणाम्।
किमर्थं धार्यते हिंसा सृष्टेः संरुध्यते गतिः
युद्धेन सह योद्धव्यं किं शान्त्या सह युध्यते ?

●

संस्कृतस्य महत्वम्

शिवरामचालिसे 'शास्त्री'
संसंविवि, बनारसस्थः

भूसृष्टिस्तु कदाऽभवज्जलमयं, वाऽतिष्ठदेतत् जगत्
सूर्याचन्द्रमसोर्गतिश्च कियती शब्दादिकानां गुणा :।
वस्तूनां परमाणुपीलुपिठरादीनां समेषामपि
ज्ञानाय ध्रुवमेव शान्तमनसा पापठ्यतां संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

के वा भारतपूर्वपश्चिमदिशौ ? का दक्षिणा ? कोत्तरा ?
के नेपालहिमालसीमनि पुराऽभूवंश्च देशास्तथा ?
नीतिः का परराष्ट्रभूमिविषये ? राष्ट्रे स्वकीये तथा ?
तज्ज्ञानाय सदा मुदा मुहुरहो संसेव्यतां संस्कृतम् ॥

आसृष्टेरपि सर्वभूमिवलये स्वातन्त्र्यरत्नोल्लसत्
प्रोद्यत्प्राञ्जलचारुकीर्तिमहिमश्रेणीसमुद्भासितः
हिन्दूराजपरम्परापरिलसत् षाड्गुण्यसाद्गुण्यधी
रराजीतु निजैर्गुणैर्मम पुनर्नेपालदेशो महान् ॥

●

नेतृदशकम्

चन्द्रमणिनेपालः, धरानस्थः

रामानुगामिषु निवृत्य जनेषु शेषाः
नारीत्वपुंस्त्वरहिता अतिलुब्धचित्ताः ।
ते सिंहसद्मनि शनैर्विविशुः सगर्वाः
दैवीयदृष्टिरमला विफला न जाता ॥१॥

निर्वाचनावसर एव मुखं प्रदर्श्य
आश्वासयन्ति सरलानवमूल्य वाग्भिः ।
पश्चाद् विधाय विपरीतमथ क्व यान्ति
स्वार्थो नरान् हि निभृतं विमतीकरोति ॥२॥

मैत्री न, देशसुगतिर्न, च सत्यनिष्ठा
नो वा हुतात्मरुधिरं, न निजप्रतिष्ठा ।
मानं न, नापगमभीरनुशासनं न
किन्त्वत्र मञ्चविभवः प्रियवस्तु नेतुः ॥३॥

संभाषणे तरुणकोकिलवत् कलाढ्याः
सञ्चायने ऽजगरवत् सुरसास्यतुल्याः ।
कुर्वन्ति सिंहसदने कुकपेश्चरित्रम्
किं प्रापयन्ति वितलं जनतां धरित्रीम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वाधीनता जनहितोन्नतिलब्धये च
संतत्यजु : ससुखजीवनमेव नैके
तद्रक्तमूल्यमपकृत्य च तत्समीहाम्
द्रुह्यन्ति केवलमघाय निजोदराय ॥५॥

सौभाग्यमप्यपहृतं रमणा विलासाः
आबालवृध्दवनिता जनिता अनाथाः
लोकेषु विंशतिजनैरपि या न लभ्या
हयेकस्य तस्य सदने सुविधा पुरःस्था ॥६॥

पूर्वं सुजीर्णवसना परगेहवासाः
पादूविहीनचरणाश्चिपिटाशना ये ।
खर्वार्घहर्म्यधनिका अधुना रमन्ते ।
नेतार एव कुहका उत वञ्चकास्ते ॥७॥

कुस्पर्ध-वित्तपदलोलुपता-प्रलापा
कर्मण्यता-कलह-दौर्हृद-दुष्टचित्ताः ।
निर्दुष्ट-शान्तजनताहनने प्रवृत्ताः
नेतृत्वलुब्धहृदया किमतो भवेन्नः ॥८॥

ते सिंहसद्मशयिता अपि नेतृसिंहाः
वाञ्छन्ति छिद्रमनिशं नहि मूषकाश्च
तन्वन्त्यथान्यचरणं न तथापि गृध्राः
क्रोशन्ति फेरुवरवत् न जनैः सुगम्याः॥९॥

नावं यथा जननि ! बालिशनाविकाय
स्वार्थान्धदुष्टहृदयाय तनुं न देहि ।
निःस्वार्थसेवितनयं कृपया प्रसूय
मज्जन्तमुद्धर विभो खलु लोकवृन्दम् ॥१०॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रितुङ्गभावना

पं. रूद्रमणि अधिकारी

नेपालदेशाभिजना महाशया जानन्तु सर्वे मम हृद्विभावनाम् ।
संश्रूयतां संयत मानसा धिया संमृश्यतां सनिगमानुवर्तिनः ॥१॥

मुख्यं मुखं ह्यस्ति यथा कलेवरे नेपाल देशोऽस्ति तथा धरातले ।
यद् व्योमकूटः सकलोच्च एष मूर्धेव नित्यं जगतो विराजते ॥२॥

अत्रैव सृष्टिं प्रथमञ्चकार ह धाता वराहानुमतो विचक्षणः।
वक्त्रात्करोर्वङ्घ्रिभिरस्य जज्ञिरे वर्णाश्चतुर्धा इति वैदिकी श्रुतिः ॥३॥

मुख्यस्तु विप्रः करजस्तु क्षत्रिय ऊर्वङ्घ्रिजातौ क्रमशो विडन्त्यजौ ।
जाता यदङ्गान्मनुजा तदङ्गवत्कर्माणि कुर्युस्त्विति वेदचोदना ॥४॥

जातिस्तु जन्मप्रभया नृणां भवेन्नो कर्मणा जातिरिति श्रुतौ श्रुता ।
यत् कुत्रचित्कर्मभवेव दृश्यते तत्कस्य चिद् वै वरदानतो भवेत् ॥५॥

देहस्य भागा निजकर्मकारिणाश्चेत्स्वस्थ एष प्रबलः प्रर्वतते ।
देशस्थवर्णा निज कर्म कारिणश्चेदेषदेशः प्रबलः प्रर्वद्धते ॥६॥

वेदास्तु साक्षाद्भगवत्प्रदेशिता अन्यानि शास्त्राणि मनुष्यजानि वै ।
सर्वज्ञ ईशोऽल्पधियस्तु मानवा वेदाः प्रमाणं ह्यत एव नेतरत् ॥७॥

तस्माद् वयं वै भगवत्प्रणोदितं धर्मं समालम्व्य विहाय चेतरत् ।
स्वं स्वं चरित्रं विमलं विधाय देशस्य भूत्यै सततं यतामहे ॥८॥

को नाम लोके पुरुषार्थसारवित् त्यक्त्वा स्वधर्मं परधर्ममाश्रयेत् ।
पारक्यधर्मो विपथे निपातयेत् स्वधर्ममाश्रित्य परं पदं व्रजेत् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्थेषु लुब्धा विषयाशयान्धका मद्योन्मदा पण्यबधूषु लम्पटाः ।
कर्त्तव्यमुत्सज्य जनप्रतारका मा भूम सैषा सुजनेषु याचना ॥१०॥

भवतु संपदा संयुतो जनो हरतु संशयं श्रीजनार्दनः ।
वसतु मानसे नित्यमीश्वरो जयतु संस्कृतं वेदसंमतम् ॥११॥
श्लोका एकादशामी श्रीरुद्रमणिनिर्मिता : ।
भूयासुर्विपथस्थानां सदा सत्पथदर्शिनः ॥१२॥

●

सार्थं शुभं संस्कृतम्

लोकनाथ आचार्य
काष्ठमण्डपस्थः

अस्माकं गरिमा सुचिन्तनरताश्छात्रा भवेयुर्यदा ।
आचारं गुरुतां, विचार्य मनसा कर्तव्य-संबोधकाः ॥
जायन्ते गुरवो हि तन्मयतया संस्कारवन्तस्तदा ।
सत्यं स्वच्छतमं भविष्यति सखे ! सार्थं शुभं संस्कृतम् ॥१॥

रम्या वैदिकसंकृतिः सु-सुखदा स्मृत्वैव तां संस्कृतिम् ।
ग्राहया मानविकी क्रिया कुशलता स्वाचार-संस्कारता ॥
आह्लादं सकलान् प्रयच्छतु सदा सद्ज्ञानयुक्तो द्विज : ।
नेपालो हि तदा वदिष्यति स्वयं सार्थं शुभं संस्कृतम् ॥२॥

पश्याऽसौ सुखरूपकोऽपि पृथिवीं संधारयन् सर्वदा ।
भद्रायैव करोति दुःखसहनं तस्माद् वयं पाठका : ॥
विश्वेषां पुरूषोत्तमस्य चरितं स्मृत्वैव तत् सत्कृते ।
स्वाचारं परिपालयाम जगतां सार्थं शुभं संस्कृतम् ॥३॥

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाग्वती

नवराजकट्टेलः
गोरखामण्डलस्थः

शुद्धाञ्च नित्यां विपुलाञ्च धारां
प्रवाह्य वेगैर्धरणीं निषिच्य ।
कल्लोललोलैर्ललनाललामै-
र्विभूष्य भूमिं तटिनी विभाति ॥१॥

शैलाद् विनिर्गत्य धरां विघोष्य
मर्त्यान् मृगान् पक्षिगणाञ्च शुभ्रान् ।
ददासि रे जीवनमीरयन्ती
त्वं जीवनं जीवनहेतुभूतम् ॥२॥

वृक्षं लतामौषध-पुष्पकुञ्जं
विधूय धूलिं ह्यमृतं वितीर्य ।
शस्यादिसुश्यामलभूमिभाग-
मामोद-मोदैर्हरितायसे त्वम् ॥३॥

शैलं विभिद्याशु जलैः सुधारै-
स्त्वं यासि रे निर्झरझझरैर्वा ।
वाञ्छन्ति देवास्तवपादरेणुं
पातुं सलीलं सलिलं यथा त्वाम् ॥४॥

विश्वस्य पापस्य हि नाशिनी त्वं
मनुष्यवर्गाय मतिप्रदात्री ।
रुजश्च तापस्य च हारिणी त्वं
व्याधेर्जनानामपि हारिणी त्वम् ॥५॥

शैलात्प्रभाते ह्यवतीर्य सूर्यः
शनैः शनैः स्वीयकरं प्रसार्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नानञ्च शुद्धं विदधाति नित्यं
　　व्युत्थाप्य लोकं, तव पादमूले ॥६॥

रात्रौ-सुसन्ध्या-समयेऽपि मातः
　　सोमः सशोभं किरणं प्रसार्य ।
स्नातीह पूते सलिले त्वदीये
　　स्रोतस्सु केशाँश्च वितीर्य देवि ॥७॥

चन्द्रोऽथ सूर्यस्तव तोयविम्वे
　　रात्रिन्दिवं मञ्जति रश्मिमाली ।
सुवर्णपिण्डः किमु राजतो वा
　　तथा दरीदृश्यत एष भूयः ॥८॥

केनाऽपि कालेन वशीकृतासि
　　पापेन सर्वं परिवर्तितासि ।
स्वच्छं स्वरूपं तव कुत्र यातं
　　गात्रं कथं हा ! मलमूत्रभूतम् ॥९॥

कृम्यादिसत्त्वैर्गलितं शरीरं
　　प्रबाधते ते विपुलं स्वरूपम् ।
शुभ्रं स्वरूपं तव केन नीतम्
　　कृष्णायसे त्वं कलिकालदोषैः ॥१०॥

वातश्च दुष्टो धरणी च दुष्टा
　　तीरं सुदुष्टं ननु वालुकाश्च ।
द्रुमा नु दुष्टा विहताश्च पापैः
　　देवालयाः जीर्णतया कुरूपाः ॥११॥

बुध्दिश्च दुष्टा हृदयञ्च दुष्टं
　　गात्रञ्च दुष्टं नयने च दुष्टे ।
गतिश्च दुष्टास्ति नृणामिदानीं
　　दुष्टं जगद् देवि कथं स्थिताऽसि ॥१२॥

लोकः क्षिपत्यत्र मलप्रणालीं
　　गन्धावहो वाग्वति ! तीरमार्गे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्वायुरेवं प्रतिवाय नित्यं
    जनाँश्च सर्वान् सरुजान् करोति ॥१३॥

पुरा पवित्रा कियती त्वमासीः
    लोकान् यथा पावयसि स्म नीरै :।
अपूर्वशक्तिस्तव कुत्र याता
मालिन्यपूर्णं तव रूपमस्ति ॥१४॥

दृष्ट्वा स्वरूपं तव भीतभीताः
    न केऽपि मर्त्या निकटं प्रयान्ति ।
स्पृशन्ति नो कृष्णजलं त्वदीयम्
    पश्यन्नवस्थां तव पीडितोऽहम् ॥१५॥

प्रेयसीस्मरणम्

१. प्रिये !
सुचिरात् तव प्रतीक्षायां समयमतिवाहच
नीरसजातायां जीवनयात्रायां गच्छन्नस्मि, धावन्नस्मि,
मम मनसः तन्त्र्यस्त्रुटिताः,
मम मस्तिष्ककोषाः सङ्कुचिताः
मम इन्द्रियाणां गतिश्च अवरुध्दा,
तस्मात् प्रिये, हा प्रियतमे,
कस्मिँश्चित् अहं गतिरहिते उष्णताहीने, सारविहीने,
नरकङ्काले परिवर्तितोऽस्मि ।

२. प्रिये हा प्रियतमे !
आगच्छ मम मनसः कोषे कोषे,
आस्थायाः जीवनस्य च आशां सञ्चारय,
मम मनसः कोषे कोषे
मम मनसः तन्त्र्यां तन्त्र्याम्
जीवनसङ्गीतस्य जीवनास्मितायाश्च ध्वनिं ध्वनय,
आगच्छ प्रिये !
मम हृदयस्य स्नेहवाटिकायां लोकध्वनिं ध्वनय,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मम हृदयस्य अणौ अणौ प्रेमध्वनिं ध्वनय,
प्रिये !
तव प्रत्येकेनागमनेन
मम शुष्कं चेतः व्युत्थितं भवति,
प्रिये !
तव प्रत्येकं सुललितेन वाणीनादेन,
मम तन्द्रितासु शयितासु च नाड्डीषु
आशायाः पुष्पवाटिका व्युत्थिता भवन्ति ।
प्रिये !
तव प्रत्येकं स्मितेन मोहकहासेन च
पारावारविलोडनस्य उत्साहं
पर्वतमालावहनस्योन्मेषं च धारयामि ।
अतः प्रिये !
मदीयासु शुष्कजीवनधारासु
आगच्छ, जीवनपुष्पं संवाहय
आगच्छ, जीवनदीपं संज्वाल्य
आगच्छ, ध्वान्तेषु ध्वान्ततमेषु जीवनेषु आगच्छ ।

३. आगच्छ, मह्यं सकलं जीवनं देहि,
आगच्छ , मह्यं जीवनस्य पूर्णतां देहि,
अहं मम मनस्तव मनसि प्रक्षिपामि
अहं मम संवेदना तव नाडीषु प्रक्षिपामि
द्वयोः हृदययोः हृद्ध्वनिः एकस्य एव जीवनस्य
सङ्गीतं ध्वनयतु,
द्वयोः हृदययोः गतिः एकस्याम् एव यात्रायां चलतु,
तव अञ्जनविभूषिते नयने
मम चपले मनसि विलसतः
तव रक्तौ मृदुलौ च रदनच्छदौ
मम चञ्चले हृदये नरीनृत्यतः
कुन्दकुड्मला इव श्वेताः दन्ताः दन्तपङ्क्तयश्च
मम मनसश्चित्रपटे दरीदृश्यन्ते,
अतः आगच्छ प्रिये !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जीवनशक्तिमेकीकृत्य
द्वौ एव एकीभूय:
नूतनस्य जीवनस्य अभिव्यक्तिं कुर्व: ।

४. तव मनसि ममोपस्थिति:
मम मनसि तव सुमुपस्थिति:
एकस्य जीवनस्य प्रारम्भ एव,
अनादित: तव स्वरूपस्य प्रतिविम्बानि मयि सन्ति
अनादित: मम स्वरूपस्य प्रतिविम्बानि त्वयि सन्ति,
अत: आगच्छ प्रिये !
मनोबीजानि वपाम: सर्जनाया: पुष्पवाटिकासु
आगच्छ
मनो बीजानि वपाम: सभ्यताया: शस्यश्यामलभूमिषु ।

५. वयं स्रष्टु: अन्तहीनस्य सृष्टिप्रवाहस्य
नवीनकोषा: स्म
वयमनन्ताया: सृष्टेर्मूलभूता: स्म
वयमाद्यन्तरहिताया: सृष्टिशक्ते:
प्रकुसुमलतिका: स्म,
अतोऽहं तव प्रतीक्षायां समयं व्यत्येमि
जीवनस्य सृष्टिम् अन्विष्यन्नस्मि ।
अहं तव प्रतीक्षायां समयमतिवाह्य
जीवनस्य दृष्टिमन्विषन्नस्मि
आगच्छ, प्रिये !
जीवनयात्रायाम् आगच्छ ॥

जयतु संस्कृतम्

डा. मान्क्रेट त्रोई, जर्मन

प्रकाशस्य प्रकाशिका भाषा संस्कृतम्
सत्यस्य सत्यापिका भाषा संस्कृतम्
सुन्दरताया: सौन्दर्यं संस्कृतम्
त्रिसत्यस्य मूलं संस्कृतम् । जयतु संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शास्त्रज्ञानम्

प्रा. ज्ञानमणिनेपालः

सुखाकाङ्क्षां त्यक्त्वा परहितरताः शास्त्रकुशला
अविश्रान्ताः कार्ये जनहितमनुस्मृत्य सततम्
कृतीः कृत्वा दिव्या द्रुततरगतावद्य समये
यशश्शेषा धन्या वचसि विजयन्ते सुकृतिनः ॥१॥

यथा दिव्यज्ञानं जनमनसि सम्पूर्य यशसा
दिशः कृत्वोद्दीप्ताः पुनरपरिवृर्तिस्वपथगाः ।
महाभागा विज्ञा नहि जगति ते शोकविषयाः
परं तेषां शास्त्रं कथमिव जनेषु प्रसरतु ॥२॥

स्वार्थः परार्थः

आत्मनो हितमाहर्तुं यतते सकलो जनः ।
स्वार्थेच्छैव हि लोकस्य नियोक्त्री कार्यसाधने ॥१॥
परन्तु बुद्धिबाहुल्यात्तेषां स्यात् कार्यदक्षता ।
परिस्थित्यानुकूल्येन फलदाऽफलदा कृतिः ॥२॥
वलीयसी बुद्धिरेव जनानां कार्यसिद्धये ।
तथा विहीनो ना कश्चित् साधयेत् स्वार्थमात्मनः ॥३॥
अर्जनीया बुद्धिरेव स्वार्थिभिश्च नरैरतः ।
अन्यथाऽन्धे तमस्यन्ते पात्यन्ते खलु तेऽपरैः ॥४॥
तृणाय मत्वा स्वार्थेच्छां परोपकृतिशालिनः ।
बुद्धिमन्तोभर्वयुर्ये दुर्लभास्तादृशा नराः ॥५॥
निजं हितं तथाऽन्येषां ये कुर्युर्बुद्धिपूर्वकम्
ध्रुवं भो महती सिद्धिः फलेन संयुनक्ति तान् ॥६॥

काव्यरसबोधः

येषां सुधामाधुरिकातिशायि काव्यं समालोक्य मुहुर्विभाव्य ।
प्रीतोऽतिबेलं सुमनस्समूहो मदोद्गतो भृङ्ग इवाद्य हृष्टः ॥१॥
तेषां सुकाव्यामृतनिर्भराणां सम्यग् रसास्वादसुखानुभूतिः ।
शास्त्रेषु बोधश्च समं समेतादस्मासु यत्नश्च तदर्थमस्तु ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हा हन्त ! तं स्तौति जनो दुरन्तम्

रमेशघिमिरे,

कठोरताजन्मभुवं नृशंसं प्रजासु दौःस्थ्यं प्रतिपादयन्तम् ।
नेतारमाविष्कृतवैरभावं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१॥
आच्छिद्य सम्पत्तिमथ प्रजानां स्वदेहपुष्ट्यै निरतं प्रकामम् ।
विनष्टसौजन्यमतीव दुष्टं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥२॥

निर्वाचने वक्रिममेरुदण्डं जये पुनः प्राप्तयथास्थितिं तम् ।
स्वार्थे लगन्तं समयानुसारं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥३॥
सङ्गोप्य कुक्षौ छुरिकां सुतीक्ष्णां मुखे तु रामेति सुभाषमाणम् ।
विवेकमास्फाल्य सदा वसन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥४॥

आनन्दसत्तां खलु नान्यलभ्यां सम्प्राप्य तत्रैव समाधिमग्नम् ।
लोके पुनर्नैव निवर्तमानं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥५॥
खलेषु खेला, सुजनेषु हेला, द्यूतेषु मेला, नियमे च वेला
हीत्थं विचित्रं चरितं चरन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥६॥

आच्छिद्य विद्यार्थिकरात् सुशास्त्रं तत्रैव शस्त्रं विनिवेशयन्तम् ।
राष्ट्रस्य चिन्ताविषयीभवन्तं हा हन्त ! तं स्तौमि जनो दुरन्तम् ॥७॥
कौटिल्यतप्ते नृपनीतिभ्राष्ट्रे भ्रष्टाञ्च बुद्धिं विदुषां निकामम् ।
आस्वादयन्तं मदिराभिरिष्टां हा हन्त ! तं स्तौति जनो दुरन्तम् ॥८॥

वेश्यां गृहीत्वा सततं भ्रमन्तं सभासु गन्धां मदिरां वमन्तम् ।
तं त्यक्तलज्जं नितरां सदोषं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥९॥
शान्तिं सुरक्षां च विधातुमिच्छन्नस्मीति नित्यं खलु भाषमाणम् ।
शान्तां प्रजां किन्तु प्रमारयन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१०॥

ज्ञान्तां कखाद्यां खलु वर्णमालां पूर्णां विधातुं न तु पारयन्तम् ।
'पी.एच.डी.-कानामुपदेशितारं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥११॥
सिद्धान्तनिष्ठेति हि कस्य जन्तोर्नामेति पृच्छां बहुधोद्गिरन्तम् ।
देशस्य सौभाग्यविधिं हरन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्भाषणे तु प्रथमीभवन्तं सेवाविधाने खलु मौनवन्तम् ।
आचारमार्गात् सततं स्खलन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१३॥
विकासकार्ये ह्युपयोजय त्वं वित्तं ददामीति विदेशिभिश्च ।
दत्तेन वित्तेन गृहं भरन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१४॥

दुष्टाः सहायाः परिपुष्टकाया, जाया परस्त्री, सुधियश्च हेयाः ।
ग्राह्यं च वित्तम् इति यच्चरित्रं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१५॥
कृष्णं चरित्रेण तथापि लोकभारप्रवृद्धौ सततं प्रवृत्तम् ।
दुःशासने वर्धितमित्रभावं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१६॥

वेश्यासु चिन्ता न तु देशभक्तिः, सुरासु वृत्तिर्न तु सत्प्रवृत्तिः ।
इत्थं चरित्रं खलु दर्शयन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१७॥
वैदेशिकानां भरणं विधातुं प्रचोष्य रक्तं नयपालमातुः ।
अनेन नाकारि किमद्य दुष्टं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१८॥

लज्जां, घृणां,मानवतां विहाय भुक्त्वा नराणां पललं सदैव ।
वृकस्य शैल्या कृतदेहवृत्तिं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥१९॥
कदा तु काङ्ग्रेसदलं भजन्तं कदा तु कम्निष्टदलं भजन्तम् ।
स्वार्थानुसारं विदलीभवन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥२०॥

दृष्ट्वा पुरः शत्रुदलं प्रनृत्तं पत्रं कदल्या इव सञ्चलन्तम् ।
सम्भाषणे त्विन्द्रमपाहरन्तं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥२१॥
अन्योन्यमेलां जनतां समस्तां दुर्भावनाभिः प्रविभाजयन्तम् ।
दुर्भावनानां तु विलासभूमिं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥२२॥

विमानमार्गेण सदा भ्रमन्तं विमानयन्तं जनतां समस्ताम् ।
उत्कोचसङ्कोचविहीनमेवं हा हन्त ! तं स्तौति जनो दुरन्तम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालः केन रक्ष्यते ?

अच्युतरमणअधिकारी

सुधा भारती भाषणे भाषमाणे
सदा कार्यकाले च तस्या उपेक्षा ।
सदातङ्ककार्येषु सम्पोषणीयाः
मतं प्रापणीयाः परं ज्ञानहीनाः ॥

कथं किं कथं किं कथं कारणीयाः
परं स्वार्थकार्ये सदा पूरणीयाः ।
जंनो नेतृवर्गे स्थितो भ्रष्टमार्गः
परं देववत् पूज्यतेऽसौ किमर्थम् ॥

शिवोऽप्यर्धनारीश्वरः सञ्जहाति
निजां पार्वतीं भक्तिमार्गेण युक्ताम् ।
भवेत्तस्य चेत्सर्वदा स्वार्थबुद्धिः
तदा रक्ष्यते केन नेपालदेशः ।

●

संस्कृतस्य अद्यतनव्यवस्था

तीर्थराजशर्मा अधिकारी
लमजुङ्गमण्डलस्थः,

जानीमः किञ्चिद्दशकात्तुपूर्वं
मर्यादिता मानवता यथाऽसीत् ।
न विद्महे केन प्रभावितोऽयं
'मुद्दण्डो विशृङ्खलितः समाजः ॥१॥

गूढार्थसंमिश्रितप्रश्नमेतं,
निशम्य केचिद्बहुधा वदन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अदूरगं चोत्तरमस्य हेतुः
शृण्वन्तु सर्वे सुरवाङ्मयस्य ॥२॥

जनाः समस्ता सुखमाप्तुकामाः
विज्ञानवादे च समुत्सुकास्ते ।
अध्यात्मगर्भा सुखशान्तिमूला
विस्थापिताऽभूत् सुरलोकवाणी ॥३॥

औदार्यमालम्ब्य विकासक्षेत्रे
प्रसारणीया सुरवाग् बहुत्र ।
आबालवृद्धा वनिताश्च नित्यं
कुर्वन्तु वार्ता व्यवहारमस्याम् ॥४॥

इयं यदा संस्कृतमूलभाषा
शैथिल्यग्रस्ता नितरां बभूव ।
तदैव जातीयसुसंस्कृतिश्च
लतेव छिन्ना फलपुष्पहीना ॥५॥

स्वार्थान्धता लुण्ठति यत्र तत्र
अर्थार्थमन्योऽनुचितं करोति ।
ते सर्वक्षेत्रे धनिनो भवन्ति
दरिद्रतां याति सतां समाजः ॥६॥

वैषम्यमालोक्य मनुष्यजातं
नह्यस्ति माता धरणीप्रसन्ना ।
रोदित्यथेयं गलदश्रुनेत्रा
वर्षर्तुधाराऽश्रितशर्वरीव ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदा जयतु संस्कृतम्

प्रा.दामोदर शर्मा चालिसे
दाङमण्डलस्थः

द्रागर्थे संस्कृते प्रोक्तं 'शीघ्रम्' इत्यस्ति पण्डितैः ।
तदेव प्रोच्यते तस्मिन्नर्थे तमिलपण्डितैः ॥१॥
महाराष्ट्रीय-भाषायां महाराष्ट्रीयपण्डितैः ।
स्थाने भणेतिशब्दस्य 'भण' इत्येव भण्यते ॥२॥

नैपाल्यामपि भाषायां किञ्चिदेव विकार्य च ।
स्थाने भणेतिशब्दस्य 'भन'शब्दः प्रयुज्यते ॥३॥
संस्कृते प्रोच्यते यस्मिन्नर्थे ज्ञैः 'मातरः' पदम् ।
प्रोक्तमस्त्याङ्ग्लभाषायां तस्मिन्नर्थे 'मदर्' पदम् ॥४॥

संस्कृते प्रोच्यते यस्मिन्नर्थे ज्ञैः 'पितरः' पदम् ।
प्रयुज्यते पदं तत्र 'फादर्' इत्याङ्ग्लपण्डितैः ॥५॥
स्थाने च यूयमित्यस्य 'यू'पदं ते प्रयुञ्जते ।
वयमित्यस्य तु स्थाने 'वी'पदं ते प्रयुञ्जते ॥६॥

भ्रातरश्च निगद्यन्ते 'ब्रदर्'शब्देन तैर्जनैः ।
स्वसारस्तु निगद्यन्ते 'सिस्टर्'शब्देन तैर्जनैः ॥७॥
इत्थं विचार्यमाणासु सर्वभाषासु दृश्यते ।
समत्वं कुत्रचिच्छब्दे सदृशत्वं च कुत्रचित् ॥८॥

भवत्येतेन सुस्पष्टं भाषास्वेतासु काचन ।
जननी सर्वभाषाणामन्यासाम् इति विन्नृणाम् ॥९॥
किन्त्वेतेन न सुस्पष्टमेतत् संजायते विदाम् ।
इयमेवास्ति भाषाणामन्यासां 'जननी' इति ॥१०॥

एतन्निर्णयलाभार्थं विचारस्त्ववशिष्यते ।
विहितोऽस्ति विचारः स सावधानतया मया ॥११॥
श्रावयामि विचारं तमस्यां संसदि सांसदाः ।
श्रूयतां सावधानेन मनसा सर्वसांसदैः ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कदाचिदपि या भाषा परिवर्तनमेति न ।
सा भाषा सर्वभाषाणामन्यासां जननी ध्रुवम् ॥१३॥
अनादित्वमनन्तत्वं तस्या एव तु युज्यते ।
परिवर्तनशीलानामन्यासां तु न युज्यते ॥१४॥

अनादिकालतोऽनन्तकालपर्यन्तमेकता ।
विद्यते संस्कृतस्यैव न साऽन्यासां तु विद्यते ॥१५॥
पत्युर्ज्येष्ठस्तु यो भ्राता 'जेठाजू' इति जल्पितः ।
पुराकाले स एवाद्य 'दाजू' इति निगद्यते ॥१६॥

पत्न्याः ज्येष्ठस्तु यो भ्राता 'जेठान्' इति पुरोदितः ।
स एवाद्य जनैः सर्वै'र्दाजू' इति निगद्यते ॥१७॥
एतादृशीनां भाषाणां कथङ्कारमनादिता ।
अनन्तता वा सुवचा ? शोचितुं या न शक्यते ॥१८॥

भाषा संस्कृतमेवास्ति या कदाचिच्च कुत्रचित् ।
विकारं भजते नैवम् एकाकारैव वर्तते ॥१९॥
अतः संस्कृतभाषैव सर्वदा सुव्यवस्थिता ।
अन्यासां सर्वभाषाणां जननीति सुयुज्यते ॥२०॥

अर्थात् संस्कृतमेवासीत् मातृभाषा पुरा नृणाम् ।
सर्वेषामपि,तेनेयं ज्ञातव्या सर्वमानवैः ॥२१॥
ब्राह्मणानामियं भाषा नान्येषामिति तु भ्रमः ।
भ्रमोऽयं सर्वथा दूर्यो हृदयात् सर्वमानवैः ॥२२॥

स्थितेन हृदयेऽनेन भ्रमेणैव समैर्नृभिः ।
मातृवत् मातृभाषेयं संमान्याऽपि न मान्यते ॥२३॥
बहूनां विद्यमानोऽयं भ्रमः संस्कृतघातकः ।
विद्वद्भिः सर्वथा त्याज्यः सद्भिः संस्कृतरक्षकै : ॥२४॥

पठनीया न भाषेयं मानवैर्ब्राह्मणेतरैः ।
इति शास्त्रेषु कुत्रापि विधानं नैव विद्यते ॥२५॥
स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति त्रयी निषिद्धाऽस्ति न निषिद्धं तु संस्कृतम् ॥२६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्राह्मणानां यथा स्वीया भाषेयं विद्यते, तथा ।
अन्येषामपि वर्णानामियं स्वीयैव विद्यते ॥२७॥
स्वत्वं समानमेवास्यां भाषायां विद्यते नृणाम् ।
विप्राणां नाधिकं,न्यूनं नान्येषां, ज्ञायतामिदम् ॥२८॥

अतः सर्वैवर्णैर्भवतु पठितेयं सुरगवी ।
सुकण्ठस्थीकर्तुं भवतु रटितेयं सुरगवी ।
बहिः स्यान्नो कण्ठात् सततमपि तत्रैव वसतु ।
कदाचिन्नो कण्ठाद् बहिरपि सतीयं विलषतु ॥२९॥
अर्थात् संस्कृतभाषैव मूलमस्ति सनातनी ।
अन्यासां सर्वभाषाणां मूले सेकः सुयुज्यते ॥३०॥
न पत्रादिषु सेकेन तथा वृक्षः प्रवर्धते ।
यथा मूले कृते सेके वृक्षः सम्यक् प्रवर्धते ॥३१॥

सप्रयत्नं कृतेनातोऽधीतिरूपसुवारिणा ।
संस्कृतं सर्वदा सेच्यमस्माभिः सर्वमानवैः ॥३२॥
सर्वेषां पुरतोऽन्तेऽहं हृदयेन निवेदये ।
सर्वैरस्माभिरुद्घोष्यं सदा 'जयतु संस्कृतम्' ॥३३॥

●

नित्यं जयतु संस्कृतम्

माधवप्रसादपाण्डेयः,स्याङ्जामण्डलस्थः

दिव्या दीप्तिविधायिनी शुभकरी विद्यावतां भूतिदा
मर्त्येभ्योऽमृतदायिनी सुखकरी रम्या विधेर्भामिनी ।
पश्यन्ती कृतिभिःपरेति विदिता मध्या तथा वैखरी ।
वाग्देवी भुवने सदा विजयते ब्रह्मात्मिका सुन्दरी ॥

त्वं सौजन्यपयोनिधिर्गुणनिधिः कारूण्यवारांनिधिः ।
समृद्धिः सदनेषु सत्यशिववयोर्वृद्धिः कलावारिधि : ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वं सौन्दर्यनिधिर्विधिः श्रुतिपथः सिद्धिस्त्वमेका भुवि ।
त्वं सच्चित्सुखरूपिणी प्रसविनी दृष्टिं प्रदद्यान्मयि ॥

विद्यां रक्षतु शारदे ! करूणया सर्वाः कला रक्षतु ।
राष्ट्रं रक्षतु शारदे ! विवदनाः सर्वाः प्रजा रक्षतु ।
राष्ट्रियं मलिनं चरित्रमधुना सर्वं भवेत् संस्कृतम् ।
सम्पत्तिर्जगतां निधिर्गुणवतां नित्यं जयेत् संस्कृतम् ॥

काङ्ग्रेस-गाथा

जनार्दनधिमिरे, दोलखामण्डलस्थः

विशालकायो गमनेऽसमर्थोऽधुना च,. यः केवलमर्थलालसः ।
स्थितो जगच्छ्वासितुमत्र मञ्चे क्लिष्टं हि कांग्रेसः करोति कार्यम् ।
द्विजिह्वरूपं दलमातनोति कर्तृत्वशक्तिः परिदूषिता सा ।
अहोऽनुतापं सहते महान्तं लौडा-कथोत्थां परितस्तिरस्क्रियाम्॥

दलस्य नेता परियोजनारतस्तथा विरोधी परिखण्डने रतः ।
हा हन्त दौर्भाग्यदशा हि केवलं सुमित्रकृष्णोऽपि पराङ्मुखायते ।
सदस्यपूर्णा समितिभवेच्चेत् गर्जन्ति सर्वे गिरिजायते दलम् ।
अपूर्णसंख्या यदि वै भवेत् चेत् प्रधानमन्त्री न चः सक्षमस्तदा ।

एतद्दृष्ट्वा च श्रुत्वा च गिरिजा दृढनिश्चयः ।
जातोऽस्ति दुर्बलः क्षीणः शुष्केन्धनसमस्तथा ।
सन्तोऽपरः सदा क्रुद्धो नित्यरुष्टश्च दृश्यते ।
दग्धाश्चिन्ताग्निना दन्ताः कृष्णोऽभूत्सार्थकोऽधुना ।

अयोध्यायां स्थितो रामः लङ्कां हि परिपश्यति
लङ्कातो जन्मभूमिश्च दक्षप्रजापतिर्यथा ।
नायोध्यायां न लङ्कायां या क्षीरसागरे स्थितिः
कलौ युगे हि रामस्यं महामन्त्रो हि दुर्लभः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहमेव प्रजातन्त्रम्

माधवप्रसादलामिछाने, बर्दियामण्डलस्थः

मदीया भावना श्रेष्ठा नित्यं राष्ट्राभिवृद्धये
मदीयं कार्यसर्वस्वं नान्यः पुरुष उत्तम : ।
प्राजातान्त्रिकमूल्यानां रक्षणार्थं निरन्तरम्
मम तुल्यं न चान्योऽस्ति यः कोऽपि पृथिवीतले ॥

मदीयैकैव वाञ्छाऽस्ति सर्वदा स्याम् दलेश्वरः
सर्वकारेश्वरश्च स्याम् तत्पश्चात् भुवनेश्वरः ।
मयैव जनतन्त्रेदमानीतं रक्षितं सदा
प्राजातान्त्रिकवादेऽस्मिन् मद्वाञ्छैव प्रशस्यते ॥

मदिच्छाया: विरोधं ये कुर्वन्ति च वदन्ति च
ते राष्ट्रघातिनः सर्वे दण्डनीयाः नराधमाः ।
विपक्षिणो वदन्त्येवमहं हि महिषासुरः
केचित्केचिद् वदन्त्येवमहं हि लवणासुरः ॥

ते वदन्ति मया नित्यं मद्भक्ता एव पोषिताः
सत्कार्यकारिणः श्रेष्ठा देशभक्तास्तु शोषिताः ।
समीक्षकाः वदन्त्येव नाहं तादृशदुर्जनः
नेतृत्वेऽर्पितचित्तोऽहं नेपालहितकारकः ।

मम दोषस्तु एकैवाहंभावो मयि राजते
अन्यानतिशयित्वैव स्थातुमिच्छामि शासने ।
प्रजातान्त्रिकपद्धत्या यदा कार्यं न सिद्धयति
भीषयित्वा तदा सर्वान् स्वकार्यं साधयाम्यहम् ।

मत्पक्षान् परपक्षांश्च कथयामीदृशं वचः
अहमेव प्रजातन्त्रमहं राष्ट्रं समुन्नतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतं पठ्यताम्

छात्रा प्रीति आत्रेयः

आङ्ग्ली च पठ्यताम्
मैथिली च पठ्यताम् ।
पठ्यतामखिलं परन्तु
संस्कृतञ्च पठ्यताम् ।

संस्कृतं मनो भवेत्
संस्कृतं वचो भवेत्
संस्कृता क्रिया भवेत्
संस्कृतं धिया चरेत् ।

संस्कृतं च पठ्यताम्
संस्कृतं च लिख्यताम्
संस्कृतेन संस्कृता
संस्कृतिर्विवर्धताम् ।

सर्वमप्यसंस्कृतम्
संस्कृतं न चेदिह
सर्वमेव संस्कृतम्
संस्कृतं भवेदिह ॥

●

दर्पणः अस्माकं परिचयः

छात्रः अलंकार आत्रेयः

यदा अहं शिशुः आसम्
मया प्रथमवारं दर्पणो दृष्टः
तदा मदीया दन्ताः न आसन्
अहमुत्थातुं चलितुं अपि न शक्नोमि स्म

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्पणो मां तथैव दर्शयति स्म ।
कश्चित् कालं पश्चात्
मया पुनः दर्पणो दृष्टः
यदा अहं सम्यक् स्थातुम्, उत्थातुं धावितुं, कूर्दितं च समर्थो जातः ।
दर्पणे मां यथापूर्वं चित्रयति स्म
महदाश्चर्यम् !
यथा यथा मम स्वरूपं परिवर्तते
तथैव दर्पणमध्ये परिवर्तनं जायते ।
यदा यदाऽहं दर्पणं पश्यामि
तदैवाऽहं दर्पणमध्ये भवामि
किमेतत्
आश्चर्यचकितं मां दृष्ट्वा दर्पणः कथयति-
"अयि बालक !
ममाभ्यन्तरे न केवलं त्वमेव
तव पिताऽपि अस्ति
तव मातामहोऽपि अस्ति
तथैव त्वमपि वर्तसे ।
यदा यदा त्वमात्मानं विस्मरसि
दर्पणं पश्य
यदा यदा त्वं स्वधर्मं स्वसंस्कृतिं च विस्मरसि
दर्पणं पश्य ।
दर्पणस्तव अनुहारः
दर्पणस्तव परिचयः ।

●

देशपीडा

छात्रः महानन्दतिमल्सिना
पिण्डेश्वरविद्यापीठम्, धरानस्थः,

नेपालमानहितगौरववर्धनाय
भाषासुसंस्कृतिकलापरिपोषणाय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्यमस्य जगतो जनतासु नेतुं
विद्वद्गणैर्जनबलैर्मननं विधेयम् ॥१॥

देशो विसंगतिविकारचयनपूर्णः
दिग्भ्रान्तमन्दमतयो नगरे विकीर्णाः ।
राष्ट्रस्य सुन्दरशरीरसमाप्तिकामाः
मूर्खा भ्रमन्ति परितश्च खलस्वभावाः ॥२॥

भेरीमृदङ्गपटहादिकरम्यवाद्यम्
नैवाधुना ध्वनति माङ्गलिकप्रसङ्गे ।
ड्रम्सेटवाद्यकलहैश्च निगीर्यमाणः
पाश्चात्यकष्टकलया शिथिलोऽस्ति देशः ॥३॥

अध्यात्मज्ञानपरिशीलनमेव शास्त्रे
स्वार्थेषु सञ्चरति कौशलनीतिशब्दः ।
वार्ताकरस्य निहिता सुकुमारसूर्ये
निष्पक्षता च जगतः खगशावकेषु ॥४॥

हिंसासु संभ्रमति विज्ञजनस्य बुद्धिः
ये तातमातृसुहृदो विकलाः प्रगल्भाः ।
दुःखानुभूतिसमये तु तथा गलन्ति
म्लानीकृतानि कुसुमानि यथा भवन्ति ॥५॥

चिन्ताविवर्जितजना घनगर्जितेन
त्रस्यन्ति ते तु सहसा बमसंभ्रमेण ।
शान्तेस्तु काननतटेषु विशुद्धतासीत्
तत्रापि संप्रति तु राजभटा भ्रमन्ति ॥६॥+

+२०५८ वैक्रमाब्दस्य ज्येष्ठमासे जयतु संस्कृतम् संस्थया आयोजितायां महेन्द्रसंस्कृतविश्वविद्यालयस्तरीयकविताप्रतियोगितायां प्रथमस्थानप्राप्तैषा कविता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

य॒ प्रत्यहं कठिनकर्मकरोऽपि भृत्यो
रिक्तोदरो भवति चेद् विकलो हि देशः ।
आनन्दसिन्धुशयने भवनारन्तस्थ-
स्तत्स्वेदविन्दुमधुना स्वदते वरिष्ठः ॥७॥

देशस्य दीनवदनं गगनाद् विलोक्य
सूर्यः स्वरश्मिपरिहाससमं करोति ।
रात्रौ हिमांशुरपि शीतलवेन नित्यम्
अश्रून् प्रवाहयति शोकनिमग्नचित्तः ॥८॥

अस्तित्वमूल्यरहितस्य जनस्य वार्ता
भेकस्य कष्टरववत् नगरेषु भाति ।
अन्यानि रम्यवचनानि विगर्हितानि
स्वार्थीयभावशमनाय च कः समर्थः ? ॥९॥

वैज्ञानिकप्रगतिना गतिरोधभूतम्
रक्षास्त्रमेवमधुना हननाय भूतम् ।
विद्युद् विपत्तिजनिका पवनो विषाक्तः
रम्योऽपि सांप्रतमहो ! हि विनाशकारी ॥१०॥

न्यायेऽपि नास्ति समता ममतापि नास्ति
सत्सङ्गतिर्विकलिता कलिकालसारैः ।
हत्या हयसंख्यभवतापपरा विभिन्नाः
संदृश्यते नखशिखागतदेशपीडा ॥११॥

संस्कृतं सर्ववेद्यम्

छात्रः श्रीकृष्ण उपाध्यायः, आचार्य,
विश्वविद्यालयविद्यापीठम्, दाङमण्डलस्थः

संस्कृतं संस्कृतेर्मूलं संस्कृतिः संस्कृताश्रिता ।
संस्कृतेरक्षणायापि वेद्यं सर्वैः सुसंस्कृतम् ॥१॥
कालिदासादयः सर्वे वाङ्मयेऽस्मिन् विशारदाः ।
तेषां काव्यप्रबोधाय वेद्यं सर्वैः सुसंस्कृतम् ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनं ज्यौतिषञ्चात्र भूगोलादिश्च प्राप्यते ।
वास्तुशिल्पादिविद्यायाः स्वरूपञ्चात्र लभ्यते ॥३॥
अध्यात्मभावनाया हि विकासो यदि चेष्यते ।
अवश्यमेव ज्ञातव्यं जनैः संस्कृतवाङ्मयम् ॥४॥

विश्वस्मिन्नधुना शान्तिः प्रायो-लुप्ता प्रदृश्यते ।
मरणं मारणम् एषा नीतिः सर्वत्र दृश्यते ॥५॥
लुप्ता मानवता लोके केवलं भाषणे स्थिता ।
अहो ! बुद्धस्य ज्ञानन्तु कदा कुत्र पलायितम् ॥६॥

एतादृश्यामवस्थायां बुद्धस्य शान्तिरिष्यते ।
संस्कृतं वाङ्मयं ज्ञेयं प्राणिनां सुखदायकम् ॥७॥
"द्यौः शान्ति"रिति गानञ्च सर्वशान्तिं प्रवाञ्छति ।
तादृशं संस्कृतं लोके सर्वैरेवावधार्यताम् ॥८॥

भीषणाद् भयदातुश्च युद्धादुत्सार्य मानवान् ।
शान्तिमार्गे समानेतुं संस्कृतं साधु सक्षमम् ॥९॥

शताब्द्यामेकविंशत्या नष्टां बन्धुत्वभावनाम् ।
प्रादुर्भावयितुं ब्रूते "वसुधैव कुटुम्बकम्" ॥१०॥
भाण्डागारो विशालोऽत्र ज्ञानविज्ञानयोरिदम् ।
जातिवर्णादिसंकोचं त्यक्त्वा ज्ञेयं सुसंस्कृतम् ॥११॥ +

●

+(२०५८ वैक्रमाब्दस्य ज्येष्ठमासे जयतु संस्कृतम् संस्थया आयोजितायां महेन्द्रसंस्कृतविश्वविद्यालयस्तरीयकविताप्रतियोगितायां द्वितीयस्थानप्राप्तैषा कविता ।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रं रक्ष सदा शिव

छात्रः विन्देशदाहालः, वाल्मीकिविद्यापीठम् ।

शिव शम्भो त्रिलोकेश प्रभो पशुपते हर !
राष्ट्रसङ्कटकालेऽस्मिन् ममेदं रोदनं शृणु ॥१॥
नेतृभिर्भक्षितं राष्ट्रं स्वार्थपूर्णैः कुबुद्धिभिः ।
गृध्रैर्लुब्धैर्मांसपिण्डं निर्लज्जैर्भुज्यते यथा ॥२॥

प्रभो ! तेषां दुर्मनसा कथं स्यात् परिवर्तनम् ।
आमूर्ध्नः पङ्कमग्नानां त्रपा नाम कथं भवेत् ॥३॥
भोजनाच्छादनेऽशक्ता निर्धनाः सन्ति भूरिशः ।
केचिन्मद्ये रूप्यकाणि जुह्वति च दिने दिने ॥४॥

विषमे खलु देशेऽस्मिन् धर्मः कुत्र पलायितः ?
न्यायमूर्ते ! त्रिनेत्र ! त्वमन्यायं सहसे कथम् ॥५॥
उत्कोचे पतितं राष्ट्रं हिंसायां परवञ्चने ।
नीतिर्विलुप्ता दुष्टानां भयेन निस्सहायिका ॥६॥

मीनन्यायो नृत्यतेऽत्र बलमेव प्रवर्तते ।
बलहीनजना अत्र म्रियन्ते गृहपालवत् ॥७॥
पाखण्डिभिर्विधर्मस्थैस्त्रोटिता धर्ममञ्जरी ।
शुष्यतेऽनुदिनं द्वीपोत्पाटितेव हि पद्मिनी ॥८॥

अस्मिन् सनातने देशे समायाताऽधिकं विपत् ।
शिरो नास्यति हैमं तद् धरेयं निःश्वसिति च ॥९॥
भीतिग्रस्तेऽनेहसि त्वमेवासि खलु संश्रयः ।
प्रार्थयामि मुहुर्वाचा राष्ट्रं रक्ष सदाशिव ! ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतेऽस्तु मनोमन्ये

विश्वनाथरुपाखेती

संस्करोतीति सर्वेषां जीवनं तत्तु संस्कृतम् ।
रजसस्तमसस्त्यागात् सत्वेन तत्तु संस्कृतम् । ।१॥
प्राचीनतमभाषासु पूर्वा वाक् संस्कृतैव हि ।
सर्वासामपि भाषाणां माता संस्कृतमेव हि ॥२॥
ब्रह्मविद्या च विज्ञानं यस्यां ज्ञानं प्रतिष्ठितम् ।
तस्यां सर्वाणि शास्त्राणि विद्यन्ते विविधानि च ॥३॥
कालक्रमेण वा क्वापि ताडने पीडनेऽपि सा ।
सर्वंसहाऽस्ति मातेव न च क्रुद्धा कदाऽपि सा ॥४॥
वयमज्ञाः संभवेमः कुमाता न कदाचन ।
अतोऽस्तु सर्वदा मन्ये सर्वेषां संस्कृते मनः ॥५॥

आधुनिकस्य नेतुरात्मनिवेदनम्

विदुरनरहरिः

विचित्रस्य छद्मप्रपञ्चस्य वेत्ता बलात्पातितानां मतानां विजेता ।
अहं ख्यातनामाऽस्मि नीतिप्रणेता धनाढ्यो विपन्नस्य देशस्य नेता ॥१॥
न जानामि पुण्यं न जानामि सेवां न जाने जनानां हितं सार्वभौमम् ।
परं भाषणेनामृतं पाययामि स्वकीयं महत्त्वं प्रतिष्ठापयामि ॥२॥

घटं वा पटं वा गृहं वाऽपि भेत्तुं निजं भ्रातरं वा कृपाणेन छेत्तुम् ।
धनं लभ्यते चेत् सदा तत्परोऽहं निरस्यापि वस्त्रं विपण्यां विहर्तुम् ॥३॥
समासन्ननिर्वाचनेषु क्षणेषु क्षिपामि प्रियं वित्तजालं जनेषु ।
सुरासुन्दरीणां क्वचिद्वा बलस्य प्रयोगात् स्वकीयं हितं साधयामि ॥४॥

मया सख्यमङ्गीकृतं दुर्जनानां न बिद्धं मनोवाक्शरैः सज्जनानाम् ।
परं नाऽस्मि कस्याऽपि विश्वासपात्रं स्वयं वाक्पटुर्वञ्चको वञ्चकानाम् ॥५।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्रुवां स्वार्थसिद्धिं यदा भावयामि निपत्यापि पादेषु दुष्टान् नमामि ।
सुशब्दैः क्षुधार्तान् जनान् सान्त्वयामि सुराभिः सखीनां तृषं नाशयामि ॥६॥

नवीनोऽस्ति नेता पुराणा वदन्ति पुराणोऽस्ति नेता नवीना वदन्ति ।
द्वयोरप्यहं वर्गयोर्योजकोऽस्मि विभेद्यापि तौ स्वार्थमुत्थापयामि ॥७॥
न चिन्ता मया गृह्यते निर्धनानां सचेष्टोऽस्मि संरक्षणे तस्कराणाम् ।
लभे नित्यमेतां समृद्धिं यथाऽहं विपन्नत्वमाप्नोति देशस्तथाऽयम् ॥८॥
स्वयं नायको वाक्पटुर्नैव कर्ता विकासस्य मार्गावहं दर्शयामि ।
विकासाय देशस्य विज्ञैर्भवद्भिर्विधेयानि कार्याण्यहं वर्णयामि ॥९॥

अहं बुद्धियुक्तः परामर्शदाता भवन्तस्तु कर्तार इत्युल्लिखन्तु ।
मदादेशमाश्रित्य कर्तव्यमार्गं मदिच्छानुकूलं विनिर्धारयन्तु ॥१०॥
शठो वञ्चको वाऽपि नेताऽहमस्मि मदादर्शनिष्ठा भवन्तो भवन्तु ।
समः सेवकानां कृते स्नेहशीलो यतोऽहं ततः सस्मितं मां नमन्तु ॥११॥

धवलागिरिवैभवम्

छात्रः भानुभक्त आचार्यः,वाल्मीकिविद्यापीठम्

सर्वेषामेव देशानां नेपालः सुमनोहरः ।
विभान्ति बहवः शैलाः प्रधानस्तु हिमालयः ॥१॥
तत्रोच्चतमशृङ्गो यो धवलागिरिपर्वतः ।
तस्यैव नाम्ना विख्यातमञ्चलं धवलागिरिः ॥२॥

चत्वारि मण्डलान्यत्र म्याग्दीमुस्ताङपर्वताः ।
वाग्लुङश्चैषु जागर्ति धन्या धार्मिकसंस्कृतिः ॥३॥
नानानदीसमायुक्तं गण्डकीपश्चिमे स्थितम् ।
रघुमङ्गलयोर्मध्ये म्याग्दीस्थानं मनोहरम् ॥४॥

पुलस्त्यस्य तपोभूमिवर्ततेऽत्र मनोहरा ।
असेवत धरामेतां योगी चेश्वरनामकः ॥५॥+

+(२०५८ वैक्रमाब्दस्य ज्येष्ठमासे जयतु संस्कृतम् संस्थया आयोजितायां महेन्द्रसंस्कृतविश्वविद्यालयस्तरीयकविताप्रतियोगितायां तृतीयस्थानप्राप्तैषा कविता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा गलेश्वरक्षेत्रं सिद्धयोगिसुसेवितम् ।
विराजते हरिहरस्तत्र देवैः परिष्टुतः ॥६॥

दैवज्ञानां निवासोऽस्ति पाङ्ग्रामे सुमनोहरे ।
गुह्येश्वरनदीक्षेत्रमुत्तमं तीर्थमस्ति तत् ॥७॥
सदागमषडर्तूनां नन्दना भूरियं स्थिता ।
उमया रमते सार्धमाशुतोषोऽत्र शङ्करः ॥८॥

मुक्तिनाथः प्रसिद्धोऽस्ति हिन्दूनां तीर्थ उत्तमः ।
मुस्ताङमण्डले दामोदरकुण्डः सुविस्तृतः ॥९॥
हिमगावश्चरन्त्यत्र चमरीयाकसंज्ञकाः ।
चरता कृष्णसारेन भूरियं यज्ञभूर्मता ॥१०॥

ज्वलति जलदीपोऽत्र सारूप्यमोक्षदायकः ।
स्थानं परमहंसाना साधितं तपसा पुरा ॥११॥
कवेः सुकृतिदत्तस्य धवलागिरिर्जन्मभूः ।
नानाशास्त्रप्रवीणोऽसौ विद्वद्भिरभिवन्दितः ॥१२॥

अत्रैव वर्तते देवी बाग्लुङ्काली वरप्रदा ।
सा कल्पतरुरेवाऽस्ति जनानां वाञ्छितार्थदा ॥१३॥

हिन्दुराष्ट्रं मे प्रियम्

छात्रः वासुदेवकोइराला, वाराणसीस्थः

जयतु संस्कृतं जयतु संस्कृतं जयतु संस्कृतम्
संस्कृतं मे प्रियं, हिन्दुराष्ट्रं मे प्रियम् ॥

संस्कृते सन्ति वेदाः पुराणानि च
संस्कृते सन्ति गीता महाभारतञ्च ॥१॥
जयतु संस्कृतम् ....
संस्कृतं मे प्रियं हिन्दुराष्ट्रं मे प्रियम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृते शिक्षणं संस्कृते भाषणम्
संस्कृते चिन्तनं संस्कृते गायनम्
सुखकरं संस्कृतेन जीवनं कुर्मो वयम्
संस्कृतं जन-भाषां कूर्मो वयम् ॥२॥
जयतु संस्कृतम्.......................
संस्कृतं मे प्रियम्.....................

संस्कृतें रामस्य रामायणम्
संस्कृते ऽस्ति छन्दसो गायनम्
संस्कृतेऽस्ति अस्माकं संस्कृतिः
सस्कृतेऽस्ति बुद्धस्यानुभूतिः ॥३॥
जयतु संस्कृतम्...................
संस्कृतं मे प्रियम्.............

मस्तके संस्कृतं जीवने संस्कृतम्
राष्ट्रे संस्कृतं भूतले संस्कृतम्
सुखकरं संस्कृतं शाश्वतं संस्कृतम्
संस्कृतं मे प्रियम् नेपालं मे प्रियम् ॥४॥
जयतु............................

नेपालं मे प्रियं संस्कृतं मे प्रियम्
नेपाले जनभाषां संस्कृतं कूर्मो वयम्
जीवने संस्कृतम् आचरामो वयम् ॥५॥
जयतु............................
नेपालं मे प्रियं संस्कृतं मे प्रियम् ।

शान्तनेपालदेशः

छात्रः खगेन्द्रघोडासैनीः विवशः

१. अहो ! शान्तनेपालदेशः अयमेव अस्माकम् अवशेषः
किमिदम् व्यङ्ग्यम् ?
वा नैतिकतायाः पराकाष्ठा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थले-स्थले अशान्तिः
जने-जने दिग् भ्रान्तिः
मानवामानवयोः क्व भेदः
रमणीया हिमश्रृङ्खला
सुललिता वासन्तिकी प्रकृतिः
भूमण्डले सरितः,अरण्यानीप्रदेशाः कन्दराश्च
आधुनिकास्त्रशस्त्राणां विनाशकारिणा विस्फोटवस्तुगन्धेन व्याप्तः
अहो ! शान्तनेपालदेशः अयमेव अस्माकम् अवशेषः ।

२.पुरातनी शान्त्याः परिभाषा
इदानीं कुत्र गता ?
कोलाहलं वाक्पटुताप्रदर्शनञ्च
एकविंशतिशताब्द्या नियमः अभवत्
यत्र मानवस्य परिकल्पना
सञ्चारवशीभूतमानवस्य
ज्ञाननयनाभावादेव
परिवर्तितः अस्माकम् भेषः
अहो ! शान्तनेपालदेशः, अयमेव अस्माकम् अवशेषः
३.यदा श्रृङ्गिभिः घुष्टम्
तत्र सूचिषदो नेपालः विलपितः
तेषां स्वप्निलभावनाया विकासात्
शान्तिपथगामिनः
स्वप्निलाकाशे तत्र स्नुषा क्रय-विक्रयरूपं
कुकर्मत्वम् अपेक्षन्ते
तदत्र स्तनन्धयोऽपि दृश्यते बुद्ध इव
विकसितकेशः
अहो ! शान्तनेपालदेशः, अयमेव अस्माकम् अवशेषः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. परस्परं वैरभावस्य प्राबल्यम्
बुद्धस्य "परस्परनिरपेक्षतायाः" मतम् ?
साम्यवादस्य समाजवादस्य च इयमेव उद्घोषणा ?
यत् भाषणे, व्याख्याने, संस्कृतमेव अमृतवाणी
तेषां व्यवहारे संस्कृतमेव मृतभाषा ?
तेषां नैव च नैव च ज्ञानम्
किञ्चिदपि लेशः
अहो ! शान्तनेपालदेशः
अयमेव अस्माकम् अवशेषः ।

धन्याऽस्माकं हि संस्कृतिः

छात्रः नन्दर्षिजोशी, वाल्मीकिविद्यापीठस्य

संस्कृतिः सभ्यताऽस्माकं क्रियाणां प्रतिपादिका ।
तयैव जीवनं याति मोक्षञ्च प्रददाति सा ॥१॥
उन्नता सभ्यताऽस्माकं विश्वस्मिन् परिपोषिता ।
लभ्यते न तथा श्रेष्ठा संस्कृतिश्चेतरा क्षितौ ॥२॥

सत्यं वद, गुरुं नत्वा पितरौ परिपूजय ।
सर्वेऽत्र सुखिनः सन्तु, वचने का दरिद्रता ॥३॥
परोपकारः पुण्याय पापाय परपीडनम् ।
आचारः परमो धर्मो मा गृधः कस्यस्विद्धनम् ॥४॥

अस्माकं संस्कृतिहर्येषा दृश्युदारा मनस्विनी ।
शान्तिं, संवृद्धिमिच्छन्ती शान्त्युदारमनस्विनी ॥५॥
न प्रेरयति सा स्वार्थे न च सा परपीडने ।
सदैव भूतिमिच्छन्ती सा चोन्नयति जीवनम् ॥६॥
आध्यात्मिकी सुशिक्षा सा विश्वस्मिन्नपि भौतिके ।
सच्चरित्रस्य विम्बेयं धन्याऽस्माकं हि संस्कृतिः ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुभुक्षिता :

बलदेव अधिकारी, धादिङमण्डलस्थः

प्रथिता कविता-माता माता पुत्रेण भक्षिता ।
शासकेन नेह रम्या नेपालभूः सुरक्षिता ॥
भक्षकाः रक्षकाः सन्ति सदैव गिरिजा नटाः।
मृतप्रियां विधायैव मांतरं भुञ्जते शठाः ॥

अतिदीर्घौ भुजौ धृत्वा नीतिप्रीतिविनाशकाः ।
प्रशासकः सुपुत्री च व्योमयानस्य भक्षकाः ॥
अन्ये चास्य परीवाराः सन्ति नेपालभक्षका :।
अस्माकं जन्मभूमिस्तु भक्षकेणैव रक्षिता ॥

शान्तनेपाल देशः

छात्रः हरिप्रसादभण्डारी,दाङमण्डलस्थः

शान्तो नेपालदेशोऽयं विविधैराकरैर्युतः
जलस्रोतवनाद्रीणां धनी सर्वत्र कथ्यते ॥२॥
वैदेशिका वदन्त्येनं दर्शनीयं मनोहरम् ।
शान्तनेपालदेशस्य गौरवञ्चातिनिर्मलम् ॥३॥
सीता-भृकुटि-ताराणां जन्मभूमिः समुज्वला ।
मातृभूमिरियं मान्या ज्ञानभूमिसमुज्वलः ॥४॥
साक्षाद्व्यासस्वरूपेण श्रेष्ठो वन्द्यो हिमालयः ।
शान्तिः सर्वत्र सततं येभ्यो विस्तारिताऽभवत् ॥५॥
संस्कृति सभ्यतायुक्तं च सुरवणी सुशोभितम् ।
बुद्धादिसुधीभिर्यत्र ज्ञानं सम्यक् प्रचारितम् ॥६॥
ज्ञानविज्ञानये विशिष्टं ज्ञानवर्द्धकम् ।
आगन्तुकानां सर्वेषां कुरुते स्वागतं मुदा ॥७॥
नेपालदेशो मनुते वसुधैवकुटुम्बकम् ।
निजरूपेण नेपालः शिवः शान्तश्च शोभनः ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कौशिकीशोभा

छात्रः हरिनारायणतिम्सिना, धरानस्थः

अदूषिता श्वासप्रवाहदक्षमा
महोर्मिभिर्भिन्नतट-द्रुमोपला ।
हिमालयात् प्राप्य जनिं वहत्यहो
लिखूसमेता च तनोतु नः शिवम् ॥१॥

विदारयन्ती जलधारया भुवं
निपातयन्ती च शिलास्तटद्वये ।
मुदं दधाना बहुशस्य- शालिनी
तमोरयुक्ता जनसंघ-रक्षिता ॥२॥

क्रमेण बह्व्या जलसंपदाऽऽवृता ।
मिलन्ति सप्तसरितः सुधाधरा ।
अनेकजन्मान्तर-कल्मषापहम्
स्थितं तटेऽस्याश्च वराहमन्दिरम् ॥३॥

सुवर्ण-कोशी खलु दुग्ध-कौशिकी
इन्द्रावती चाथ तमोरनामिका ।
ताम्रारुणे द्वे च लिखूः प्रसिद्धा
एता मिलित्वाऽजनि सप्तकौशिकी ॥४॥

तस्याः पयोभिःपरिषिसिक्तपादं
प्रवाहसंगीतरवेण सेवितम् ॥
भावावृतानां दुरितापहारकं
सुरं वराहं सुजनाः नमन्ति ते ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिवानिशं निर्झरिणी वहत्यसौ ।
सुसेव्य विश्वम्भरपाद-पङ्कजम् ।
सुनिर्गता या हिमशैल-भागतः
समस्तपापं सलिलेन हन्ति सा ॥६॥

धरत्यसौ मत्स्यशिशून् दयावती
विभेत्यसौ जालधरान्नराधमात् ।
तटे प्रयातुं त्वरयत्यसौ च द्राक् ।
निसर्ग एवैष जले न तीक्ष्णता ॥७॥

राष्ट्रं त्वया भाति सुगौरभाढ्यं
त्वयैव सस्याञ्चितभूमिरुर्वरा ।
गतिः सदा लोकहिताय तेम्ब ! यत्
स्वभाव एवैष महात्मनामिति ॥८॥

करोति काव्यं भवतीति सत्कविः
मनोविनोदः स हि भूतलान्तरे ।
सुकाव्यवत्तज्जलमस्ति सौख्यदं
सदा सदा दीव्यतु सप्तकौशिकी ॥९॥

शान्तनेपालदेशः

छात्रः हरिलालपौडेलः, दाङमण्डलस्थः

पृथ्वीनारायणप्रभृतिभी राजभिः पालितो यः
साध्व्यः सीता भृकुटिप्रमुखा, यत्र नार्यश्च जाताः ।
दिव्यो रम्यो मुदितवदनो हिन्दुमात्रैकदेशः
उच्चैर्भूयान्मम प्रियतमः शान्तनेपालदेशः ॥१॥

प्राच्यां मेची वहति, निकटे, सप्तकोशी विशाला
मध्ये झर्झर्झरितसलिला गण्डकी वेगयुक्ता ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्णाली चातिगहनजला, सिञ्चती याति पृथ्वीम्
ताभिर्युक्तो मम प्रियतमः शान्तनेपालदेशः ॥२॥

शुक्ला भान्त्युत्तरदिशि हिमशृंखलाः पंक्तिवध्दाः
तेनैवासौ प्रहसित इवादर्शयद्दन्तपंक्तीः ।
ग्रामैः पूर्भिश्च गहनवनैर्दृश्यते सुन्दरश्री :
आशातीतो मम बहुमतः शान्तनेपालदेशः ॥३॥

पूजा नित्यं भवति विधिवन्मन्दिरे देवतानाम्
क्षेत्रेऽन्नार्थं यतति कृषकः स्वेदमृद्भ्यां प्रलिप्तः
छात्रः शास्त्रं पठति च वणिक् पण्यकार्यं करोति
सर्वैर्युक्तो मम प्रियतमः शान्तनेपालदेशः ॥४॥

भ्रष्टाचारैर्ग्रसितहृदयं कामये नैव देशं
नो वा विस्फोटकप्रभृतिभिर्युक्तमत्यन्तभीतम् ।
भूयाच्छान्तो भयविरहितः श्रीसमेतः समन्तात्
सन्मार्गेणाग्रगतिमतताच्छान्तनेपालदेशः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतं सर्ववेद्यम्

छात्रः भरतभट्टराई,दाङमण्ड्लस्थः

संस्कृतं सर्ववेद्यं वै,शुभकर्मप्रवर्तकम् ।
संस्कृतमेव सर्वासां, भाषाणां मूलमेव च ॥१॥
इतिहासपुराणानां, ग्रन्थानां विविधात्मनाम् ।
चक्षूरूपेव सा भाषा, पुण्यदा मोक्षदा शुभा ॥२॥

अद्य भौतिकवादेन, पीडिताः सन्ति वै जनाः ।
तेषां पीडानिवृत्त्यर्थं, भाषेयमौषधं महत् ॥३॥
गुरोर्जनकमातॄणां, पूजनं परमं वरम् ।
उपदिशति गीर्वाणभाषा सर्वत्र सर्वदा ॥४॥

मणिना रहितः सर्पः निर्लज्जा चापि कामिनी ।
न शोभेते यथा तद्वद् हीनसंस्कृतवाग्जनः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं राजभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृत विश्वभूतये ॥

जयतु संस्कृतम्-संस्थापरिचयः

१. 'जयतु संस्कृतम्' पञ्चश्रीकसर्वकारेण स्वीकृता स्वतन्त्रा संस्था विद्यते ।

२. वैक्रमाब्दस्य २०५५ तमे वर्षेऽस्याः स्थापनाऽभूत् ।

३. अस्या मूलमुद्देश्यं कार्यक्रमाश्च निम्नलिखिताः सन्ति–

(क) संस्कृतवाङ्मयस्य सनातनसंस्कृतेश्चावश्यकतां महत्त्वञ्चाऽऽराष्ट्रं बोधयितुं तयोः प्रचाराय प्रसाराय संरक्षणाय संवर्द्धनाय च कार्यक्रमसमायोजनम् ।

(ख) देशे देशे सांस्कृतिकं पुनर्जागरणमानेतुं संस्कृतसम्भाषणशिविरसञ्चालनं, 'जयतु संस्कृतम्' नामधेयमुखपत्रप्रकाशनं, संस्कृतनाटकमञ्चनं, कवितामहोत्सवादिकर्मणाञ्चाऽऽयोजनम् ।

(ग) संस्कृतभाषायां लिखितानामुत्कृष्टग्रन्थानां प्रकाशनम् ।

(घ) उत्तरमहाभारतग्रन्थनिर्माणपुरः सरं तस्य प्रकाशनम् ।

(ङ) राष्ट्रभाषां शुद्धतया वक्तुं, लिखितुं स्वधर्मसंस्कृतिसदाचरविषये आवश्यकबोधप्राप्तयेचाऽस्मत्शिक्षणव्यवस्थायां माध्यमिकस्तरपर्यन्तं व्यावहारिकसंस्कृतमनिवार्यं कारयितुं सर्वकारसहयोगविधानञ्चेति ।

केन्द्रीयकार्यालयः काष्ठमण्डपस्य
अनामनगरे वर्तते
दूरभाषः २३०३७१

Jayatu Sanskritam, Kathmandu, Nepal